CC0. In Public Domain, Digitizagtion by eGangotri

॥ ॐ ॥

अथ

अमृतोपदेशः

योगसाम्राज्याधिष्ठितमिमांसकप्रवरझोपाह्वमैथिलश्रीयोगदत्त-
शर्मविरचितः तपस्समाधिसमुपलब्धसकलशास्त्रस्वात-
न्त्र्यसूत्रकारशिष्यझोपाह्वमैथिलश्रीमत्सत्यनारायण-
शर्म्मकृतभाष्यसहितो महाराजमिथिलेशश्रील
श्री५लक्ष्मीश्वरसिंहधर्म्मपत्न्याः श्रीमत्याः
श्री५लक्ष्मीवतीदेव्या द्रव्यसाहाय्येन
तदनुजमिश्रोपाह्वश्रीत्रिलोकना-
थशर्मणा प्रकाशितः।

सच

श्रीसूत्रकारश्रीभाष्यकारशुश्रूषुनैष्ठिकब्रह्मचारिगुर्वनुग्रहलब्ध
विज्ञानश्रीवलभद्रदासशर्म्मणा सम्पादितः संशोधितश्च।

काश्यां

श्रीमहेशप्रसादद्वारा
"सत्यनाम" मुद्रणालये मुद्रापितः
प्रथमावृत्तिः १०००)

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

मुद्रणालयदोषेण चास्मदस्वास्थ्यदोषतः
अत्रत्या शुद्धयः शुद्धि-पत्रैः शोध्या मनीषिभिः ॥ १ ॥
दृष्ट्वैव शुद्धिपत्राणि पाठ्यमेतत्कृपालुभिः
अर्थावगत्यै नम्रः सन् बलभद्रः प्रयाचते ॥ २ ॥

शुद्धिपत्रम्

भूतिकायाम् ।

शुद्धम्	अशुद्धम्	पृ०	पं०
श्रीमन	श्रीमान	१	१८
वलानोभिधेया	बलानामिधेया	२	२५
विपक्ष	वपक्ष	३	९
क्षपया	क्षापज	३	९
श्रीमत्त्रिलो	श्रीमत्रिलो	४	१
रिंघदवर्पवय	रिंघवय	५	२
लालसां	लालसं	५	६
बान्धव	बान्धवा	६	१२

अम्मृतोपदेशे ।

शुद्धम्	अशुद्धम्	पृ०	पं०
अन्यत्रान्या-ज्ञान	अन्यत्रान्य-ज्ञान	१	१९
सूत्रितत्वात्	सुचितत्वात्	३	२९
सकल	संकल१	८	२४
श्यामपिकिन्न	श्यामकिन्तु	९	१९
वैश्य	वश्य	११	२२
सूङि.त	सूचित	१४	४
भोक्ता	भोक्तव	१५	१४
दैहि	दैदि	१५	१
चञ्चलं	चञ्चल	१६	१५
नसम्भवति	सम्भवति	१६	२४
तवो	सवो	१६	२३

शुद्धम्	अशुद्धम्	पृ०	प०
तू	त्वु	१६	२४
बुद्ध्या	बुद्या	१७	९
तर्क्येत	तर्केत	१८	९
सिद्धिरिति	सिद्धिस्ति	१८	९
भिमतो	मिमतो	१८	१३
योगासिद्धौ	योगसिद्धौ	१८	१९
गुणासत्वे	गुणसत्वे	१८	२०
ग्रस	ग्रास	२४	२८
प्रमाणम्	प्रमापणम्	२५	७
प्रमापयितुम्	प्रभावपितुस्	२५	८
आनन्दाप्रमस्त-कपर्य्यन्तम्	आनन्दाप्रपर्य-न्तम्	२६	१२
श्रुति	श्रति	२८	२०
साकारणशरीरं-	साकार शरीरं	२८	२६
भवान्" "	भवान	२८	१८
माने	मानै	३०	२४
कल्पित	कल्पिते	३१	१३
द्वेषस्य	द्वषस्य	३५	१३
रूपत्वम्	रुपात्वम्	३५	१७
मायाय	भायया	३७	१८
प्रकृतिस्त्वम	प्रकृतत्वम	३७	१७

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

शुद्ध	अशुद्ध	पृ०	पं०
मिथ्या ...	भिथ्या ...	३८	२०
वास्य ...	वार्स्य ...	३८	२५
वचन ...	वर्चन ...	४०	६
बुद्ध्याश्रय ...	बुध्याश्तय	४०	१७
बीजात्मा ...	बीजान्या ...	४१	२९
भूतम् ...	भूतम ...	४३	२२
प्रपञ्च ...	पपंच ...	४४	३०
सवृत्तिका ...	सवृत्तिक ।	४५	१५
सुषुप्ते ...	सुषुप्त ...	४५	१५
पाप्मास्पर्शः	पाप्मस्पर्शः	४५	२८
द्रुतः ...	द्रतः ...	४६	१८
कृतीति ...	कृतिरिति ...	४६	२६
कारिणाम ...	कारिणम्	४८	१४
श्रुतिः ...	श्रतिः ...	४८	२५
सहस्र ...	सहश्र ...	४८	२५
नगरम् ...	नगर ...	४९	२७
निर्मितिश्च	निमितिम्	४९	२७
गभस्ति ...	गर्भास्त ...	५३	११
जीवन ...	जीव ...	५५	१८
क्रियेत ...	क्रियते ...	५५	३०
वाक्येन स्वीकारात्	वाक्येन ...	५६	२३
नाम ...	नामा ...	५६	२६
श्रुतिः ...	श्रतिः ...	५७	३०
दोष ...	दष ...	५८	२
ग्रामोऽहिंसा	ग्रामोहिंसा ...	६३	६
इवाऽजहत	इवजहत ...	६६	१४
जहत ...	अजहत ...	६६	२४
मन्त्रोच्येते	मन्त्राच्येते ...	६८	२९

शु०	अशु०	पृ०	पं०
श्रुतिः ...	श्रतिः ...	६९	२
प्रयोजनो ...	प्रयोजन ...	६९	१२
श्रुति; ...	श्रतेः ...	६८	१८
स्वभावो ...	स्वाभावो ...	६९	२८
विलोम ...	कैमुत ...	७०	४
माहो ...	माहा ...	७०	८
भोगः ...	भागः ...	७०	२९
श्रुतेः ...	श्रतेः ...	७१	१६
श्रुति	श्राति ...	७२	८
श्रुतं ...	श्रतं ...	७२	१५
प्र ...	। ...	७२	३१
इन्द्रः ...	इन्द ...	७५	१४
योगं ...	योग ...	७५	२६
इति ...	इनि ...	७६	७
देशो ...	देशा ...	७६	८
अनात्मत्व ...	आत्मत्वं ...	७७	१७
मय्युपपन्न ...	मप्पनुपपन्न	७७	१७
श्रुतेः ...	श्रतेः ...	७८	२
दृश्यते ...	दृश्यत ...	७८	२७
विशेषण	विशेण ...	७९	१०
रूपम् ...	रूपम ...	८१	२४
विद्यै ...	विद्येव ...	८२	१३
वेदित ...	वतित ...	८२	१९
धिकारी ...	धिकार ...	८३	२४
भक्तिः सेवा-पदवाच्या ...	सेवापद-वाच्या ...	८४	४
ज्ञान ...	ज्ञ ा न ...	८७	३१
परशुश्छेद्यस्य	परशुच्छेद्यस्य	८९	११
तिष्ठन्ते ...	तिष्ठन्त	९१	७
भूमगस्तु ...	भ मस्तु ...	९२	३

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

शुद्ध	अशुद्ध	पृ०	पं०	शुद्ध	अशुद्ध	पृ०	पं०
दित्यत्र	द्वित्यत्र	९५	११	शेपुलुपठन	घताडन	१३३	२१
राजाहं	राजाह	९५	२३	अन्तस्स्थ	अन्तस्थ	१३३	३२
मधीर	मधीतिमधीर	९७	१४	तुल्यः	तूर्य्यः	१३५	१९
यान्तु	मन्तु	९८	१६	दीपा	द्वीप	१३७	८
औत्कृष्ट्यं	औत्कृष्य	९९	२५	दीपा	द्वीपा	१३७	१०
वर्जिंतया	वजितया	१००	४	दीपा	द्वीपा	१३७	१०
माचार्य्यैं	माचार्य्यै	१००	३०	दी	द्वीपा	१३७	११
वायुः	वायु	१०२	३	शैत्या	शौत्या	१३७	२७
कला	भला	१०३	२	दीपा	द्वीपा	१३७	२९
बन्धनं	बन्धन	१०४	१२	माद्यक्तिर्व्यक्तिर्मुं	मा मू	१४०	७
बध्नातिहि	बध्नाति	१०४	१४	गृणु	घण	१४०	
गुल्फ	जुल्फ	१०४	२	आस्वा	आस्वाः	१४०	१८
मनः स्थैर्य्यं	मनस्थैर्य्यं	१०५	३०	कृतैकता	कृता	१४३	५
रूप	रूप	१०६	३	विद्धः	विद्ध	१४५	४
रेचको	रेचका	१०८	२५	प्रसादो	पपादो	१४५	२२
मोक्षं	माक्षं	१०९	२०	भिधानं	निधान	१४५	२७
असक्त	अशक्त	११४	३२	न्तिमागतः	न्तिागतः	१४५	३
शौच	शोच	११६	७	२१	२	१४६	१६
परिचाययति	परिचापयति	११६	३२	भूय	मूय	१४७	२६
सुपपद्यते	सुपद्यते	११७	१९	दयन्ति	दयति	१४७	२७
शस्तं	प्रशस्तं	११८	२०	मन्त्रयन्ते	मन्त्रन्ते	१४६	१९
अत	अथ	११९	८	मभिधीय	मधीय	१४९	२३
पापविद्ध	पायविद्ध	१२१	१	ननु	नन	१५१	३२
गमयति	गमयते	१२१	३२	गम्यं	गम्य	१५२	४
श्रान्ति	शान्ति	१२७	३	सूर्य्याग्नि	सूर्य्याति	१५२	६
विधेयत्वं	विधयत्वं	१२७	१५	चे	चा	१५३	२२
श्रान्ति	शन्ति	१२७	३०	सर्वथा	सवथ्या	१५३	१२
दारिद्र्य	दारिद्य	१२९	२४	असम्	असम	१५४	१२
तरो	तरा	१३०	२	तन्द्रा	तन्त्रा	१५४	१६
भि	भिभ	१३०	२०	संनिन्	मश्विन्	१५५	२३

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

शुद्ध	अशुद्ध	पृ०	पं०	शुद्ध	अशुद्ध	पृ०	पं०
कारोऽन्त	कारमन्त ···	१५५	२५	साधन ···	साधक ···	१६८	२८
चरो ···	चरं ···	१५५	२६	कर्मा ···	कमा ···	१६९	१५
तन्त्र ···	तंतं ···	१५६	१७	चिच्चिन्ता	चिन्ता ···	१६६	२०
सुरये ···	सुरय ···	१५५	१७	समीपप्रदेशं	प्रदेशं ···	१७०	१४
कारुरायाद् यथाक्रममा	काएण्याद	१५६	१६	इति ···	इत्यपि ···	१७१	२९
क्रमानुसारेण	यथाक्रमम्	१५८	१३	वेदि ···	वदि ···	१७३	६
स्थानकं ···	स्थाननं ···	१५८	२४	धेरि ···	धावि ··	१७३	२३
तुरल ···	तुारल ···	१५६	१४	सत्त्वात् ···	सात्वत् ···	१७३	२९
वृतिः	वृत्ति ···	१६९	२६	पयती ···	पती ···	१७४	२
वेदितव्यम्	वेदितव्यम	१६४	३१	स्थूल ···	स्थू ···	१७४	२३
मनसो ···	मसो ···	१६६	१६	नेकं ···	नेक ···	१७५	२०
चक्षुः ···	चक्षः ···	१६६	२८	रसं ···	रसो ···	१७६	१
निष्पन्न ···	निउपन्न ···	१६७	२६	कश्चिच ···	कश्चि ···	१७६	२२

अधिकरणेषु शुद्धीपत्रम्।

शुद्धम्	अशुद्धम्	पृ०	पं०
अथामृतोपदेशः अमृतंसंसृति निवृत्तिः इत्यमृताधिकरणम् अथ संसृत्यधिकरणम् संसृतिः स्वरूपविस्मृतिः इति संसृत्यधिकरणम् अथाविद्याधिकरणम् तद्धेतुरविद्या—इत्यादि	अथामृतोपदेशः इत्यमृतताधिकरणम् अथसंसृत्यधिकरणम् अमृतंसंसृतिनिवृत्तिः इतिसंसृत्यधिकरणम् अथा विद्याधिकरम् संसृतिः स्वरूप विस्मृतिः तद्धेतुरविद्या	१	१से ८ तक
अथ सञ्ज्ञाधिकरणम् ··· ···	अथाऽसञ्ज्ञाधिकरणम्	८	४
इति सञ्ज्ञाधिकरणम् ··· ···	इत्यसञ्ज्ञाधिकरणम्	८	७

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri



Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

अथामृतोपदेशस्य

अधिकरणानि

अथामृताधिकरणम् १

अथामृतोपदेशः ... ... १।१।१

इत्यमृताधिकरणम्

अथसंसृत्यधिकरणम् २।

अमृतं संसृतिनिवृत्तिः ... ... १।१।२

इति संसृत्यधिकरणम्

अथऽविद्याधिकरणम् ३।

संसृतिः स्वरूपविस्मृतिः ... ... १।१।३

तद्धेतुरविद्या ... ... १।१।४

देहादावात्मबुद्धिस्वरूपाऽनादिः सान्ता च १।१।५

सा हि कर्म्मानुगेश्वरानुशास्या प्रपञ्चो-
पादानस्वभावा ... ... १।१।६

ब्रह्मण्यधिष्ठिता ... ... १।१।७

इत्यविद्याधिकरणम्

अथ देहाधिकरणम् ४।

स्थूलसूक्ष्मकारणभेदात् त्रिविधो देहः ... १।२।१

आप्रारब्धस्थायी स्थूलः सूक्ष्मस्तु प्रलया
वधिः आमुक्तेः कारणम् ... ... १।२।२

इति देहाधिकरणम्

अथ कर्म्माधिकरणम् ५

प्रारब्धसञ्चितक्रियमाणभेदात् त्रिविधं कर्म १।२।३

पूर्वशरीरसम्पादितं विद्यमानशरीरोपभोग्य-
म्प्रारब्धम् ... ... १।२।४

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

तथाविधं विद्यमानशरीरानुपभोग्यं सञ्चितम् १।२।५
विद्यमानशरीरसम्पादितमुभयविधं क्रियमाणम् १।२।६

इति कर्माधिकरणम्।

अथ चैतन्याधिकरणम् ६

जीवः संसारी ... ... १।३।१
सर्वशक्तिमदनादिरीश्वरः ... ... १।३।२
शुद्धचैतन्यं नित्यं ब्रह्म ... ... १।३।३

इति चैतन्याधिकरणम्

अथ स्वरूपाधिकरणम् ७

तद्ध्यात्मनो रूपम् ... ... १।४।१

इति स्वरूपाधिकरणम् ७

अथऽनुज्ञाधिकरणम्

यतितव्यं तद्विज्ञाने ... ... १।४।२

इत्यनुज्ञाधिकरणम्

अथ साधननिर्देशाधिकरणम् ८

तत्साधनं योगसाङ्ख्यम् ... ... १।४।३

इति साधननिर्देशाधिकरणम

अथ योगाधिकरणम् ६

स्वरूपपरिचयो योगः ... ... २।१।१
तत्साधनेऽपि तच्छब्दः ... ... २।१।२

इति योगाधिकरणम्

अथ योगाङ्गाधिकरणम् १०

मनोदृष्टिभ्यामविमुक्तसेवनं तच्छेषः ... २।१।३
तद्वदन्येषामपि बाह्याभ्यन्तराणां वा ... २।१।४

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

प्राणापानयोरन्योन्यस्थितिविनिमयेनात्ममन्त्राभ्यासश्च ... ... २।१।५

इति योगाङ्गाधिकरणम्

अथ फलाधिकरणम् ११

ततोहि मनसः स्थैर्य्यं कुम्भकनिपत्तिश्च २।२।१

आनन्दानुभवश्च ... ... २।२।२

निमित्तान्तरोपस्थानं यथोपयोगम् ... २।२।३

इति फलाधिकरणम्

अथ द्रुतसिद्ध्युपायाधिकरणम् १२

गुरुशुश्रूषणादविलम्बः ... ... २।२।४

इति द्रुतसिद्ध्युपायाधिकरणम्

अथ मनोजयाधिकरणम् १३

मनोऽनुसरणात्तज्जयः ... ... २।२।५

इति मनोजयाधिकरणम्

अथ विघ्ननिरासाधिकरणम् १४

प्रणवसञ्जपनाद्विघ्ननिरासः .... २।२।६

इति विघ्ननिरासाधिकरणम्

अथाभ्याससमयाधिकरणम् १५

सेवनन्त्वानुद्वेगं मनसः ... ... २।२।७

इत्यभ्याससमयाधिकरणम्

अथ यमनियमापेक्षणाधिकरणम् १६

तच्च यमनियमपुरस्सरम् ... ... २।२।८

इति यमनियमापेक्षणाधिकरणम्

अथ पथ्याधिकरणम् १७

दोषत्रयानुत्पत्तिविनाशनिमितं पथ्यम् ... २।२।९।

शुक्रस्य च निमित्तम् .... २।२।१०

इति पथ्याधिकरणम्

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

अथापथ्याधिकरणम् १८

तद्विपरीतमपथ्यम् .... २।२।११

इत्यपथ्याधिकरणम्

अथ यमनियमपथ्याप्रयोजकत्वाधिकरणम् १९

विनाऽपि तेभ्यः पूर्वसम्पादित क्षेत्र

संस्कारात् .... २।३।१

जन्मान्तरकृताभ्यासबाहुल्याद्वा .... २।३।२

इति यमनियमपथ्याप्रयोजकत्वाधिकरणम्

अथासनाधिकरणम् २०

अभ्यासे सिद्धासनम् .... २।३।३

पद्मस्वस्तिके वाऽपि .... २।३।४

विश्रामे च शवासनम् .... २।३।५

इत्यासनाधिकरणम्

अथ विश्रान्त्यधिकरणम् २१

नाविश्रान्तेन किमप्यनुष्ठेयम् .... २।३।६

अन्यथा व्याधिसम्भवः .... २।३।७

इति विश्रान्त्यधिकरणम्

अथ देशाधिकरणम् २२

देशम्पूतमनापदम् .... २।३।८

निर्ज्जनं सुखसेव्यम् .... २।३।९

इति देशाधिकरणम्

अथोपवेशनाधिकरणम् २३

उपवेशनं कुशवाससैणादीनि .... २।३।१०

इत्युपवेशनाधिकरणम

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

अथापानोत्थानाधिकरणम् २४

ततश्चान्तनभ्यामपानप्रवेशः ... ... २।४।१

स च चक्रभेदस्य निमितम् ... ... २।४।२

इत्यपानोत्थनाधिकरणम्

अथारम्भलक्षणाधिकरणम् २५

आरम्भे स्वेदकम्पादिः ... ... २।४।३

इत्यारम्भलक्षणाधिकरणम्

अथ नादाधिकरणम् २६

प्रतिचक्रं नादवैचित्र्यम् ... ... २।४।४

निष्पत्तौ यन्त्रवन्नादः ... ... २।४।५

इति नादाधिकरणम्

अथ गात्रविक्षेपाधिकरणम् २७

गात्रविक्षेपश्च ... ... २।४।६

मुद्रान्यासात्मकानेकविधः ... ... २।४।७

इति गात्रविक्षेपाधिकरम्

अथ प्रकाशाधिकरणम् २८

ज्वलनश्चक्रमध्यगं दीपाकाराऽचिरस्थायि २।४।८

इति प्रकाशाधिकरणम्

अथाऽजपाक्षरविनिमयाधिकरणम् २९

आत्ममन्त्राऽक्षरयोरन्योन्यस्थितिवि-
निमयश्च ... ... २।४।९

इत्यजपाक्षरविनिमयाधिकरणम्

अथ मातृकाभिव्यक्त्यधिकरणम् ३०

मातृकानादस्याभिव्यक्तिः .... २।४।१०

इति मातृकाभिव्यक्त्यधिकरणम्

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

अथ प्रणवाऽभिव्यक्त्यधिकरणम् ३१

तद्वत्प्रणवस्याऽपि ... ... २।४।११

इति प्रणवाऽभिव्यक्त्यधिकरणम्

अथ वास्तध्वन्यधिकरणम् ३२

ततो महाजसदृशध्वनिः ... २।४।१२

इति वास्तध्वन्यधिकरणम्

अथ बरुणबीजाधिकरणम् ३३

बरुणबीजस्य च ... ... २।४।१३

इति बरुणबीजाधिकरणम्

अथ शुशुकारफुत्कारध्वन्यधिकरणम् ३४

ततः शुशुकारफुत्कारयोः ... ... २।४।१४

इति शुशुकारफुत्कारध्वन्यधिकरणम्

अथ महावाक्यादिस्फुरणाधिकरणम् ३५

महावाक्यादेः स्फुरणम् ... ... २।३।१५

इति महावाक्यादिस्फुरणाधिकरणम्

अथ ग्रहाधिकरणम् ३६

वेदे प्रामाण्यग्रहः ... ... २।४।१६

कृतकृत्यताग्रहश्चात्मनि ... ... २।४।१७

पावित्र्यग्रहश्च ... ... २।४।१८

शरीरात्पार्थक्यग्रहः ... ... २।४।१९

इति ग्रहाधिकारणम्

अथ ममतावैरूप्याधिकरणम् ३७

विषयेषु ममत्वमयथापूर्वम्भतृगृहोषि

तयोषितां नाभिगृहादिष्विच ... ... २।४।२०

विभक्तभातृधनादिवच्च ... ... २।४।२१

इति ममतावैरूप्याधिकरणम्

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

अथ कुण्डलनीप्रस्थानाधिकरणम् ३८

कृते शोपायनसमया शक्तिः ... २।४।२२

अनन्तरं तत्सम्पत्तिः ... ... २।४।२३

इति कुण्डलनीप्रस्थानाधिकारणम्

अथ गानाधिकरणम् ३९

गानं दिव्यसुखावहम् ... ... २।४।२४

इति गानाधिकरणम्

अथ दिव्यविषयोपलब्ध्यधिकरणम् ४०

उपलब्धिः दिव्यविषयाणाम् ... २।४।२५

इति दिव्यविषयोपलब्ध्यधिकरणम्

अथ भयाधिकरणम् ४१

भीतिरपरिचितौ भूम्याः .... २।४।२६

इति भायाधिकरणम्

अथमूर्छाधिकरणम् ४२

निद्रारम्भे मुहुर्मूर्छा .... २।४।२७

इति मुर्छाधिकरणम्

अथा मृत्युसन्निधानाधिकरणम् ४३

सान्निध्यञ्च मृत्योः ... ... २।४।२८

इति मृत्युसन्निधानाधिकरणम्

अथाचिरस्थज्ञानाधिकरणम् ४४

संविदश्चाविर्भावो विद्युद्वत् .... २।४।२९

इत्यचिरस्थज्ञानाधिकरणम

अथ संशयविच्छेदाधिकरणम् ४५

ततः संशयविच्छित्तिः .... २।४।३०

इति संशयविच्छेदाधिकरणम

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

अथ व्यवहारानासक्त्यधिकरणम् ४६

अनासक्तिश्च व्यवहारे .... २।४।३१

इति व्यवहारानासक्त्यधिकरणम्

अथाऽसङ्गाधिकरणम् ४७

अन्योन्यं विरुद्धस्वभावानां गुणत्रयजन्मनां विकल्पेन तरङ्गवत् प्रवृत्तिः .... २।४।३२

इत्यसङ्गाधिकरणम्

अथ गुणोपस्थितिप्रकाराधिकरणम् ४८

सत्वभूमिः पूर्वमतिथिवत् .... २।४।३३

पश्चादितरावेव तद्वत् ... ... २।४।३४

सर्वे तु निर्गुणे .... २।४।३५

अन्तर्गा दृष्टिः .... २।४।३६

इति गुणोपास्थितिप्रकाराधिकरणम्

अथ गुरुदर्शनाधिकरणम् ४९

दर्शनञ्च गुरोः .... २।४।३७

इति गुरुदर्शनाधिकरणम्

अथ स्वरूप दर्शनाधिकरणम् ५०

ततः स्वरूपदर्शनम् ... . २।४।३८

यथाशास्त्रं यथाक्रमम् ... . २।४।३९

इति स्वरूपदर्शनाधिकरणम्

अथानन्दप्रचयाधिकरणम् ५१

तत आनन्दप्रचयोत्थानम् ... ... २।४।४०

इति त्वानन्दप्रचयाधिकरणम्

अथ शून्याधिकरणम् ५२

शून्यस्याऽपि तद्वत् ... ... २।४।४१

इति शून्याधिकरणम्

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

अथापरिग्रहाऽधिकरणम् ५३
तदा विषयाणामपरिग्रहः .... २।४।४२
इत्यरिग्रहाऽधिकरणम्
अथ व्युत्थानाऽधिकरणम ५४
संसृतौ पुनः प्रत्यावर्त्तनम् ... २।४।४३
इति व्युत्थानाऽधिकरणम्
अथ व्युत्थानसादृश्याधिकरणम् ५५
सुप्तोत्थितवत् ... ... २।४।४४
इति व्युत्थानासादृश्याधिकरणम्
अथ प्रमाणानपेक्षाधिकरणम् ५६
प्रमाणनैरपेक्ष्यं प्रवृत्तौ ... ... २।४।४५
इति प्रमाणानपेक्षाधिमरणम्
अथ सिद्धचुपस्थित्यधिकरणम् ५७
विरतौ सिद्धिसमागमः ... ... २।४।४६
इति सिद्धचुपस्थित्यधिकरणम्
अथ साङ्ख्याधिकरणम् ५८
प्राकृतेषु वस्तुषु दोषदर्शनपुरस्सर आत्मविवेकः सांख्यम् ... ... ३।१।१
इति साङ्ख्याधिकरणम्
अथ हेयोपादेयविचाराधिकरणम् ५९
हेयोपादेयौ ज्ञातव्यौ ... ... ३।१।२
इति हेयोपादेयविचाराधिकरणम्
अथ हेयाधिकरणम् ६०
हेयं दुःखमविधेयम् ... ... ३।१।३
इति हेयाधिकरणम्

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

अथ दुःखाधिकरम् ६१

मन उद्वेगनिमित्तं दुःखम् ... ३।१।१४

इति दुःखाधिकरणम्

अथ सुखाधिकरणम् ६२

मनःप्रसादनिमित्तं सुखम् ... ३।१।१५

इति सुखाधिकरणम्

अथ दुःखप्रयोजकाधिकरणम् ६३

कामनाभिघाताद्दुःखम् ... ... ३।२।१

इति दुःखप्रयोजकाधिकरणम्

अथ सुखप्रयोजकाधिकरणम् ६४

तद्विपर्ययाच्च सुखम् ... ... ३।२।२

इति सुखप्रयोजकाधिकरणम्

अथ कामनाधिकरणम् ६५

साऽभीष्ट वियोगलाभयोः ... ... ३।२।३

इति कामनाधिकरणम्

अथ कामनाऽविधानाधिकरम् ६६

सर्वं वस्तुजातं विनश्वरम् ... ३।२।४

प्राप्तिरप्यनियामिका ... ... ३।२।५

अतः साऽपि दुःखपर्यवसायिनी ... ३।२।६

अनर्थस्य च हेतुः ... ... ३।२।७

इति कामनाऽविधानाधिकरणम्

अथाऽमृताधिकरम् ६७

अमृतं ज्ञानसम्पाद्यम् ... ... ३।३।१

इत्यमृताऽधिकरणम्

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

अथ ज्ञानसाधनाधिकरणम् ६८

ज्ञानम्मननिष्पाद्यम् ... ... ३।३।२

तदनुकूलं चित्तशोधनम् ... ... ३।३।३

यतो ग्राह्यग्राहकयोः सधार्म्यम् ... ३।३।४

तच्चजन्माद्यानुकूलप्रवृत्तितिहेतुसंस्कारापनोदनम् ... ... ३।३।५

तच्च पापानुत्पत्तिध्वंसहेतुकर्मसम्भवम् ... ३।३।६

काम्यमपि सात्विकं फलानपेक्षं तस्यनिमित्तम् ... . ३।३।७

इति ज्ञानसाधनाधिकरणम्

अथ सत्वसमुद्रेकाधिकरणम् ६९

ततः सत्त्वसमुद्रेकः ... ... ३।४।१

इति सत्त्वसमुद्रेकाधिकरणम्

अथ रागारागाधिकरणम् ७०

रतिविरत्योश्चानुकूलप्रतिकूलयोः ... ३।४।२

इति रागारागाऽधिकरणम

अथाऽनावश्यककर्म्मविधानाधिकरणम ७१

आपरितोषादनावश्मकम् ... ... ३।४।३

इत्यनावश्यककर्मविधानाधिकरणम्

अथ परितोषाधिकरणम् ७२

शुद्धे चेतसि परितोषः ... ... ३।४।४

इति परितोषाधिकरणम्

अथावश्यककर्म्मविधानाऽस्वरसाधिकरणम् ७३

परितोषे त्वावश्यकमनावश्यकम् ... ३।४।५

इत्यावश्यककर्मविधानाऽस्वरसाधिकरणम्

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

अथ विश्रान्त्यधिकरणम् ७४

अनात्मस्वविश्रान्तं मन आत्मन्येव-
विश्राम्यति ... ... ३।४।६

इति विश्रान्त्यधिकरणम्

अथ विश्रान्तिसादृश्याधिकरणम् ७५

यथा भार व्यपगमें गन्तव्यनिकटे पथिकः-
छायासु . ... ३।४।७

इति विश्रान्तिसादृश्याऽधिकरणम्

अथ कैवल्याधिकरणम् ७६

कैवल्यन्तु प्रारब्धक्षये ... ... ३।४।८

इति कैवल्याधिकरणम्

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

॥ श्रीगणेशायनमः ॥

भूमिका ।

श्रीगुरुचरणकमलेभ्योनमः ।

भारतखण्डान्तर्गतमस्त्येकम्महीमण्डलं सुप्रसिद्धं सुपुण्यञ्चिच्छक्तेर्भगवत्या वैदेह्या आविर्भावस्थानम् विद्याविवेकसम्पत्तिसमृद्धिशौर्य्यशक्त्यादिगुणानामाकरः तीरभुक्तिनामधेयम् । यत्र नदीनान्तीरेषु भुक्तिर्भोजनमिति व्युत्पन्नम् । अस्य भूभागस्य प्राच्यां दिशि कौशिकी अवाच्यां दिशि स्वर्गसोपानस्वरूपिणी पापापहारिणी गङ्गा, प्रतीच्यां दिशि गण्डकी च, धर्म्ममूर्त्तयः सीमानद्यः प्रवहन्ति । उदीच्यां दिशि हिमाद्रेर्दक्षिणप्रान्तीयं जनकपुरनामधेयाया राजर्षिप्रवरविदेहराजधान्या उदग्दिग्वर्ति जानकीपरिणयपणीभूताजगवधनुःस्थानान्नातिदूरे हैमवताभिधानं सीमावनं वर्त्तते । यस्मादत्र प्रदेशे आसां सीमानदीनाम् तीरे निवसन्तो ब्राह्मणा यज्ञादिकर्म्माणि तदङ्गपूर्व्यैं भुञ्जाना भवन्ति तस्मादेवायम्प्रदेशस्तीरभुक्तिनामधेयोभवति । प्राचीना धर्म्मधुरीणा वाल्मीकियाज्ञवल्क्यगौतमादिब्रह्मर्षय इदमेवमहीमण्डलमलङ्कुर्व्वन्ति स्म । अर्व्वाचीनाश्च वाचस्पतिमिश्रभट्टपादमण्डनमिश्रोदयनाचार्य्यपक्षधरमिश्रशङ्करमिश्रादिनामधेयाः सर्व्वतन्त्रस्वतन्त्राः पण्डिताग्रगण्या महान्तोऽत्रैव निवसन्ति स्म। प्राचीना निमिवंशोद्भवा विगतदेहाभिमाना विदेहनामानोजीवन्मुक्ता राजर्षिप्रवरा इदमेवमहीमण्डलं स्वावसथं कृतवन्तो विराजन्ते स्म। अर्व्वाचीनाश्च हरसिंहदेवादयोराजन्याः शिवसिंहादयोमैथिलब्राह्मणा श्रीमान् महेशठक्कुर नरेन्द्रसिंहादयः श्रोत्रियत्वविशिष्टोत्कृष्टमैथिलब्राह्मणाश्च भूमिपाला इदमेव महीमण्डलम्पालयन्ति स्म। अत्रैव निरुक्तश्रीमन्महेशठक्कुरवंशसमुद्भवः नानाराजकीयोपाधिविभूषितोमिथिलामहीमण्डलमण्डनः श्रीलः श्रीलक्ष्मीश्वरसिंहोमहाराजः सज्जनव्रजकल्पद्रुमायमानोदीनोद्धारधुरीणोतीरभुक्त्याधिपत्यमधिगम्येमां तीरभुक्तिभूमिं सनाथीकृत्य विराजते स्म। प्रभुरयमनेकवारं दुर्भिक्षसमये प्रजाभ्यः स्वकीयग्राह्यभागस्य करस्य कञ्चिदंशं परित्यज्य परित्यज्य ततस्तेषामुदरपूर्त्तिं कलितवान् प्रभुरयमेकदा कालिकात्ताख्यायां नगर्य्यां महत्यां सभायां

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

सभापतित्वपदमलं कुर्व्वन् अतिविकरालविशालदुर्भिक्षमहाकालकवलितप्रायान् म्रियमाणान् जनान् समवगत्य करुणारसार्द्रहृदयस्तेभ्यो द्वादशलक्षपरिमितमुद्रादानमाज्ञाप्य तेषाम्बुभुक्षावन्हिं निर्व्वाप्य लोकविस्मापिकां दानवीरतां प्रदर्शयामास। अस्य प्रभोरन्यान्यथानेकानि समुदारचरितानि वसुधातले जाग्रति। परन्तु एतदीयसच्चरित्रदिग्दर्शनमात्रमेव महत्वप्रख्यापनायालम्मन्वानैरस्माभिरेतावतैव विरम्यते। अत्र प्रदेशे राजर्षेर्जनकस्य राजधानीभूतं जनकपुराभिधानं पत्तनं लोकशास्त्रप्रसिद्धं पुण्यतमं महातीर्थस्थानं विलसति। कमलात्रियुगादिनद्यः पुण्यप्रवाहाः प्रवहन्त्यः देशममुं तीर्थी कुर्व्वन्ति। सिंहेश्वर-कुशेश्वरभुवनेश्वराद्यनेकपुण्यमयलिङ्गप्रतिष्ठितः सदाशिवश्च क्षेत्रीकरोति। उग्रतारा–राजराजेश्वरी-जयमङ्गला-चामुण्डादिमहाशक्तयोभगवत्यः प्रतिकृतिमधिष्ठिता वेदिकामात्रमधिष्ठिताश्च स्वकीयकरुणापाङ्गविलोकनैर्मैथिलतनयान् लालयन्ति प्रतिष्ठापयन्ति च। प्रतिष्ठायामेतन्महीमण्डलं सर्व्वासु दिक्षु नितरामप्यस्मिन् भूमिभागे गौतमाद्यनेकब्रह्मर्षीणामाश्रमाः समाश्रितानां शान्तिं सम्पादयन्ति। मिथिलापरनामधेया इयं तीरभुक्तिभूमिरयोध्यादिसप्तमुक्तिदायकपुरीभ्यः कलामात्रमपि न्यूना न भवतीति शास्त्रसम्मतिर्जागर्त्ति। इयं तीरभुक्तिः करालकलिकालकवलितापि शास्त्रीयलौकिकसदाचारसम्पत्त्या सकलसंस्कारसम्पत्त्या च अपरान् धर्म्मकर्म्मवलितान् भारतीयभूमिभागानधरी करोति। अस्यां तीरभुक्त्यामुद्याननामधेयैकावसतिरस्ति सैव उजाननाम्ना प्रसिध्यति। यत्र रामेश्वरोपाध्याय–कल्याणोपाध्याय-कविकुलालङ्कारकृष्णदत्तादिविद्वान्सो विद्याफलभारावनम्राः सच्चरित्रसच्छायाः कीर्त्तिसौमनस्याः द्रुमायमानाभवन्तो वसतिमिमामन्वर्थनाम्नीं कुर्व्वन्ति स्म। अस्या वसतेः पश्चिमदिशि कमलानामधेया निर्मलाकलिमलापहारिणी नदी प्रवहति। प्राग्दिशि च बलानामिधेया पुण्यप्रदा नदी प्रवहति। उदीच्यां दिशि वीरेश्वरनामा महादेवो लिङ्गप्रतिष्ठोविद्योतते। दक्षिणदिशि वैष्णवमण्डलमयी लगमाख्या ग्रामटिका वर्त्तते। अस्यां वसत्यां मध्यप्रदेशे सौम्यस्वरूपा महिषमर्दिनी भगवती प्रागुत्तरप्रदेशे उग्रस्वरूपा छिन्नमस्तका भगवती च प्रतिकृतिमधिष्ठितवत्यौ कल्याणदायिन्यौ भवतः। अत्रैव महिषमर्दिनीस्थाने गोस्वामीलक्ष्मीनाथः सिद्धिं समवाप इति किंवदन्ती श्रूयते। अत्रैव कृष्णदत्तनामा ग्रामीणश्रोत्रियब्राह्मणबालकः मृतिमापन्नोभवगतीपुरोभागे स्वज-

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

नैः प्रक्षिप्तः भगवती महिम्ना स वालकः प्रातः काले स्वजनैर्लब्धप्राणो लब्धः । अत्र इदानीन्तनकालेपि जीवनशर्म्म-कृष्णदत्तदासप्रमुखा मल्लपरिवृढ़ा भवन्ति स्म । ये स्वहस्तैर्वेणूनुत्पाटतन्ति स्म । सवृषभसभारपङ्कनिमग्नसकटं पृष्ठेन उत्थाप्य उच्चालयन्ति स्म । अत्रैववक्ष्यमाणानाम् एतद्ग्रन्थकर्तॄणाम् अस्मद्गुरूणां समानकालीनसहाध्यायीच श्रोत्रियवंशावतंसोभ्होपाह्वोऽस्मत्सपिण्डः श्रीहर्षनाथशर्म्मा कण्ठाभरणीकृतशब्दशास्त्रः हस्तामलकीकृतधर्म्मशास्त्रसाहित्यादिशास्त्रः संस्कारप्रदीप चतुरग्निविधानक-जलाशयोत्सर्गपद्धति गीतगोपीपतिटीकोपाहरणनाटकादिग्रन्थानां प्रणेता विपक्ष पक्षक्षपनक्षमः पण्डिताग्रगण्योभवतिस्म । तथा तत्समानकालीनः तत्सहाध्यायी श्रोत्रियवंशावतंसपण्डिताग्रगण्यः झोपाह्वः श्रीजनार्दनशर्मा शब्दशास्त्ररत्नाकरः दर्शनकमलदिवाकरोभवतिस्म । तथाच तत्समानकालीनः तत्सहाध्यायी झोपाह्वः श्रीगोवर्द्धनशर्म्मा शब्दशास्त्रधुरंधरः साहीत्यादिशास्त्रभूषणो भवति स्म । एतद्ग्रामीणा जनाः भुशुण्डीखड्गादिशस्त्रमृतेपि लगुडैरेव व्याघ्रादीन् हिंस्रजन्तून् व्यापादयन्ति स्म । एवमनेके गुणिनोजनाः संगीतादिकलाकुशला अत्र भवन्ति स्म । अत्रैव अस्माकं गुरूवराः श्रीमन्तः पूज्यपादा मैथिलश्रोत्रियवंशावतंसा झोपनामका योगदत्तशर्माण इमामेववसतिं स्वावासेन नितरां प्रख्यापयन्ति स्म । इमे आवाल्यात् यथाविधि कर्त्तव्यकर्म्मकलापमनुतिष्ठन्ति स्म । अधीतवन्तश्च शब्दशास्त्रं मीमांसाशास्त्रञ्च निरवशेषमधिगम्य मैथिलमहाराजकीयधौतप्रतिष्ठां सर्व्वत्रसमानासमानजनतायां सत्प्रतिष्ठानिष्ठत्वमवापुः । सत्कर्म्माचरणनितान्तशुद्धस्वान्ता मे गुरवः स्वकीयप्राक्तनपुण्यपुञ्जोदयेन योगमभ्यसन्तो योगयुञ्जानाः सन्तः तीव्रसंवेगसम्पत्त्या द्रागेव योगसाम्राज्यपदवीमधिष्ठाय योगयुक्तत्वमवापुः । ततः ऋतम्भराप्रज्ञाप्रसादात् सर्व्वतन्त्र स्वातन्त्र्यमवासवन्तः एवां गुरूणां लोकोत्तरपाण्डित्यप्रभावं एतत्प्रणीतैतदमृतोपदेश-गीतात्रयप्रकाशिकादिग्रन्थनिर्मितिः सुतरां प्रकाशयत्येव । अणिमादिसिद्धीरन्तरायमूर्त्तीर्मन्वानाः तासु वितृष्णाः सन्तो न लोके सिद्धिलीलामभिनीतवन्तः इमे भगवन्तः पूज्यपादास्तुरीयदशापन्ना एव आसन्निति स्पष्टमनुमीयते । यतोलोकेषु तिष्ठन्तोपि तद्वाग्विलासान् वाह्यवृत्तिरहिताभ्यां श्रवणपुटाभ्यामगृह्णन्तोपि लोकदृष्ट्या गृह्णन्त इव तत्प्रासङ्गिकपृच्छायां सत्यां किमुक्तवन्तो भवन्त इत्येते तान् पृच्छन्तिस्म ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

इमे गुरवः एकदा दरभङ्गाभिधाने पत्तनेऽस्मदनुजायिश्रीमत्त्रिलोकनाथशर्म्मणः संस्थितिप्रदेशे हडाहीत्यभिधानतटप्रान्ते संस्थिता बभूवुः एकस्मिन्दिने अस्माभिः श्रीमत्त्रिलोकनाथशर्म्मणा च समन्विता तत्र आभ्यन्तरगृहकोष्ठिकायामुपविशन्त आसन्।तस्मिन्नेव क्षणे श्रीमद्गुरुवरनेत्रात् काचिदलौकिकी विद्युदाकारा प्रभा वारम्वारं निर्गता सा च श्रीमत्त्रिलोकनाथशर्म्मणा दृष्टा स च तेभ्योविज्ञापयामास भवन्नेत्रनिर्गतां कामपिप्रभां दृष्टवानस्मि। ततस्ते विहसन्तः प्रोचुः चित्चमत्कारः चिर्मिश्चिमायते बुद्ध्यनवगाह्ये भगवतोमहिम्नि अवगाहनमनुपयुक्तमेव एवमेते स्वमहिमप्रख्यातिं गोपयामासुः। प्रायः स्वमहिमगोपनं महात्मनां सहजस्वभावोभवति। अत्रैव स्थाने एकदा एषां पूज्यपादानां वपुषि प्रज्वलज्ज्वलनज्वालीयसन्ताप इव सन्तापोव्यजायत एतन्मनोप्यापन्नक्लमं वैकल्यमवाप। नाड़ीस्पन्दनं सन्निपातकालिकनाड़ीस्पन्दनमिव नितान्तभयङ्करमासीत्। कतिपयहोरापरिमितमात्रसमयव्यापि तादृगवस्थानमुद्भूय पुनः स्वास्थ्यं संसूचयन् नाड़ीसञ्चारमनोमननगात्रसंस्पर्शाद्यानुकूल्यवलितं सौम्यावस्थानमाविर्भूयासम्भावितादृभुतघटनां प्रदर्श्य अस्माकं विस्मयोत्फुल्ललोचनतामगमयत्, अवोधयच्च अघटितघटनापटीयस्त्वं योगभूमेर्व्यक्तम्। प्रोचुरप्येते श्रीमन्तो गुरवः योगिनां मृत्युसन्निधानात्मिका कादाचित्की भूमिरूपस्थीयत इति। एकदा अस्मद्ग्रामवास्तव्यः अस्मदनुयायी श्रीहर्षनाथशर्म्मा अभिनवानि गृहाणि विरचय्य अनुग्रहदृष्ट्या तद्गृहनिरीक्षणार्थमेतान् गुरुवरान् प्रार्थयामास। स च अस्मदीयोजनः श्रीहर्षनाथशर्म्मा स्वकीयदुर्दैवदोषेण निःसन्तान आसीत्। इमे गुरुवरा निसर्गकरुणास्तदीयनिःसन्तानत्वदुःखविद्रावणं मनसि निधाय तेन सार्धं तदीयालयं जग्मुः तदीयप्राङ्गणं प्रविश्य निर्म्मितगृहाण्यवलोक्य प्राङ्गणान्तरालभूमिर्मण्डपमृते नातितरां शोभते इत्युक्तवन्तः स च लज्जावनतवदनः सन्ततिराहित्यसन्तापसन्तप्तोमौनमवलम्ब्य मुखनेत्रादिविकाररूपैरिङ्गितैरेवासन्ततित्वस्थितौ विवाहोपनयनयोरसम्भाव्यमानत्वात् तत्प्रयोजनभूतमण्डपस्य अनुपयोगत्वं व्यञ्जयामास। इमे च गुरुवरा विहसन्तः प्रोचुः। यदि भगवत्प्रसादात् सन्ततिर्भूयात् तदा विवाहोपनयनादिसमये मण्डपप्रयोजनं भविष्यति स च तदानीं गुरुवाक्यामृतमापीयानन्दमन्वभवत्। स्वस्यच सस्त्रीकस्य तारूण्यादिक्रममनुचिन्त्य तदसम्भावनापराभूत इव चाभवत्। परन्तु किञ्चित्कालानन्तरं श्रीमद्गुरु-

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

वरवाक्यप्रसादात् असौ किञ्चिदधिकपञ्चाशद्वर्षवयस्कः तद्भार्य्या च किञ्चिदधिकचत्वारिंशवयस्कापि पुत्रमुखदर्शनानन्दमवापतुः अत्रेदं पद्यं संगच्छते (करोतियन्नापि कपालरेखा करोति तच्चापि वचो गुरूणाम्) एकदा दूरदेशीयः कश्चित् परिव्राजको योगसम्पन्नः श्रीमद्गुरुवरसत्कीर्तिसमाकृष्टः एतदन्तिकमुपगम्य समाध्यवस्थान-दर्शनलालसं सविनयं प्रकाशयामास श्रीमद्गुरुवराःतस्य योगसम्पन्नस्य परिव्राजकस्य दूरदेशादभ्यागतस्य अभ्यागतस्य मनोरथपूर्त्तिमेव कर्त्तव्यताममन्वानास्तस्यमनोरथं परिपूर्य्य तद्विस्मयं जनयाञ्चक्रुःयत्किल गृहाश्रमिणामपि एषां एतादृग् योगसाम्राज्यम् अतयौन्नत्यम्प्रतितिष्ठति श्रीमन्तइमे गुरवः कालयोगात् सञ्जातवृद्धवयस्काः विनोदभावेन अभिनवशरीरकल्पकल्पनायां प्रवृत्ता बभूवुः। तदानीं दृष्टमस्माभिरेत-द्ग्रामीणैरन्यैश्चापि तदानीं तदीयकेशाः चन्द्रधावल्यस्य स्वधावल्येन तिरस्कारिणोपि योगप्रादुर्भूतासितभावेन सम्पन्नाः सन्तः श्यामला लिमालाभिमानमपि सहयन्ति स्म परन्तु पुनरपि किमनेन वासनाम-येन अनात्मकेन शरीरेण संस्थापितेनेति विचारः तददर्शनप्रयोजकः अस्माकं दुर्दैवयोगेन एतदीयचेतस्याविर्बभूव। तत् इमे गुरवः उपा-धिनिर्धूननपुरस्सरमद्वैतस्वरूपां निर्व्वाणपदवीमारुह्य सच्चिदानन्द-स्वरूपकैवल्यप्रतिष्ठायां प्रतितिष्ठन्ति स्म। यद्यपि एषां पूज्यपादानां गुरुवराणां बहूनि पावनानि अद्भुतप्रभावभरितानि जगत्यां जाग्रति परन्तु (अनुक्तमप्यूहति पण्डितोजनः) इत्यभियुक्तोक्तिमनुचिन्त्य अनुस्मृत्य च स्थालीपुलाकन्यायम् एतावदेव एतद्गुणकीर्त्तनम् एतन्म हिमविज्ञापनायालममन्वानैरस्माभिरेतावतैव विरम्यते। एकदा मे पूज्यपादाःमामात्मीयं जनम् अस्मत्प्रणीतममृतोपदेशं ग्रन्थं व्याख्याहि-त्याज्ञापयन्तिस्म। अहञ्च तद्व्याख्यातृत्वयोग्यताराहित्येपि एतदीयामा ज्ञां शिरसि संधार्य्य तदनुकम्पाजन्यशक्तिप्रत्याशयैव व्याचिख्यासुर-भवम्। निष्पन्नञ्च संशयो विषयश्चेति पञ्चलक्षणलक्षितं व्या-ख्यानं निरवशेषं, परन्तु अस्फुटाक्षरमृदुपत्रगता इयम्व्याख्यानलिपिः दैवयोगेन चिरकालपर्य्यन्तं सम्प्राप्तसुषुप्तिस्थितिरिव यथास्थितमति ष्ठत् सा अस्फुटाक्षरालिपिर्दीर्घकालव्याप्त्या अत्यस्फुटाक्षरा अभूत् अक्षराणि च मसीदोषेण लब्धोड्डयनानि बभूवुः। पत्राणि च स्वकीय मार्दवदोषेण प्रस्फुटित्वमवापुः। एवमेषा लिपिरवाचनीयतां गत्वा नष्ट-प्राया अभूत् अस्मांश्चास्मदनुयायी मैथिलः श्रीमान् त्रिलोकनाथशर्म्मा

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

अस्यालिपे रुज्जीवनं वारंवारम्प्रार्थयामास । ततः श्रीवलभद्रदासो ब्रह्मचारी अस्मदनुयायी जनः अ .याः लिपेः पुनर्लेखने सोत्साहं प्रवृत्तः परन्तु दुर्दैवयोगेनायमस्वास्थ्यमवाप्य प्रतिहतमनोरथोजातः । ततः वाराबङ्कीटप्रान्तर्गतपुरनिया ग्रामवास्तव्यः कान्यकुब्जवंशावतंसः तिपाठ्युपाह्व श्रीश्यामविहारीशर्म्मा त्रिपाठी अस्मच्छुश्रूषुर्जनः लेखनायासपरिश्रमं स्वीकृत्य अस्मिन् पुनर्लेखने प्रवृत्तः श्रीमद्भगवत्कृपया इयं लिपिः पुनर्लेखमवाप्य उज्जीविता बभूव । एतद्ग्रन्थोज्जीवनहेतुत्वेन अयं च त्रिपाठी अस्मद्धन्यवादास्पदं बभूव । अनेकराजकीयोपाधिविभूषितस्य श्रीलश्रीलक्ष्मीश्वरसिंहस्य मिथिलामहीमण्डलमण्डनस्य महाराजस्य अधिगताकुण्ठितविकुण्ठस्थानस्य सत्कीर्त्तिमुद्दीपयन्ती अपरिमितश्रीमतीश्रीलक्ष्मीवती समभिधाना ज्यायसीधर्म्मपत्नी संसारासारतां सुविचार्य्य सबान्धवास्वास्पदं विहाय साम्बसदाशिवचरणौ सेवमाना काश्यां निवसति । एषा श्रीमती सम्प्रत्यत्र वसतिं स्वीकृत्य अपरान्नपूर्णेव स्वदेशीयान् विदेशीयांश्च जनानन्नैर्वस्त्रादिभिश्च पूरयति एषा श्रीमती युगपदेव लोकसंग्रहार्थं कर्म्मकलापमुपासासन्ततिञ्च व्यवहरन्ती योगसाक्षात्कृतानन्दमनुभवति । अनेकाध्यात्मशास्त्रश्रवणानुचिन्तनजनिताद्वैतात्मज्ञानविभवेन समस्तं चिदचिदात्मकं जगज्जातं साक्षात् ब्रह्मैवपश्यति । दीनानङ्गहीनान् जराजीर्णान् विषयवितृष्णांश्च जनान् तदर्थनियतपाचकपाचितान्नैर्यथेच्छं भोजयित्वा सन्तर्पयति । यथावसरं वस्त्रादींश्च वितरति । प्रतिमासं कतिपयसंख्यया नियतमनियतमर्थं वितीर्य्य दीनानां स्वाश्रितानां जनानां शरीरयात्रां लोकयात्रामपि च निर्व्वाहयति । वयमपि एतस्या एव श्रीमत्याः सानुकम्पदृशा लब्धजीविका भवामः । अनेक पाठशालास्थापनदेवताप्रतिष्ठापनदेवतामन्दिरतडागकूपनिर्म्माणादिरूपा अस्याः श्रीमत्याः कीर्त्तिपताका स्वकीयप्रभया दिशोव्याप्नोति । एषा श्रीमती पूज्यपादेभ्योनिरूक्तगुरुवरेभ्योराजयोगोपदेशं प्राप्य तदभ्यासपरायणतया कृतकृत्यतामनुभवति । नास्माकमल्पमतीनां भारती श्रीमतीकीर्त्तिकलापं कीर्तयन्ती तदपरिमेयगुणगणानां पारं प्राप्नुयादित्यलं बहूक्त्या इतिमन्वानैरस्माभिरेतावतैव विरम्यते उपहारात्मिकामिमाङ्कृतिम् अनेकानेकश्रीमत्याः संस्तुतायाः श्रीमहाराज्ञ्याः पुरस्तात् समर्प्य प्रमोदमावहामः । आशास्यते च श्रीमती कृपादृष्ट्या एनमुपहारं स्वीकृत्य अस्माकं कृतार्थीकुर्य्यादिति शम् ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

ॐ श्रीगणेशाय नमः ॥

ॐ श्री श्रीगुरवे नमः ॥

ॐ श्रीपरदेवतायै नमः ॥

अथामृतोपदेशः ॥१।१।१॥

अथेत्यव्ययम् शश्वदेकरूपेणापरिणतं सद्विद्यमानं कारकविभक्त्यादिभिर्हेतुभिर्यत्स्वरूपन्नव्येति तदव्ययम् । आत्मन्यपि प्रसिद्धोऽव्ययशब्दः तस्यापि शश्वदेकरसत्वमविद्योपाधिकविभागैरविकृतत्वं प्रसिद्धमेव । नन्वात्मनआकाशः सम्भूतः' 'यतोवा इमानि भूतानि जायन्ते' इत्यादिश्रुतिभिर्ब्रह्मणोजगत्कारणत्वश्रवणात् तस्मिन् जगदाकारेण परिणते सति विकारोपपत्तौ नाविकृतत्वमिति चेन्न ब्रह्मणोजगत्कार्य्यं प्रति विवर्त्तकारणत्वादितिवेदितव्यम् । न परिणामिकारणत्वम् । विवर्त्तकारणत्वमधिष्ठाने स्वरूपेण स्थितेऽपि अन्यथाभानम् यथा रज्जौ स्वस्वरूपावस्थानेऽपि सर्पाकारेण प्रतीतिः यथा रज्जुयाथात्म्यसंदर्शनेन सर्पप्रतीतिविलयपूर्वकमधिष्ठानरज्जुस्वरूपावस्थानं तथा ब्रह्मसाक्षात्कारेण जगदत्यन्तनिवृत्तिपूर्वकमधिष्ठानब्रह्मस्वरूपमात्रावस्थानम् परमात्मनोजगदनन्यत्वं वेदितव्यम् । "वाचारम्भणं विकारोनामधेयं मृत्तिकेत्येवसत्यम्" इत्यादि श्रुतेः एवमुक्तप्रकारेण जगत्कारणत्वेऽपि ब्रह्मणो विकारित्वं निरस्तम् । परिणामिकारणत्वम् कारणस्य स्वस्वरूपप्रच्युतिपूर्वकं कार्य्याकारेण परिणतत्वम् समसत्ताककार्य्यवत्वम् तात्विकान्यथात्वमितियावत् यथा स्वरूपप्रच्युतं दुग्धं दध्याकारेण परिणमते तथा च स्मरणम् "सतत्वतोऽन्यथा प्रथा विकार इत्युदाहृतः । अतत्वतोऽन्यथा प्रथा विवर्त्त इत्युदाहृतः" इति । अध्यासादन्यथाभानं विवर्त्तत्वम् । अध्यासः अन्यत्रदृष्टस्य अन्यत्रान्यज्ञानेन भानम् स्मृतिरूपः परत्रपूर्वदृष्टावभासः पूर्वादृष्टजगतोऽवभासासम्भवात् स्मृतिरूपायोगाच्च । जगतोऽध्यासरूपत्वानुपपत्तिरितिचेन्न पूर्वपूर्वकल्पदृष्टजगदवभासः स्मृतिरूपः अपरापरकल्पजगदध्यासरूप इति वेदितव्यम् । अत्र नानवस्थादोषप्रसङ्गः शास्त्रसिद्धजगदनादित्वात् बीजाङ्कुरन्यायोचव । अत्र प्रसङ्गवशादव्ययात्मस्वरूपमुपपादितम् । प्रकृतञ्चोपपाद्यते-अत्राथशब्दोऽधिकारार्थः परिगृह्यते नानन्त-

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

थ्यार्थः पूर्वप्रकृतानपेक्षत्वात् फलस्य आनन्तर्य्यातिरेकात्। फलस्यामृतोपदेशस्य पूर्वमर्थविशेषः प्रकृतोनास्ति। यस्मात्तस्य अर्थान्तरत्वमथशब्देन उच्येत। यथा धर्मोपदेशः पूर्ववृत्तं श्रुतिपठनम् नियमेनापेक्षते नैवम् अमृतोपदेशः किमपि पूर्ववृत्तमपेक्षते। अत्र अमृतोपदेशे मुख्यतया योगशास्त्रे नियममनपेक्ष्य सर्वेषामधिकारात् "ब्राह्मणक्षत्रियविशां स्त्रीशूद्राणाञ्च पावनम्। शान्तये कर्म्मणामन्यद्योगान्नास्ति विमुक्तये" इत्यादिपुराणवाक्येन प्राणिमात्रस्य योगाधिकार उपलभ्यते। परन्तु सिद्धौ अल्पकालानल्पकालतारतम्यम् क्षेत्रसंस्काराभ्यासतारतम्यानुकूलं वेदितव्यम्। अन्यार्थप्रयुक्त एवहि अथशब्दः श्रवणान्मङ्गलप्रदो भवति "ओङ्कारश्चाथशब्दश्च द्वावेव ब्रह्मणःपुरा। कण्ठं भित्वाविनिर्जातौतस्मान्मांगलिकावुभौ" इतिस्मरणात् शङ्खवीणादिनादश्रवणवदोङ्काराथशब्दयोः श्रवणं मङ्गलफलकम् भवति। अमृतोपदेशोनाम शास्त्रमधिकृतं वेदितव्यम्। अमृतं कैवल्यम् "मुक्तिः कैवल्यनिर्वाणश्रेयोनिःश्रेयसामृतम्" इतिकोषात्। अमृतं मृत्युप्रतिद्वन्द्विपदार्थः केवलस्यभावः कैवल्यम्। सत्यां बुद्धिसत्वशुद्धिनिरुद्धरजस्तमोमलत्वात्प्रकृतिपुरुषान्यताख्यातावुदितायाम् अशेषक्लेषबीजे दग्धे सति बुद्धिरनिन्धनवह्निवत् शाम्यति पुरुषस्य शुद्धिसारूप्यमिवापन्ना भवति। तत्र पुरुषशुद्धिर्नाम तदुपचरितभोगराहित्यम्। तदात्मनः कैवल्यं भवति। आत्मा स्वरूपमात्रज्योतिरमलः केवली भवतीतिमात्रः। तदा द्रष्टुः स्वरूपेऽवस्थानं भवति। तदाक्लेशाभावात्कर्म्मविपाकाभावश्च भवति। तत्र सत्वरजस्तमोगुणा न दृश्यन्ते नोपतिष्ठन्ति तेष्ववस्तुत्वनिश्चयात्। द्रष्टृदृश्यसम्पर्कायोगाच्च। तदा पुरुषप्रपञ्चामिश्रीभावाभ्युपगमात्। यद्यपि प्रारब्धावशेषे सति जीवद्दशायां संसृतौ पुनः प्रत्यावर्त्तनम्भवति तथापि "एकमेवदर्शनम्" इति सूत्रात् "या निशा सर्वभूतानां तस्यां जागर्ति संयमी। यस्यां जाग्रति भूतानि सा निशा पश्यतोमुनेः" इतिस्मरणाच्च। अयथापूर्वं तूर्य्यस्थितिसदृश्येव संसारस्थितिर्भवतीति सिद्धम्। "सत्वपुरुषयोः शुद्धिसाम्ये कैवल्यम्" इतिसूत्रात्। अहम्ममाभिमानोत्थैः कामलोभादिभिर्मलैः। वीतं यदा मनः शुद्धमदुःखमसुखं समम्॥ तदा पुरुष आत्मानं केवलं प्रकृतेः परं। निरन्तरं स्वयं ज्योतिरणिमानमखण्डितम्॥ ज्ञानवैराग्ययुक्तेन भक्तियुक्तेन चात्मना। परिपश्यत्युदासीनं प्रकृतिञ्च हतौजसम्॥ इतिपुराणवाक्यादप्युक्तसिद्धिरितिवेदितव्यम्। यद्यप्यमृतशब्दः पीयूषे प्रसिद्धः "पीयूषममृतं

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

मृसुधा" इतिकोषात्। प्रसिद्धञ्च तत्पायिनाममरत्वम् "अपाम सोम अमृताअभूम" इत्यादिश्रुतिरपि श्रूयते। सोमयाजिनामपि कृत्रिमदेवानाममरत्वमुपपद्यते "अमरा निर्जरा देवा" इतिकोषादप्युक्तसिद्धिः तस्माद्भवत्वमृतशब्दः पीयूषवाचकः न कैवल्यवाचक इतिचेन्न "सदेवसोम्येदमग्र आसीत्" इतिश्रुतेः। प्रलयकाले सद्रूपानुमात्रास्तित्वश्रवणात् एवकारेण तदन्यस्याखिलप्रपञ्चस्य असत्तासूचनाच्च "यत्प्रयान्त्यभिसंविशन्ति" इत्यादिश्रुत्या तदन्यभूतानां तस्मिन् लयश्रवणात् पुराणादौ चतुराननब्रह्मणः एकस्मिन् दिने चतुर्दशेन्द्रविनाशाभ्युपगमात् न देवानां वास्तवममरत्वमितिवेद्यम्। किन्तु चिरकालस्थायित्वं मन्तव्यम् "आभूतसंप्लवस्थानममृतत्वं हिभाष्यते" इतिस्मरणात्। अमृताय उपदेशः अमृतोपदेशः निमित्तचतुर्थी। अमृतं कैवल्यमवगमयति प्रापयति उपदेश इति यावत्। साधन स्वरूपप्रमाणप्रतिबन्धकसहिताय अमृताय उपदेश इतिवेद्यम्। साधनादिरहितामृतोपदेशे सर्वांशज्ञानानुपपत्तिः तदनुपपत्तौ तदप्राप्तिप्रसक्तिः उपदेशः प्राथमिकज्ञानम्। अमृतोपदेशः मोक्षाय प्राथमिकज्ञानम् अधिकृतमित्यर्थः। बद्धमुमुक्षुमुक्तप्रभेदात् पुरुषत्रैविध्यम्। बद्धः संसारी संसारनिगडबन्धनगतः विषयासक्त इतियावत्। पूर्वापरसंचितपुण्यपुञ्जोदयेन तापत्रयदंदह्यमानः विषयनिर्वेदमनाः संसारनिगडादात्मानं मोक्तुमिच्छुः प्रथमज्ञानभूमिकारूढोमुमुक्षुः। ज्ञानभूमिका उक्ता योगवाशिष्ठे "ज्ञानभूमिः शुभेच्छाख्या प्रथमा समुदाहृता। विचारणा द्वितीया स्यात् तृतीया तनुमानसा॥ सत्त्वापत्तिश्चतुर्थीस्यात् ततोऽसंसक्तनामिका। अपरार्थभाविनी षष्ठी सप्तमीतुर्यगा स्मृता॥ इति बन्धनरहितः कैवल्यस्वस्वरूपस्थितोमुक्तः एतत्त्रयान्तर्वर्त्तिमुमुक्षु पुरुषोऽत्राधिकारी वैराग्यादियोग्यतातारतम्यवत्त्वेनाधिकारिणामुत्तमत्व मध्यमत्वाधमत्वानि वेदितव्यानि। अत्रामृतं विषयः तज्ज्ञानञ्च प्रयोजनम् साधनसाध्यसम्बन्धश्च वेदितव्यः। ज्ञानमोक्षयोः साधनसाध्यधर्म्मत्वात् कथं प्रसिद्धम् प्रयोजनरूपं परमपुरुषार्थभूतं मोक्षमन्तरा ज्ञानस्य प्रयोजनत्वमिति प्रष्टव्ये प्रतिवचनम्। अत्र ग्रन्थे अमृतं संसृतिनिवृत्तिः तद्धेतुरविद्येत्यादि तत्साधनं योगसाङ्ख्यमित्यादि सूचितत्वात्। स्वरूपप्रतिबन्धकसाधनसहितमोक्षस्य प्रतिपादितत्वात् "कैवल्यं केवलं ज्ञानम्" इत्यादि "सर्वेहोपरति स्तनुः" इत्यादिवचनैरेतस्यैव स्वरूपावस्थितिरुपस्य दैहिकवाचिकमानसक्रियाराहित्यरुपस्य मोक्षस्वरूपस्याक्रियस्य ब्रह्मणोरूपत्वस्मर-

२

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

णात् अत्र ग्रन्थे "तद्धि आत्मनोरूपम्" इति सूत्रितत्वात् जीवब्रह्मणोरेकत्वावगमात् ब्रह्मस्वरूपस्यैव तत्त्वमस्यादिवाक्यसिद्धस्य परापरात्मनोरैक्यरूपस्य अमृतपदवाच्यमोक्षस्य एतच्छास्त्रोक्तस्य विषयत्वमुपपन्नम् "यतितव्यं तद्विज्ञाने"इत्यत्रत्यसूत्रात् ज्ञानस्यैव प्रयोजनत्वमुपपन्नं वेदितव्यम् शास्त्रं प्रयोजनवत् बन्धनिवर्त्तकज्ञानहेतुत्वात् ज्ञानस्य स्वतः प्रयोजनत्वासंभवेऽपि प्रमातृत्वकर्त्तृत्वभोक्तृत्वात्मकानर्थनिवर्त्तकत्वेनैव प्रयोजनत्वम् वक्तव्यम् । भवति च व्यवहारः ज्ञात्वा इच्छति यतत इति च अप्रतिपित्सितार्थप्रतिपादकोऽनादर्त्तव्यवचनोभवति । किमत्र मोक्षः प्रतिपित्सितोऽप्रतिपित्सितोवा "मानभूवं हि भूयांसम्" इति श्रवणात् सर्वप्राणिप्रसिद्धमृत्यनङ्गीकारावगमात् सर्वेषाममृतपदवाच्यस्य मोक्षस्य प्रतिपित्सितमुपपन्नं भवति । सत्सु मुक्तिमोक्षकैवल्यनिर्वाणादिषु लोकवेदप्रसिद्धपरमपुरुषार्थवाचकेषु कथमनतिप्रसिद्धः अमृतशब्दोऽत्र प्रयुज्यत इत्युच्यते मरणात् सर्वजनीनभयप्रसिद्धेः "स्वरसवाही विदुषोऽपि तथारूढोऽभिनिवेशः" इति सूत्राच्च मरणात्राणं सर्वेषामभीष्टं भवितुमर्हति अमृतशब्दस्य मरणप्रतिद्वन्द्विरूपस्य श्रवणादेव सर्वेषां मुमुक्षुजनानां झटिति प्रवृत्तिहेतुत्वादत्र श्रीमान् सूत्रकारः अमृतशब्दं प्रयुक्तवान् इतिवेद्यम् । अमृतं बालभाषणमित्यादिलोकोक्त्या घृताद्यतिस्वादुवस्तुनि अमृतशब्दप्रयोगोव्यवहारसिद्धः तथात्र प्रेष्ठत्वद्योतनोऽप्यमृतशब्दोवेदितव्यः । अर्थधर्मकाममोक्षपुरुषार्थचतुष्टयमध्ये कथं मोक्षस्यैव परमपुरुषार्थत्वमिति प्रश्ने प्रतिवचनम् । योगक्षेमसचिवानर्थबाहुल्यादर्थस्य न परमपुरुषार्थत्वम् "अर्थस्य साधने सिद्धे उत्कर्षे रक्षणे व्यये । नाशोपभोग आयासस्त्रासश्चिन्ता भ्रमोनृणाम् । स्तेयं हिंसाऽनृतं दम्भः कामः स्मयो मदः । भेदोवैरमविश्वासः संस्पर्धा व्यसनानि च । एते पञ्चदशानर्था अर्थमूला मता नृणाम्" इति स्मरणात् । धर्मेभोगस्यावश्यं भावित्वात् तदुत्थवासनाजन्यभोगायतनबीजत्वात् सति भोगायतने कर्मप्रसवितृत्याच्च दुर्निवारसंसारचक्रप्रसङ्गात् धर्मेण सत्यपि स्वर्गाद्यमुत्रफललाभे "दृष्टवदानुश्रविकः स ह्यविशुद्धिक्षयातिशययुक्तः" इत्यादि स्मरणात् न परमपुरुषार्थत्वं धर्मस्य । कामस्य कामनापदवाच्यस्य लक्षणया भोग्यपदार्थस्य रागजन्यवासनाभूमित्वात् आगमापायित्वेनानित्यत्वात् "न जातु कामःकामनामुपभोग्येन शाम्यति । हविषा कृष्णवर्त्मेव भूय एवाभिवर्धते" "मात्रास्पर्शास्तु कौन्तेय" "नासतोविद्यते

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

भावः" इत्यादि स्मरणात् न परमपुरुषार्थत्वं कामस्य। अवशेषादुक्तलक्षणमोक्षस्यैव परमपुरुषार्थत्वमिति वेदितव्यम्। "योवै भूमा तदमृतम्" इतिश्रुत्या अमृतशब्दस्य ब्रह्मवाचकत्वात् अमृतोपदेश इत्यत्र ब्रह्मण उपदेश इति कथं न, यद्यपि एतादृशेऽपि व्याख्याने, न दृश्यते कापि हानिः तथापि अत्र ग्रन्थे सूत्रकारेण अध्यायतृतयेन वेदान्तयोगसाङ्ख्यानां प्रतिपादितत्वात् न केवलवेदान्तप्रतिपाद्यब्रह्मण उपदेश इति युक्तम्। कैवल्यस्य तु सर्वत्र प्रतिपादितत्वात् युक्तमेव अमृताय कैवल्याय उपदेश इति व्याख्यानम्। बोधवाचकयोर्ज्ञानोपदेशशब्दयोःसतोर्ज्ञानस्य प्रसिद्धेरितरस्याप्रसिद्धेः कथं ज्ञानशब्दम नादृत्य उपदेशशब्दः प्रयुक्त इति प्रश्ने प्रतिवचनम्। उपदेशशब्देनैव उपदेष्टृगुरुमुखोच्चरितत्वावगमात् साधनभूतशमदमादिषट्सम्पदन्तर्वर्तिश्रद्धाशब्दस्य गुरुशास्त्रवाक्येषु विश्वास इति स्वीकारात् श्रद्धानानामधिकारिणाम्प्रमाणमनपेक्ष्यैवात्र ग्रन्थे प्रतीतिर्जायतामितिउपदेशशब्दः प्रयुक्त इति वेदितव्ययम्। यद्यप्यत्र व्याख्यायाम् आक्षेपसमाधानादिः ग्रन्थविस्तारभिया विस्तरेण नाधायि तथापि "पदच्छेदः पदार्थोक्तिः विग्रहः पदयोजना। आक्षेपश्च समाधानम्व्याख्यानम्पञ्चलक्षणम्" ॥ इत्युक्त्यनुरोधात् तान्यपि संक्षेपात्स्त्रीक्रियन्त इतिवेदितव्यम्। अपि च गुर्व्वनुसन्धिनिवन्धनोपदेशशब्दश्रवणात् गुरुशुश्रूषणाद्यनुसन्धिनिष्पत्तिप्रयोजकोऽप्युपदेशशब्दप्रयोगोवेदितव्यः। "समित्पाणिः श्रोत्रियम्ब्रह्मनिष्ठं गुरुमुपेयात्" इतिश्रवणात्। "यथा खनन् खनित्रेण नरोवार्य्यधिगच्छति। तथा गुरुगताम्विद्यां शुश्रूषुरधिगच्छति" "उपदेक्ष्यन्ति ते ज्ञानं ज्ञानिनस्तत्वदर्शिनः" इत्यादिस्मरणात्। "गुरुशुश्रूषणादविलम्वः" इत्यत्र सूत्रितत्वाच्च गुरुशुश्रूषणादि विधेयत्वव्यञ्जकत्वादुपपन्नः। उपदेशप्रयोग इति च वेदितव्यम्। उपदेशशब्दोगुरुं शिष्यं तदितिकर्त्तव्यताविधि मासमग्निहोत्रं जुहोति अत्रत्याग्निहोत्रशब्देन अग्निहोत्रीयहवनादीतिकर्तव्याताविदेशवत् नास्नातिदिशति इति वेदितव्यम् ॥१॥१॥१॥ अमृतं ज्ञातव्यमित्युक्तम् किंलक्षणम्पुनस्तदमृतमित्यत आह श्रीमान् गुरुवरः सूत्रकारः।

अमृतम् संसृतिनिवृत्तिः ॥ १ ॥ १ ॥ २ ॥

यस्यैवामृतशब्दस्य प्रथमसूत्रे विवृतिः सूत्रकारस्वरसानुसारिणी सूत्रकारगुरुवरचरणारविन्दमकरन्दलिड्भिरस्माभिर्यथामति प्रतिपादिता शिष्यानुकम्पिना श्रीमता गुरुवरेण सूत्रकारेणाऽस्मिन्सूत्रे तदे-

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

वामृतशब्दो हस्तामलकवत् विशदीक्रियते एकेनैव वाक्येन यौगपद्येनैव स्वरूपलक्षणतटस्थलक्षणाभ्यां लक्ष्यममृतं लक्ष्यते । किमिदममृतं नामेति संसृतिनिवृत्तिः संसृते निवृत्तिः निवारणम्प्रशान्तिरूपावस्थितिरिति अत्र षष्ठीतत्पुरुषः इदं स्वरूपलक्षणम्वेद्यम् संसृतेर्निवृत्तिर्यत इति अन्यपदार्थप्रधानोबहुव्रीहिः इदं तटस्थलक्षणम्बोध्यम् । संसृतिः सम्यक्सरणम् अनयेति संसार इतियावत् । विक्षेपशक्तिमन्निरवयव, निर्गुण, निराकार, निराश्रय, निष्कारण, निरन्तर निरवद्य, निरपेक्ष, निराकाङ्क्ष निरञ्जन, पुरञ्जनसख, क्षराक्षरविलक्षण, सलक्षणालक्षण, परोक्षापरोक्ष, वक्तव्यावक्तव्य, विकृताविकृत, जगज्जन्मस्थितिभङ्गभूम्यनाद्यनन्त, सच्चिदानन्द, प्रत्यगात्म, सर्व्वज्ञ, सर्व्वकारण, सर्व्वप्रेरक, सर्व्वाऽधिष्ठान, सर्व्वाऽधिपति, स्वायत्तप्रकृत्युपाधि निराधि, निर्व्याधि, नित्यसमाधि, स्वसम्वेद्यात्मज्योतिः, क्लेशकर्म्मविपाकाशयापरामृष्ट, पुरुषोत्तम, निवृत्तबुद्धयवस्थान, विगतान्यदर्शन, भगवत्सर्व्वेश्वरकार्य्यम्, आवरणशक्तिमत्तिरोहितविस्मृतात्मस्वरूप प्रकृतिपराधीन बुद्धिप्रतिफलित चिदाभास चिदध्यस्तप्रपञ्चोपाधि यास्कपठितजन्मास्तित्व वृद्ध्यपक्षयविपरिणाममरणाभिधषड्विकारापन्न कर्तृभोक्तृत्वाद्यनर्थव्रातक्लेशकर्म्मविपाकाशयपरामृष्ट देहाद्यभिमानि निरोधप्रपञ्चागाधपारावारपतित सजातीयप्रत्ययविस्मरणपूर्व्वकविजातीयप्रत्ययप्रवाहनिमग्नाल्पज्ञ दुरवस्थजीवभोग्यः संसारः नित्यशुद्धबुद्धस्वभाव पुरुषप्रतिरूपानात्मगुणाभिमानि पुरुषोपभोग्यचेतनसन्निधानलब्धचैतन्य प्रकृत्युपादानीभूतानादिप्रवाहपतितजगद्वैचित्र्यसचिव सुखदुःखनिमित्तीभूत वीजाङ्कुरादिन्यायप्राप्त क्रमसञ्जात कर्म्मत्रितयनिचयसचिवाविद्याजनितास्मितारागद्वेषाभिनिवेशरूपानादिवासनावासितसंस्कारानुरूपचिदारूढव्यवह्रियमाणपदार्थसंघातसचिवधर्म्माधर्म्मोन्मुख प्रवृत्तिप्रवाहावलम्बिस्वाज्ञानाकारं जगदिति । यथा एकैव योषित् पितृजन्या भर्तृभोग्या च पुत्री पत्नी स्नुषा ननन्दा यातेत्यादि पितृपत्याद्यनेकप्रतियोगिधिया स्वरूपतोऽभिन्नैव भिद्यते तथा संसार एकरूपः ईश्वरकार्य्यत्वेन जीवभोग्यत्वेन च ईश्वर जीव प्रतियोगिधिया भिद्यते संसारस्य ईश्वरकार्य्यत्वप्रतिपादनेन सत्वमुपपद्यते तन्न सम्भवति "योवै भूमा तदमृतम् ततोऽन्यदार्त्तम्" इत्यादिश्रवणात् "नासतोविद्यते भावः" इत्यादिस्मरणाच्च तदुच्यते

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

संसारकार्य्यं कारणाद्भिन्नं भिन्नम्वा नाद्यः पक्षः ईश्वरात् संसार इति अपादाननिर्देशात् भेदप्रतीतेरभेदानुपपत्तेः । द्वितीयपक्षाभ्युपगम इष्टापत्तिः संसारसत्त्वव्याहतेः तथात्वेसंसारः धर्म्मी साध्योधर्म्मः सत्त्वम् तदुत्पन्नत्वम् हेतुः । यद्यत उत्पन्नं तत्तदात्मकं यथा मृदुत्पन्नो घटोमृदात्मक इति व्याप्तिव्यभिचारोन शङ्क्यः पितृपुत्रादिषु कुलाल-कलशादिषु भेददर्शनादुक्तव्यभिचारशङ्काऽपि प्रत्याख्यातैव वेदितव्या। ननु तदुत्पन्नत्वं नाम तदुपादानत्वम् न तन्निमित्तत्वम् पित्रादेः पुत्रादि-कार्य्यम्प्रति निमित्तकारणत्वात् "जन्माद्यस्य यतः" इतिवेदान्तसूत्रात् "जगतो यदुपादानं-मायामादाय तामसीम्" इत्युक्तेश्च वेदान्तिभि-रीश्वरस्य जगत्कार्य्यम्प्रत्युपादानकारणत्व स्वीकारात् दृष्टान्तदार्ष्टान्ति-कविरोधात् उक्तव्यभिचारशङ्का सुस्थैवेति चेन्न गुणोपादानस्यापि फणिनो न गुणत्वम् किन्त्वसत्त्वमेव अन्यथा घटादिवद्बाधप्रसक्तिः प्रसज्येत । ननु न केवलोगुणः फणिन उपादानम् किन्त्वज्ञानयुक्तः ततो युक्तमेवासत्त्वं फणिन इति चेत्तदुच्यते मायायुक्त एवेश्वरोऽपि जग-त्कारणम् ततोयुक्तमेवासत्त्वम् पुनर्जगतो व्यभिचारशङ्कानिरस्तैवेति वेद्यम् । ननु जगतो धर्म्माधर्म्म सुखदुःखादि क्रियार्थकारित्वेन कथं न सत्त्वसिद्धिर्न यदेवं न तदेवं यथाशुक्तिरजतमितिचेत्तत्रोच्यते अविद्या-रूप भ्रमस्यैव क्रियार्थकारित्वम् नाम व्यवहारसाधनत्वम् धर्म्माधर्म्म-सुखदुःखादि निष्पादनत्वमित्यर्थः। कूटकार्षापणादिनापि व्यवहारदर्श-नात् । नन्वेकत्र सद्वस्तुनोऽन्यत्राध्यासोभ्रमः प्रसिद्धः अत्यन्तासत्त्वे कथम्प्रपञ्चभ्रमः स्यात् सत्त्वे च वेदान्तानभिप्रेतद्वैतप्रसक्तिः उक्तञ्च भट्टैः "अध्यस्यते खपुष्पत्वमसत्कथमवस्तुनि। प्रज्ञातगुणसत्ताकमध्या-रोप्येत वा न वा" अत्रोच्यते संस्कारजन्योभ्रमःसंस्कारनिष्पत्तये प्राक् प्रत्ययमात्रमपेक्षते न वस्तु सत्त्वम् "सर्वं खल्विदं ब्रह्म" इति ब्रह्मा-व्यतिरेकत्वदर्शनात् वस्तुसत्त्वाभावेऽपि जगदनादित्वसिद्धप्रत्ययाना-दित्वात् प्राक्प्रत्ययनिष्पन्नसंस्कारसंजातप्रपञ्चभ्रमः उत्तरोत्तरसंस्कार-प्रत्ययनिष्पन्न संजातप्रपञ्चभ्रमसुत्पादयिष्यति अन्धपरम्परान्यायेन व्यवहारः सेत्स्यतीत्यर्थः । कथं विश्वभुवनलोकादि प्रसिद्धसंसार पर्य्यायाग्रहणपूर्वकमप्रसिद्धसंसृतिशब्दं गृह्णाति सूत्रकार इत्याक्षेपे समाधानम् पौनःपुन्यपुरस्सरजन्ममरणादिजनितनानादुःखसंतति-निबन्धनयोन्यन्तरलोकान्तरपरिभ्रमणसूचकसंसृतिशब्दश्रवणमुमुक्षू-णामधिकारिणामुद्वेगद्वेषसन्तापनिर्वेदान् जनयन् तानधिकारिणः

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

शास्त्रे द्रुतं प्रवर्त्तयतु इत्याशयवता सूत्रकृता अव्यवहितोत्तरोक्त-निवृत्तिशब्दसहितसंसृतिशब्दः प्रयुक्त इतिवेद्यम् । संसृतिनिवृत्ति शब्दध्वनितात्यन्तिकदुःखाभावानुरूपनिस्सत्त्वनिरानन्दावस्थानव्याव-र्त्तनाय स्फुरितस्वरूपप्रतिपत्तिकैवल्यपर्य्यायमुक्तिप्रभृतिशब्दावग-तिपुरस्सरंनिरवधिसुखनीरधिप्रतिमःसंशुद्धबुद्धरुपः रसनास्वादनवि-षयः संसृतिनिवृत्तिशब्दोद्देशविधेयः अमृतशब्दः प्रयुक्त इति च वेद्यम् ।

प्रथमसूत्रोल्लिखिताभिधानमात्रस्यामृतशब्दस्य लक्षणप्रदर्शनायात्र पुनः प्रयोग इति तु सुस्पष्टमेव । कथं संसृतेः ईश्वरकार्य्यत्वम् न साङ्ख्यपरिकल्पितप्रधानकार्य्यत्वमित्युच्यते श्रुतिप्रतिपादितेक्षा-पूर्वकसृष्टिसर्ज्जनोपलब्धेः "सदेव सोम्येदमग्र आसीत्" "एकमेवा-द्वितीयम्""तदैक्षत बहु स्यां प्रजायेय""तत्तेजोऽसृजत्"इत्यादिश्रुतिभ्यः जगतः अद्वितीयेश्वरकार्य्यत्वमुपपद्यते । अचेतनम् स्वतन्त्रं चेतन-कर्त्तृकावलोकनकृत्ययोग्यतानापन्नं प्रधानं न जगतः कारणं भवितु-मर्हति अचेतनस्य प्रधानस्य ब्रह्मेन्द्ररेशेश्वरवत् सृष्टिस्थित्यन्तकार-णत्वं कापिलमतं हास्यास्पदमेव प्रतिभाति ।

यद्यपि वत्सविवृद्धिनिमित्तमचेतनस्य तृणस्य दुग्धोत्पादन-सादृश्येन जडस्यापि प्रधानस्य जगतः कारणत्वं कापिलैरभ्युपगम्यते तत्र करुणावरुणालयस्य जगदीश्वरस्य करुणैव चमत्कृतिरूपा वत्स्य-विवृद्धये तृणाद्दुग्धमुत्पादयतीति वेदान्तिभिरास्तिकैः स्वीक्रियते न तच्चित्रं भगवति ईक्षणमात्रेणैव सृष्टिस्थित्यन्तकर्त्तरि परमेश्वर इति-वेद्यम् । एवं प्रधानवादः प्रत्याख्यातः ।

पुनः शङ्कोत्थानम्भवति कणभक्षमतानुसारेण परमाणुकारणं संसारस्येति परन्तु विचार्य्यतामत्र कणभक्षस्यायमभ्युपगमः । संकल्प पदार्थात्सूक्ष्मतमोनिरवयवोऽर्थः परमाणुः । एकस्मिन्निरवयवे परमाणौ अन्यस्य निरवयवस्य परमाणोर्मेलन मीश्वरानुमत्या भवति ततोद्वयणु-कादिक्रमतो ब्रह्माण्डमुत्पद्यते तत्र तत्किं सर्वांशगतं भवति किमुतै-कांशगतम्। तत्र नाद्यःसर्वांशमेलने तयोः परमाण्वोः परस्परं लीनत्व-सम्भावात् संसारस्याणुत्वविमोक्षानुपपत्तौ ब्रह्माण्डरचनानुपपत्तेः । न द्वितीयः कणभक्षसम्मतनिरवयवत्वप्रतिज्ञाभङ्गप्रसङ्गात् तदेकांशापे-क्षया तत्परमाणोः स्थौल्यप्रसक्तसूक्ष्मतमत्वसिद्धान्तभङ्गाच्च अवयव-स्याप्यवयवकल्पनया पुनः पुनः पूर्वोक्तदोषप्रसङ्गः अनवस्थाप्रसङ्गश्च

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

उभयोरनन्तावयवत्वप्रसक्तेः मेरुकनीनिकांशयोः समताप्रसङ्गश्च एवं कणादाभिमत परमाणुकारणवादोनिराकृत इति वेदितव्यम्। अपर प्रतिवादिमतान्यपि निराकृतान्येवेति वेदितव्यम्। प्रधानमल्लविजये-नैवाप्रधानमल्लविजयन्यायात्। अपि च संसारस्य जीवभोग्यत्व-प्रतिपादनेन व्यापकस्य सर्वगतस्य गगनोपमस्य सर्वप्राणिहर्दस्य चेतनत्वाज्जीवाभिन्नस्य ईश्वरस्यापि भोक्तृत्वप्रसक्तिः "नान्यातोऽस्ति वक्ता" "एकमेवाद्वितीयम्" इत्यादि श्रुतेः "आकाशवत्सर्वगतश्च नित्यः" इत्यादिस्मृतेरपि तथात्वं सिद्ध्यति। अत्रोच्यते एकस्मिन् शारीरात्मनि "द्रष्टा श्रोता मन्ता बोद्धा विज्ञानात्मा पुरुषः" इत्यादि श्रुतिः कर्त्तृत्व भोक्तृत्वादिधर्म्मं प्रतिपादयति। अपरस्मिन् परमात्मनि "अपहतपाप्मा विजरो विमृत्युर्विशोक" इत्यादि श्रुतिः अपहत पाप्म-त्वादि धर्मं प्रतिपादयति। इत्थं श्रुतिवलात् वैलक्षण्योपपत्तौ ईश्वरे संसारभोक्तृत्व प्रसक्तिप्रत्याशापार्थैवेति वेद्यम्। न च वस्तु शक्ति मनपेक्ष्य सामीप्यमात्रेण कार्य्यसम्पर्कोऽभ्युपगम्यते। आकाशादीनामपि दाहादिप्रसक्तेःतथा सति न हार्दत्वेन नित्यमुक्तवस्तुनि परमात्मनि भोक्तृत्वप्रसक्तिःव्यापकत्वानैकात्म्यवादिनामपि एकस्मिन्देहे स्थितस्य पुरुषस्य व्यापकत्वात् अनैकात्म्यप्रसक्तभोक्तृत्वप्रसङ्गः स्वकर्मार्जित एव देहे भोगोभवितुमर्हति इति चेत्तत्रोच्यते यथैवास्मत्पक्षेभोगप्रसक्तिः शङ्क्यते तथैव अनैकात्म्यव्यापकत्वहेतुभ्याम किन्तु विरुद्धपक्षेशङ्कितुं शक्यते कर्माज्जर्नं देहनिवन्धनमिति चेत् भवतु, युष्मन्मते पार्थक्येन देहाभ्युपगमः सर्व्वे देहाःसर्व्वेषामात्मनाम् युष्मदभिमतानां स्वीयत्त्वेन कथं न स्वीकृतिविषया भवेयुः देहकृतसर्व्वव्यवहारः कथं न व्याकुप्येत्। अस्माकन्तु, एकएव विभुरलिप्तोनित्यश्च आत्मा अभिमतः अज्ञानज-नितोपाधिकल्पितव्यावहारिकभेदेन अप्रतिवद्ध एव व्यवहारनिर्व्वा हःसिध्यति। अघटितघटनापटीयस्त्वसम्पन्नमाया कौशलेन अस्मन्मते न कोपि शङ्कावसरश्चपरिहारे। अपि च प्रष्टव्यः प्रतिवादी परापरात्मनो रेकत्वहेतुना परमेश्वरे जीवभोग्यस्य संसारस्य भोक्तृत्वप्राप्तिः त्वया चोद्यते तदेकत्वं कथमध्यवसितम् "तत्त्वमसि" "अहं ब्रह्मास्मि" "अयमात्माब्रह्म" "प्रज्ञानमानन्दम्ब्रह्म" "नान्योतोऽस्ति विज्ञाता" इत्यादिश्रुतिभ्यश्चेति तत्रोच्यते श्रुत्यनुसरणकृता तदा श्रौत एवार्थः प्रतिपत्तव्यः न च वृद्धाया अर्द्धमुखमेव इच्छति न गात्राणीति अर्द्धज रतीयंन्यायः एकत्र श्रुतौ वाक्यसम्मानपुरः सरम् अन्यत्र श्रुतौ वाक्या-

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

वमतिरूपम्प्रतिपत्तव्यः। श्रुतौ "तत्वमसि" इत्यादिवाक्यैः अपहतपाप्मत्वादिलक्षणं ब्रह्मशारीरस्य जीवात्मनः आत्मत्वेनोपदिश्यते "तद्धि आत्मनोरूपम्' इति सूत्रितमप्यस्मिन् ग्रन्थे ततश्च शारीरस्यापि तावद्भोक्तृत्वं वारयति ईश्वरे तु कैमुतन्यायआयाति। तदा "द्रष्टा श्रोता मन्ता बोद्धा कर्त्ता" इत्यादिश्रुतेः "पुरुषः सुखदुःखानाम्भोक्तृत्वे हेतुरुच्यते" इत्यादिस्मृतेः। योगर्त्तं खनति स निपतति इतिलोकोक्तेश्च जीवभोक्तृत्वप्रतिषेधे का गतिः एवमेवासमञ्जस्ये प्रस्तूयते सूक्ष्मो विचारः आत्मन्यध्यस्तबुद्धिगतसत्वरजस्तमोवृत्तिसुखदुःखमोहस्य जीवस्य मिथ्याज्ञाननिमित्तः औपचारिक एव भोगः न वास्तविकः अनात्मधर्म्मस्य भोगस्य असत्वात् आत्मनोऽसङ्गत्वात् वास्तविकभोगसम्बन्धानुपपत्तेः अपहतपापमत्वादिधर्म्मस्य ईश्वरस्य भोगस्पर्शलेशोपि न मन्तव्यः समाधौ शारीरात्मनि संसारभोगव्यतिरेकत्वदर्शनात् समरभूमौ प्रस्फुटितकपालस्य स्रवद्रक्तस्यापि पुरुषस्य प्रतिभटनिहितबुद्धेः वेदनान्तःकरणासंयोगदशायां न वेदनादवगमः स एव पुरुषः त्वम्प्रस्फुटितकपालोसि स्रवद्रक्तोसि इति केनचित्पुरुषेण प्रतिबोधितः प्रतिभटानिहितबुद्धिः बुद्धिसम्पृक्तवेदनावान् व्याकुलोभवति मूर्च्छितोवा निपतति विचार्य्यतामिदमत्र वेदना तु उभयत्र एकरूपैव परन्तु पुरुषबुद्धिवियोगसंयोगावेव वेदनावगमानवगमप्रयोजकावितश्चापि प्रसिद्धाल्लौकिकोदाहरणात् शारीरस्यात्मनः वास्तविकभोगानुपपत्तिः जीवात्मा पुरुषोऽपि निवृत्तबुद्धिवृत्त्यवस्थितः स्वस्वरूपस्थः परमात्मरूप एवेति वेदितव्यम् नहि वालैस्तलनीलिमादिभिर्विकल्पिते नभसि वास्तविकम् तलनीलिमादिवैशिष्ट्यं भवति तथा नाज्ञाननिमित्तो बुद्धिगतोभोगोजीवस्य वास्तविको भवितुमर्हति नित्यालुप्तज्ञानस्य नित्यमुक्तस्य ब्रह्मणः दूरत एव निरस्तइति वेदितव्यम्। पूर्वोक्तसौत्रसंसृतिशब्दसंसूचितलोकान्तरगामित्वयोन्यन्तरगामित्वे वैराग्यदार्ढ्याय विवियेते लिङ्गशरीरोपहितः प्राणसचिवः समनस्कोऽविद्याकर्मपूर्वप्रज्ञापरिग्रहः प्राक्शरीरं परित्यज्य शरीरान्तरं गच्छति इत्यभ्युपगम्यते 'अथैनमेते प्राणाअभिसमायन्ति" इत्युपक्रम्य "अन्यन्नवतरं कल्याणतरं रूपम्" इत्यन्तेन श्रवणात् "वासांसि जीर्णानि यथा विहाय नवानि गृह्णाति नरोऽपराणि। तथा शरीराणि विहाय जीर्णान्यन्यानि संयाति नवानि देही" इतिस्मरणाच्च तत्र लिङ्गशरीरे "बुद्धिकर्मेन्द्रियप्राणपञ्चकैर्मनसा धिया। शरीरं सप्तदशभिः सूक्ष्मं तल्लिङ्गमुच्यते"

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

इत्याद्युक्तेः पञ्चप्राणमनोबुद्धिदशेन्द्रियोपादानवत् भूतोपादानस्यानुपलब्धेरपि "तदन्तरप्रतिपत्तौ रंहति संपरिष्वक्तः प्रश्ननिरूपणाभ्याम्" इति ब्रह्मसूत्रात् "वेत्थं यथा पञ्चम्यामाहुतावापः पुरुषवचसोभवन्ति" इति श्रौतप्रश्नेन द्युपर्ज्जन्यपृथिवीपुरुषयोषित्सु पञ्चस्वग्निषु श्रद्धासोमवृष्ट्यन्नरेतोरूपाः पञ्चाहुतीर्दर्शयित्वा "पञ्चम्यामाहुतावापः पुरुषवचसोभवन्ति" इति श्रौतनिरूपणेन च देहबीजानां भूतसूक्ष्माणामपि लिङ्गदेहे सत्त्वं वेदितव्यम् देहाद्देहान्तरप्राप्तौ जलौकासादृश्येन कर्मप्राप्यदेहविषयभावनादीर्घीभावमात्रं वेदितव्यम् "अथ य इमे ग्राम इष्टापूर्त्ते दत्तमित्युपासते ते धूममभिसम्भवन्ति आकाशाच्चन्द्रमसमेव सोमोराजा" इत्यादिश्रुतिः इष्टादिकारिणां पितृयानेन पथा प्रवृत्तिमार्गेणेति यावत् चन्द्रप्राप्तिं कथयति अनेन प्रवृत्तिमार्गगामिनां स्वर्गप्राप्तिरपि कथ्यते कर्मणा देवत्वावगमात् "अथ ये शतं पितॄणां जितलोकानामानन्दा स एकः कर्मदेवानामानन्दो ये कर्म्मणादेवत्वमभिसम्पद्यन्ते" इतिश्रुतेः इष्टादिकारिणां कर्म्मदेवानां देवे संवसतां भोगप्राप्तिदर्शनात् ततश्च पुनरावृत्तिरपि श्रूयते "स सोमलोके भूतिमनुभूय पुनरावर्त्तते" इतिश्रुतेः "क्षीणे पुण्ये मर्त्यलोके विशन्ति" इतिस्मृतेश्च येन कर्म्मनिचयेन चन्द्रमसमारोहन्ति फलोपभोगाय तस्मिन्नुपभुक्ते क्षीणे सति यच्छरीरं चन्द्रमसि उपभोगाय आरब्धं तदुपभोगक्षयनिमित्तशोकानलसम्पर्कात् प्रविलीयते सूर्य्यांशुसंयोगात् तुषार इव अग्निसंयोगात् घृतकाठिन्यमिव ततः "य इह रमणीयचरणाः अभ्याशो ह यत्ते रमणीयां योनिमापद्यन्ते ब्राह्मणयोनिं वा वैश्ययोनिं वा अथ तद्य इह कपूयचरणा अभ्याशो ह यत्ते कपूयां योनिमापद्यन्ते श्वयोनिं वा शूकरयोनिं वा चाण्डालयोनिं वा" इत्यादिश्रुतेः सानुशया अवरोहन्ति फले कर्मजाते उपभुक्ते अवशिष्टमैहिकफलं कर्मान्तरजातम् अनुशयस्तद्वन्तोऽवरोहन्तीति यावत् अनिष्टादिकारिणः तमोबहुलाः पुण्यविहीनाः पापिनः यमालयमवगाह्य स्वदुरितानुकूलां यामीं यातनामनुभूय पुनरपि इमं लोकमवरोहन्ति ते कपूयचरणा एवावरोहन्ति तेषां नहि रमणीयचरणत्वं भवति चरणशब्देन "चरणं चारित्रमाचारः शीलम्" इत्युक्तेः शीलमपि सूचितम् भवति तथाप्यत्र सुशीलदुःशीलसाध्यसुकृतदुष्कृतपरावेव रमणीयचरणकपूयचरणशब्दाविति वेद्यम्। स्वर्गच्युतानां रमणीयचरणत्वप्राधान्यम् इतरेषामितरप्राधान्यं वेद्यम्। इष्टादिकारिणां सुकृतबाहुल्यात्

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

दुष्कृतस्य च कादाचित्कत्वात् । संसृतिपतितानां प्रवृत्तिमार्गेण लोकान्तरगामित्वं लोकान्तरावरोहेण योन्यन्तरगामित्वञ्च पुनर्लोकान्तरगामित्वं योन्यन्तरगामित्वञ्च पौनः पुन्येन भवति । एवं चक्रशते कर्मिणां प्रवृत्तिमार्गगामिनां परिभ्रमणं भवति । एतावता ग्रन्थसन्दर्भेण प्रवृत्तिमार्गे दुःखबाहुल्यं सूचितम् वैराग्यदार्ढ्याय इतिवेद्यम् । प्रसङ्गप्राप्तनिवृत्तिमार्गः प्रतिपाद्यते "तेऽर्चिषमभिसम्भवन्ति" "विद्यया देवलोकः" इत्यादिश्रुतेः "अग्निर्ज्योतिरहः शुक्लः षण्मासा उत्तरायणम् । तत्र प्रयाता गच्छन्ति ब्रह्म ब्रह्मविदोजनाः" इत्यादिस्मृतेश्च प्रवृत्तिमार्गे पुनरावृत्तिः प्रतिपाद्यते । निवृत्तिमार्गे तु अनावृत्तिः । निवृत्तिमार्गोदेवयानपदवाच्योमोक्षमार्ग इतिवेद्यम् । अत्रशङ्कनीयम् यदि विद्या उपासनयैव मोक्षप्राप्तिः तदालं मोक्षसाधनेन ज्ञानकाण्डेनेत्युच्यते अत्र तु विद्यावतां भगवदुपासकानां सम्यक्दर्शनविहीनानां देवलोकप्रात्प्या क्रममुक्तिरितिवेद्यम् "नहि सद्योमुक्तिभाजां सम्यग्दर्शननिष्ठानां गतिर्वा क्वचिद्भवति" "न तस्य प्राणा उत्क्रामन्ति" "विमुक्तश्च विमुच्यते" इत्यादिश्रुतेः केचित्तु राजसा विद्याकर्मविहीना नरकप्रदपापरहिताश्च "अथैतयोः पथोर्न कतरेण च तानीमानि क्षुद्राण्यसकृदावर्त्तीनि भूतानि भवन्ति" इतिश्रुतेः "मध्ये तिष्ठन्ति राजसाः" । इत्यादिस्मृतेश्च योनेर्योन्यन्तरं गच्छन्ति 'जायस्व म्रियस्वेत्येतत्तृतीयस्थानं न तेनासौ लोकः संपूर्य्यते" इतिश्रुत्युक्ततृतीयस्थानिनां निरुक्तमध्यस्थानाम् निवृत्तिप्रवृत्तिमार्गयोः विद्याकर्मसाध्ययोः कतरेणापि गमनाश्रवणात् अस्मिन् प्रवृत्तिनिवृत्तिभिन्ने योनितोयोन्यन्तरगमनरूपे देहलाभोपपत्तये कथं द्युपर्य्यन्तपृथिवीपुरुषयोषित्सु पञ्चस्वग्निषु श्रद्धासोमवृष्ट्यन्नरेतोरूपपञ्चाहुतिसम्भवः कथञ्च "अथैनमेवाध्वानं पुनर्निवर्त्तन्ते यथैतमाकाशमाकाशाद्वायुं वायुर्भूत्वा धूमोभवति धूमोभूत्वाऽभ्रं भवत्यभ्रं भूत्वा मेघोभवति मेघोभूत्वा वर्षति त इह व्रीहियवा ओषधिवनस्पतयस्तिलमाषा इतिजायन्ते अतोवै खलु दुर्निःप्रपतरं योयोह्यन्नमत्ति योरेतः सिञ्चति" इत्याद्युक्तश्रुतिक्रमासम्भवः अत्रोच्यते न तृतीयस्थाने देहलाभाय पञ्चाहुतिसंख्यानियमः आरण्यश्रुतौ जायस्व म्रियस्व इतिसंख्यानियममन्तरैव जन्ममरणप्रतिपादनात् "पञ्चम्यामाहुतावापः" इतिश्रुतौ मनुष्यशरीरनिबन्धनमेव संख्याकथनं पुरुषशब्दस्य मनुष्यशब्दपर्य्यायत्वात् न कीटपतङ्गादिशरीरनिबन्धनः पञ्चाहुतिसंख्यानियमः पुरुषवचस्त्वं प्रतिपादयति नचात्रपञ्च-

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

ण्याहुतिषु पुरुषंवचस्त्वं प्रतिषेधयति यथैकादशीव्रतमेकादश्यामुपोषण-स्प्रतिपादयति न चतुर्दश्यामनुपोषणम् येषामारोहणावरोहणसम्भवः तेषां पञ्चाहुतिसंख्यानियमः। अन्येषान्तु पञ्चाहुतिसंख्यानियमम-न्तरैव भूतान्तरोपसृष्टो भूतले उद्भवोभवति। एतेनैव चन्द्रमण्डलगम-नव्यतिरेकात् आकाशादिसम्पत्तिव्रीह्यादिसम्पत्ती निरस्ते इतिवेदि-तव्यम्। क्रमजातशुक्रभावोऽपि निरस्त इतिवेद्यम्। दृश्यते द्रोणादीनां योषिद्विषयकाहुत्यभावः धृष्टद्युम्नादीनां योषित्पुरुषविषयकाहु-तिद्वयाभावः सीतायाश्चायोनिजत्वम् जरायुजाण्डजस्वदेजोद्भि-ज्जरूपचतुर्विधभूतग्रामे स्वेदजोद्भिज्जयोः रेतःसिग्भावमन्तरैवउत्प-त्तिदर्शनं तस्माद्योनितोयोन्यन्तरगमनं पञ्चाहुत्यादिगगनसम्पत्त्या-दिनियममन्तरैव अनिष्टादिकारिणां तृतीयस्थानिनां भवतीतिसिद्धम् एवमुक्तप्रकारेण संसारिणां लोकान्तरयोन्यन्तरगमनजनितदुःखबा-हुल्यं दर्शितम् तेन च मुमुक्षूणां वैराग्यं दृढीकृतमितिवेदितव्यम्। यद्यपीहोपदेशशब्दः श्रद्धासूचकः प्रथमसूत्रस्थः प्रमाणापेक्षामत्र ग्रन्थे निवारयति तथैवोपदेशशब्दव्याख्याने अस्माभिः प्रतिपादितम् तथापि श्रद्धानानामधिकारिणां मुमुक्षूणामत्र पुनः पुनः श्रद्धाविवृद्धये भक्तिसमृद्धये च प्रतिवादिप्रतिष्ठापितसन्देहापनोदनाय संदिग्धस्थले प्रमाणप्रदर्शनपूर्वकमेव विवृत्तिः कृतेतिवेदितव्यम्। सदयसूत्रकृदाशय-राशयोऽपि प्रकाशिता इतिवेदितव्यम्॥ १ ॥ १ ॥ २ ॥

अमृतं संसृतिनिवृत्तिशब्दवाच्यं मोक्ष इत्युक्तम् का पुनः संसृ-तिरित्यग्रिमसूत्रे प्रतिपाद्यते।

संसृतिः स्वरूपविस्मृतिः ॥१॥१॥३॥

संसृतिः श्रीमता सूत्रकारेण स्वरूपतटस्थलक्षणाभ्यां यौगपद्येन लक्ष्यते का सा संसृति र्नामेति स्वरूपविस्मृतिः स्वरूपस्य विस्मृतिः षष्ठीतत्पुरुषः इदं स्वरूपलक्षणमिति वेद्यम्। स्वरूपस्य विस्मृतिर्यत इतिबहुव्रीहिः इदन्तु तटस्थलक्षणं वेद्यम्। "भावः सत्ता स्वभावाभि-प्रायः" इतिकोषात् भावशब्दःस्वभावपर्य्यायः स्वभावशब्दःस्वरूप-पर्य्यायः तस्मात्स्वरूपविस्मृतिरित्यत्र भावविस्मृतिरित्येवंरूपे सूत्र-शरीरे लाघवलाभमनादृत्य भावशब्दस्य नानार्थशक्तिकत्वात् बोद्धाऽ-नभिप्रेतार्थं न प्रतीयादिति स्वरूपशब्दं प्रयुक्तवानिति वेद्यम्। स्वरूपं स्वस्य आत्मनोरूपं रूपयतीति रूपं तत्र निराकारस्यात्मनः रूपशब्दायोगात् अत्रस्वरूपशब्देन स्वभाव इतिवेद्यम् "स्वरूपञ्च

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

स्वभावश्च निसर्गश्च" इतिकोषात् स्वरूपं स्वभाव इतियावत् तस्य विस्मृतिः विस्मरणम् यद्वा । "भावोविद्वानथात्मनः". इतिकोषात् स्वभावशब्देन स्वस्य विद्वान् आत्मज्ञः स्वरूपपरिचयी "स्वरूपपरिचयोयोगः" इत्यत्र सूत्रात् "तद्धि आत्मनोरूपम्" इत्यत्रसूचितत्वात् समवरुद्धसमस्तभगवद्ब्रह्माभिन्नप्रत्यगात्मा तत्सम्बन्धिनी आनन्दादिस्वभावाऽऽवरणनिमित्तीभूता विस्मृतिरिति वेद्यम् । यद्वा स्वरूपशब्दः निरुक्तकोषबलात् अभिप्रायपर्य्यायत्वे पर्य्यवसितः "बुद्धीन्द्रियमनःप्राणान् जनानामसृजत्प्रभुः। मात्रार्थञ्च भावार्थञ्च आत्मनेकल्पनाय च" इतिस्मृतेरयमाशयः सानुशयान् जीवान् तेषां धर्मार्थकामरूपत्रिवर्गप्राप्तिपूर्वकचतुर्थवर्गमुक्तिसिद्ध्यभिप्रायेण भगवानीश्वरोऽसृजदिति स्वोत्पत्तौ स्वस्मै स्रष्टुः मुक्तिनिष्पत्त्यनुकूलाभिप्रायः तस्य विस्मृतिरिति । यद्वा "तस्मादहम्विगतविक्लव उद्धरिष्य आत्मानमाशु तमसः सुहृदात्मनैव । भूयोयथा व्यसनमेतदनेकरन्ध्रम् मा मे भविष्यदुपसादितविष्णुपादः" अस्याःस्मृतेरयमाशयः रौरवोत्कटयातनाभूमिगर्भस्थजन्तुः पुनर्गर्भवासनिवृत्त्यभिप्रायेण व्यवतिष्ठति तदभिप्रायेण निर्जिगमिषति "रोरुयति गते ज्ञाने विपरीताङ्गतिङ्गतः" इतिस्मृतिः गर्भस्थजन्तोः गर्भान्निर्गमनानन्तरम् तदभिप्रायविस्मृतिं द्योतयति तदत्र स्वरूपविस्मृतेः गर्भस्थजन्त्वभिप्रायविस्मृतिरित्यर्थोवेदितव्यः । ग्रन्थविस्तारभयमवशिष्टपक्षान्तरव्याख्यानम् वारयति इति वेद्यम् । अत्र ग्रन्थे तद्धीत्यादिना स्वरूपं सर्व्वशक्तिसमन्वितम् ब्रह्म प्रतिपाद्यते बृहतेर्धातोरर्थानुगमात् सर्व्वात्मनः ब्रह्मणः जीवात्मनः स्वरूपस्य सर्व्वत्राहम्प्रत्ययेनोपलभ्यमानस्य सिद्धैवास्तित्वसिद्धिः सर्व्वोहि अहमस्मीति मन्यते भवत्यप्यनुपपत्तिरात्माभावस्य असमक्षकत्वात् । आत्माभावसाक्ष्यमपि आत्मभावेनैवभाव्यम् रूपस्य चक्षुः प्रकाश्यत्ववत् सर्व्वपदार्थस्य तस्य दृश्यत्वात् । भवति चात्र शङ्कोत्थानम् सर्व्वप्राणिभिरहमित्युपलभ्यमानस्य विस्मृतिर्न सम्भवति इतिचेत् तन्नोच्यते सम्भवस्तस्याः ब्रह्मरूपात्मनोविशेषं प्रति विप्रतिपत्तेः चेतनभावसम्पन्नशरीरमात्रमात्मेति वेदबाह्यलौकायतिकाः प्रतिपद्यन्ते केचिद्वेदबाह्या इन्द्रियाण्येव चेतनान्यात्मा इतिप्रतिपन्नाः । मन इत्यन्ये वेदबाह्याः । इन्द्रियाणि मन इतितदेकदेशिनः । प्राण इत्यपरे । विज्ञानमात्रं क्षणिकमित्यन्ये । विज्ञानं स्थिरमित्येके । शून्यमित्यपरे । एता नास्तिकानां विप्रतिपत्तयः । अस्ति देहाद्यतिरिक्तः संसारी कर्त्ता भोक्ता विभु-

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

रिति तार्किकः। भोक्तव केवलं न कर्त्ता इतिसाङ्ख्याः। एक एव चिज्जड़रूप आत्मा इत्यपरे कर्म्मठाः। अस्ति देहाद्यतिरिक्त ईश्वरः सर्वज्ञः सर्वशक्तिमान् इतियोगिनः। आत्मा स भोक्तुरित्यपरे वेदान्तिनः इत्यास्तिकानां विप्रतिपत्तयः। एवमनेके विप्रतिपन्नाः हेतुवादतदाभासमभिसम्पन्नाः सन्तु। ते विस्मृतात्मयाथात्म्येन यत्किंचिदभिमन्यमानाः परमार्थात् प्रतिहन्येरन् अनर्थञ्च प्रतिपद्येरन्। अत्रात्मा स भोक्तुरिति निरवद्याप्रतिपत्तिः सिद्धान्तरूपेति वेद्यम्। अन्यास्तु सर्वा एवविप्रतिपत्तयः नास्तिकानामास्तिकानाञ्च यथाक्रमं निराक्रियन्ते देहे स्थूलोऽहं गौरोऽहमित्याद्यभिमन्यमानः शुक्रशोणितसम्भूतमन्नमयं विकारिणं चर्मास्थिस्नायुमांसमेदोमज्जाशोणितश्लेष्ममलमूत्रादिभाण्डारमाधिव्याधिबहुलं पञ्चत्वमितेऽस्मिन् विट्कीटभस्मावशेषं देहं स्वमात्मानं प्रतिपादयन् किन्नलज्जसे पश्य कश्चित्सुखी कश्चिद्दुःखी दृश्यते तत्र देहरूपस्य तवात्मनः पूर्वदेहजकर्म्माभावे किन्निमित्तं तत्सुखं दुःखञ्च वाच्यम् पूर्वदेहिकाभ्यासाभावे च स्तन्यपानाद्याद्याप्रवृत्तिः किंनिबन्धना विद्यमानशरीरस्यात्मरूपस्य प्राक्तनकर्म्माभावे शरीरमपि किन्निबन्धनं चैतन्यविशिष्टदेहात्मत्वाभ्युपगमे कथं मृतदेहस्याचैतन्यम् दृश्यते तदापिदेहात्मसत्त्वाविशेषात् स्वभावनिमित्तत्वे सुखदुःखादिवैचित्र्यानुपपत्तिः। स्वभाववैशिष्ट्ये हेत्वनुपपत्तिः दृश्यते च तैलबीजादिनिमित्तसाम्ये नैमित्तिकदीपाङ्कुरादिसाम्यम् सुखदुःखवैचित्र्ये निमित्तं कर्म मन्यसे चेत् तदा शरीरस्थितिकालिकभोगनिमित्ततादृशकर्मासम्भवात्तदसम्भवः एवं स्वादृष्टरूपप्राक्तनकर्म्मकर्त्ता देहाद्यतिरिक्तोनित्य आत्मा भवितुमर्हति इतिसिद्धम्। भवति वेदबाह्यस्यलौकायतिकस्य वेदप्रमाणमन्तरैव युक्तिप्रदर्शनपूर्वकंखण्डनं ततस्तथैवतत्प्रतिपादितमितिवेद्यम्। काणोऽहं बधिरोऽहमित्यभिमन्यमानः चेतनानीन्द्रियाण्येवात्मा इति प्रतिपन्नः वेदबाह्यस्त्वं प्रष्टव्यः प्रतिकरणात्मत्वस्वीकारे स्वाम्यनेकत्वसिद्धौ तव देहोबहुस्वामिभिरिन्द्रियैरेककालएवैकएवश्रवणदर्शनादितत्कर्मसु नियुक्तः आकृष्टः भिन्नदेशेषु नोन्मथ्यते कस्मात् भवति च करणसमुदायात्मवादेऽपि अन्धबधिरमूकादीनां दुर्वारमरणप्रसङ्गः मणिसमुदायघटकमणिमालैकमणित्रुटौ, मणिमालात्रुटिवत् करणसमुदायात्मवादे कार्य्यनिष्पत्त्यनुपपत्तिः लोकसिद्धप्रवृत्तिकरणवृत्तिश्रवणाद्यनुपपत्तेः वागिन्द्रियेण दर्शनश्रवणाद्यशक्तेन

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

दृष्टश्रुतादिकथनं न घटते अन्यदृष्टश्रुताद्यर्थानामन्योक्त्यनुपपत्तेः भवति चेन्द्रियात्मवादे इन्द्रियवृत्तिव्यतिरेकिस्वप्नसुषुप्तिदशानुपपत्तिः तदा निवृत्तिककरणानुभवानुपपत्तेः इन्द्रियलयेनैवात्मलयसिद्धेः कथं भवानिन्द्रियात्मवादी सुप्तःसुषुप्तो वा पुनरुत्तिष्ठति न मृतक इव दग्धोवा भूम्यन्तरुपरुद्धोवा भवति आत्मलयस्यैव मरणप्रसिद्धेः अतो न युक्तं तत्र कपोलकल्पितकथनमिति सिद्धम् । एवमिन्द्रियाणि मन आत्मेतिवादोऽपि निरस्तोवेदितव्यः तत्रापि सुषुप्तिदशानुपपत्त्यादिदोषसाम्यात्। प्राणात्मवादी बुभुक्षुरहं पिपासुरहमित्यभिमन्यमानः वेदवाह्यस्त्वं प्रष्टव्यः प्राणस्ते भक्षणपानाधीनः कथमात्मा परतन्त्रः पराभूतः परमात्मा स्वीकर्त्तुं न ते प्राणोभवितुमर्हत्यात्मात्वमचलः प्राणे चलत्यप्यहमचल इति किन्न प्रत्येषि। किम्वा प्राणधारणत्वेन प्राणादपर आत्मा जीवो न लक्ष्यते जीवनस्य प्राणधारणत्वव्युत्पत्त्याव्याकरणात् 'जीवप्राणधारणे'इतिधातोःकिं वा समाधिस्थं निरुद्धप्राणं जीवन्तं चेतनं न पश्यति अतस्त्वं केनापि वञ्चितः स्वयंदैवेन कथमन्यान् हन्तुं प्रवर्त्तसे । जन्मनिदानमन्नमयं शुद्धमशुद्धं चञ्चलश्रवणादिसाधनमन्तः करणं वन्धमुक्तिप्रदम् मन आत्मेत्यभिमन्यमानो वेदवाह्यस्त्वंप्रष्टव्यः सुषुप्तिलीनमनाः कथं सुखमनुभवसि कथं वा प्रबुद्धः सुषुप्तिसुखं स्मरसि सुषुप्तौ मनसस्तवात्मनोलयाभ्युपगमात् तदनुपपत्तेः सुखानुभवितुरभावात् स्मृत्यनुपपत्तेरिति यावत् । जन्मनिमित्तीभूतमन्नविकारि शुद्ध्यशुद्धिपरिणामि चञ्चलं कर्त्तृक्रियासाधनसामग्रीकरणरूपवन्धमुक्तिप्रदं मनोनात्मा भवितुमर्हति तस्मादनादर्त्तव्यवचन भवान् मिथ्याप्रलापीति सिद्धम् । क्षणिकविज्ञानमात्मेत्यभिमन्यमानो वेदबाह्यः सौगतस्त्वम्प्रष्टव्यः सर्ववस्तुक्षणिकत्वाभ्युपगमे तवोपलब्धुरनुस्मरणंसम्भवति।भवति त्वुपलब्धुस्ते क्षणिकत्वानुपपत्तिः।तथाहिभवानुपलब्ध्या कथमुपलब्धमनुभूतं विषयमनुस्मरति अनुभवमनूत्पद्यमानं स्मरणमनुस्मृतिः सा चोपलब्ध्येककर्तृका सती सम्भवति पुरुषान्तरोपलब्धविषये पुरुषान्तरस्मृत्यदर्शनात् कथमहमद्राक्षमिदं पश्यामीति पूर्वापरदर्शिनि असत्येकस्मिन्प्रत्ययः सम्भवेत् योऽहमिदं पूर्वमद्राक्षं स एवाहमद्य तत्स्मरामीति प्रत्यभिज्ञा सर्वजनप्रसिद्धैव वर्त्तते । यदि दर्शनस्मरणयोः कर्त्ता भिन्नः स्यात् तदाहं स्मराम्यन्योऽद्राक्षीदिति प्रतीयात् न त्वेवं कश्चित्प्रत्येति । तत्रैवं सति एकस्यैवक्षणिकविज्ञानवादिनस्तत्र दर्शनस्मरणक्षणद्वितयसम्बन्धिनः क्षणिकत्वाभ्युपगमहा-

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

निरप्रतिहतेचापततीति वेद्यम् विज्ञानस्य मनोवस्थान्तररूपबुद्ध्यपरपर्य्यायस्य आत्मत्वनिराकरणाय मानसात्मत्ववादे मूर्छाकालिकस्तब्धत्वादिदोषः स्थिरविज्ञानात्मवादनिराकरणावसरे वक्ष्यन्ते । स्थिरविज्ञानमात्मेत्यभिमन्यमानः प्रष्टव्यो वेदबाह्योबौद्धोभवान् कर्त्ता किमन्तरा करणभूतमशनक्रियासाधनमश्नाति नोचेत् विज्ञानपर्य्यायबुद्धेरेवान्तःकरणत्वप्रसिद्धेः तस्या एवात्मत्वस्वीकारे सा बुद्धिः कर्त्रीभूता बोधनक्रियासाधनान्तःकरणमन्तरा बोधनक्रियां सम्पादयितुं किं शक्नुयात् कर्त्तृकरणद्वितयस्य लोके कार्य्यनिःपादकत्वदर्शनात् एकस्यैव विज्ञानस्य तवाभिमतस्य बुद्ध्यात्मकस्य कर्त्तृकरणद्वितयत्वानुपपत्तेः कार्य्यनिष्पत्यनुपपत्तिः । आत्मनः बुद्धिनिमित्तकबन्धनप्रसिद्धेः । स्वस्याभिमतिः स्वबन्धनेन सम्भवति । एकस्यैव बन्धनक्रियायाः कर्त्तृत्वं कर्म्मत्वञ्चासङ्गतं कर्त्तृकर्म्मणोः द्वितयनिष्ठत्वप्रसिद्धेः । न दृश्यते लोके भक्तं भक्तमश्नातीति व्यवहारः । ननु देवदत्त आत्मानं ताडयतीत्यत्र देवदत्तशब्देन पुरुषोवेदितव्यः आत्मशब्देन देहः आत्मशब्दस्यदेहादौ रूढत्वात् भवति च प्रसिद्धं तस्याः सारथ्यम् शरीरस्थे रथिनो जीवस्य मानसात्मत्वप्रतिपत्तिनिवृत्त्यनुकूलजन्ममरणसाधनत्वादिदोषोऽपि वौद्धमतखण्डनायास्माकं भूषणाय वेदितव्यः । शून्यमात्मेति प्रतिपन्नो नास्तिकः सौगतः प्रष्टव्योभवान् क्वापि दृश्यते शून्यादभावरूपाद्भावोत्पत्तिर्जगति नानुपमृद्यप्रादुर्भावादित्याशयवता भवता विनष्टाद्बीजादङ्कुर उत्पद्यते इतिचेदुच्यते तत्रोच्यते न बीजस्य स्वरूपोपमर्दोवाच्यः न बीजस्योपमृद्यमाना पूर्वावस्था उत्तरावस्थायाः कारणमभ्युपगम्या अनुमृद्यमानानामेवानुगानां बीजावयवानामङ्कुरकारणत्वमभ्युपगम्यम् । वस्तुतोबीजोपमर्दे सति बीजाभावस्य शशविषाणादिरूपाभावस्य च सामान्यात् भवतु भवन्मते शशविषाणाच्छशविषाणोत्पत्तिः न च सा दृश्यते आम्रबीजपनसबीजयोरुपमृद्यमानयोः भवन्मते अभावरूपयोः परस्परं निर्विशेषयोः कथं न आम्रबीजस्य पनसांकुरकारणत्वं पनसबीजस्य चाम्राङ्कुरकारणत्वम् अभावस्य च शून्यरूपस्य सर्वत्र सर्वदा सुलभत्वात् सर्वाणि कार्य्याणि सर्वदैवकारणरूपाभावसत्त्वात् निष्पन्नानि भवन्तु । भवतु च स्वस्वकार्यनिष्पत्तिः कृषिकर्म्मण्यकृतयत्नेऽपि कृषीवले कर्षणबीजवपनाद्यभावकारणस्य सुलभत्वात् अनीहमानस्यैवोदासीनस्य धर्मार्थकाममोक्षाः सम्पद्यन्ताम् तत्तत्साधनाभावकारणस्य सुलभत्वात् वैयर्थ्यञ्च

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

तत्तत्प्रतिपादकानां शास्त्राणां कथं न वाच्यम्। भवतु च तृप्तिर्भवतः सुगतस्य विगतान्नस्यापि बुभुक्षितस्य अन्नाभावस्यापि बुभुक्षापनोदनत्वात् नचैतानि दृश्यन्ते तस्मात् भ्रान्तः प्रमत्तः सुगत इतिसिद्धम्। देहाद्यतिरिक्तः संसारी कर्त्ता भोक्ता विभुरात्मेत्यभिमन्यमानस्तार्किकः प्रष्टव्यो भवति आत्मनोवैभवं सर्वगतं चेत् तर्हि सर्वदेहेषु सर्वात्मत्वसिद्धौ भोगाव्यवस्था प्रसज्येत शरीरप्रयत्नेन्द्रियकर्म्मणामिदमत्रेदमत्रेति हेत्वसत्वेन सर्वात्मसामान्यात् एष भोग अस्यैवेति अनियमात् सर्वे भोगाः सर्वेषां स्युः येन मनसा यस्यात्मनः सम्बन्धः तेन मनसा तस्यैवभोग इति तर्केत चेत् ततः स्थितिसिद्धिरस्ति चेन्न मनसोऽपि मूर्त्तत्वात् सर्वात्मसम्बन्धसम्भवात् देहोपाधिनिमित्तापि न सम्भवति सिद्धिर्व्यवस्थायाः आत्मनानात्वप्रतिज्ञावैयर्थ्यात् एकात्मत्वेऽपि इत्थं देहोपाधिनानात्वस्वीकारेण भोगव्यवस्थासिद्धावलम् तन्निमित्तनानात्वस्वीकारेणेतिभावः यदि तार्किकाभिमतो-विशेषः स्यादात्मभेदकः एकविशेषस्य सर्वभेदकत्वासम्भवः सम्भवतर्के तु वियत्यपिभेदापत्तिः विशेषाणां बहुत्वे तु विशेषाश्रयाणामपि बहुत्वसिद्धौ पूर्वतएव भेदसिद्धेरलम् विशेषपदार्थस्वीकारेणेति वेदितव्यम्। किञ्च आत्मना निरवयवेन मनसः सम्बन्धो गुणोत्पत्तये तार्किकाभिमतो न सम्भवति निरवयवसंयोगायोगात् तार्किकाभिमतस्य इच्छाप्रयत्नादिगुणवत आत्मनः गुणनिमित्तयोगसिद्धौ आत्मनः कर्त्तृत्वमपि न सम्भवति बुद्ध्यादिगुणसत्त्वे आत्मनः जडत्वाद्यपि सम्भवति एवं तार्किकसमयः सामय एवेति वेदितव्यम्। भोक्तैवकेवलम् न कर्त्ता आत्मेतिप्रतिपन्नः कपिलः प्रष्टव्योभवति दृश्यते क्वापि जगति कस्यचिदकर्त्तु र्भोगोपपत्तिः वा कश्चिद्रसनाचालनमन्तरा मधुमाधुर्य्यरसास्वादकोभवति अपिचाकृताभ्यागमदोषप्रसक्तिरकर्त्तु र्भोगे कपोलकल्पनाकलङ्ककपिलेन प्रकृतिः प्रधाननाम्नी पुरुषभोगसम्पादयित्री समभ्युपगम्यते तत्रोच्यते कीदृशो भोगः पुरुषस्य कूटस्थस्य अनाधेयसुखदुःखरूपातिशयस्य कथं वा प्रकृतेरचेतनायाः प्रवृत्तिर्युज्यते पुरुषार्थाचेतनोऽहं चिकीर्षन् करोमीतिकृतिचैतन्ययोः सामानाधिकरण्यं घटते लोकानुभवसिद्धत्वात् न युक्ता जडस्य प्रधानस्य प्रवृत्तिकृतिकल्पनेतिसिद्धम् पुरुषसान्निध्यलब्धचैतन्यं प्रवर्त्तते। अयस्कान्तसन्निधानलब्धचैतन्यलौहवदितिचेन्न सन्निधिनित्यत्वेन प्रवृत्तिनित्यत्वप्रसक्तेरात्मनोनिर्मोक्षप्रसङ्गात् अयस्कान्तस्यानित्यसन्निधेः

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

परिमार्जनाद्यपेक्षस्य आत्मनः नित्यसन्निधेः निरपेक्षस्य च दृष्टान्तदार्ष्टान्तिकत्वानुपपत्तिः उभयोरसादृश्यादितिवेद्यम्। अयस्कान्तायःसम्बन्धस्तु सम्भवति कस्यचिदन्यसम्बन्धयितुर्भावात्।अत्र तु प्रधानमचेतनम्, आत्मा उदासीनः, अकर्त्ता न तयोरन्यः सम्बन्धयिता तस्मादनुपपन्नः सम्बन्धः उपपन्नमात्मप्रधानयोरसान्निध्यम् ततश्च प्रकृतिप्रवृत्तिरनुपपन्नेतिवेदितव्यम । प्रसङ्गागतप्रकृतिकर्तृकमोक्षोऽपि कपिलकल्पितः पुरुषस्य न सम्भवति । कपिलाभिमतः पुरुषोऽगुणोऽपरिणामी च। सवासनक्लेशकर्माशयानां बन्धनाह्वयानां तत्रापरिणामिन्यसंभवात् कपिलेनअध्यासानङ्गीकाराच्च मुचेर्बन्धनविश्लेषार्थत्वात् बन्धनायोगिपुरुषे नप्रकृतिकृतमोक्ष उपपद्यते इतिवेदितव्यम्। ततश्च "पुरुषविमोक्षनिमित्तं तथा प्रवृत्तिः प्रधानस्य" इति प्रतिज्ञापि कापिलानां व्यर्थैवेतिवेद्यम्।चिज्जड आत्मेत्यभिमन्यमानोभट्टोभवति प्रष्टव्यः। आत्मा एकः सन् चिज्जडात्मा विरुद्धोभयरूपो न स्यात् जडश्च चितोविषयइतिस्वस्यैवविषयत्वं विषयित्वञ्च न सम्भवति अंशयोरंशिनाऽभेदेऽपि परस्परं भिन्नयोर्विषयविषयिभावो न विरुद्धइतिचेत् चिदचिद्रूपौ अंशौ किमात्मकौ ? तयोः सम्बन्धश्चकः ? अवयवत्वं न निरूपयितुं शक्यते चिद्भावस्य चिद्भावे निरवयवे सम्बन्धासम्भवः तथांशाभ्यां चिदचिद्रूपाभ्यामन्योन निरूप्यःएकत्वेऽभिमते चिदचिद्रूपयोरंशयोः परस्परं भेदोऽपि नोपपन्नः। चेतनस्य जडता केन कारणेन स्वीक्रियते कर्त्तृत्वाद्युपपत्त्यर्थं चेत् कर्त्तृत्वं कीदृक् ? वास्तवमवास्तवं वा? वास्तवं चेत् "न तस्य कार्य्यं करणञ्च श्रूयते"इत्यादिभिः तस्य निष्क्रियत्वश्रुतेः न तत्सम्भवति।अवास्तवं चेत् न तेन कार्य्यनिष्पत्तिः सम्भवति । "पश्यत्यचक्षुः स शृणोत्यकर्णः" इत्यादिश्रुतेः तस्य कर्णधारणनिषेधात् कर्त्तृत्वाय तस्य करणधारणं न सम्भवति । ततश्च सृष्ट्यनुपपत्तिरितिवेदितव्यम्। अचक्षुषोऽपि दर्शनं श्रूयते इतिचेत् अजडस्यापि आत्मनः कथं न सृष्ट्यादिकर्त्तृत्वमुपपद्येत तस्मात् जड़त्वस्वीकारात् जडएव भट्ट इति वेदितव्यम् । अस्ति देहाद्यतिरिक्त ईश्वरः सर्वज्ञः सर्वशक्तिमानितिप्रतिपन्नोयोगी न सर्वथा परिशङ्कनीयः सर्वज्ञसर्वशक्तिमदीश्वरस्वीकारात् तथापीश्वरभिन्नायाः प्रकृतेः कृतजगत्कर्त्तृत्वकल्पनया ईश्वरस्य प्रधानपुरुषाधिष्ठातृत्वकल्पनया च ईश्वरस्य केवलं निमित्तकारणत्वमात्रस्वीकाराच्च भवत्ययमप्याक्षेपपात्रम् ईश्वरस्य प्रधानपुरुषाधिष्ठातृत्वेन न युक्तं जगत्कारणत्वम् उत्तमम-

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

ध्यमाधमभावेन सुखदुःखादिवैचित्र्यवज्जगद्रचयितूरागद्वेषादिवैषम्यप्रसक्तेरस्मदादिवदनीश्वरत्वं प्रसज्येत उक्तप्रसंगपरिहाराय ईश्वरस्यकर्मापेक्षत्वकल्पनया प्रवर्त्यप्रवर्त्तकयोःकर्मेश्वरयोरन्योन्याश्रयदोषः प्रसज्येत जगदनादित्वमपि न शक्तं प्रसक्तिहानाय जडत्वात् कर्मातीतमपि नेश्वरप्रेरकं युक्तं वर्त्तमानकर्मफलप्रदानाय। न च कर्मणः प्रेरणानुकूलमीश्वरप्रेरकत्वमितिवाच्यम् मानहीनाया निर्मूलाया अनवस्थायाः प्रसङ्गात्। अस्माकं तु "एष एव साधु कर्म कारयति तं यमेभ्यो-लोकेभ्यउन्निनीषते" इत्यादिनिरवद्या श्रुतिर्मानम्। अपिच अघटितघटनापटीयसीमायास्वीकारेण न किञ्चिदपिदुर्घटमस्माकमितिवेद्यम्। प्रधानपुरुषेश्वराणां निरवयवत्वात्। आश्रयाश्रयित्वभावानिरूपणात् सर्वगतत्वाच्च अधिष्ठेयाधिष्ठातृत्वभावोऽपि न सम्भवति। संयोगसमवायसम्बन्धद्वयस्याप्ययोगात्। अस्माकन्तु तादात्म्यसम्बन्धस्वीकारात् न किमप्यनुपपन्नमिति वेद्यम्। अस्माकं श्रुतिबलेनैव सर्वार्थप्रतिपादनम् प्रतिवादिनां सर्वं दृष्टमेव प्रतिपत्तव्यमित्ययमस्त्यतिशय इतिवेद्यम्। परस्यापि सर्वज्ञप्रणीतशास्त्रसत्त्वात् सममेवागमबलमितिचेन्न। परस्पराश्रयप्रसक्तेः आगमप्रतीतेः सर्वज्ञत्वप्रतीतिः सर्वज्ञत्वप्रतीतेरागमप्रतीतिरिति। अस्माकन्तु श्रुतिः स्वयं प्रमाणमेवालौकिकत्वात् कुम्भकारस्य रूपादिमद्घटनिर्माणे रूपादिमन्मृदादिसामग्री दृश्यते। न चेश्वरस्यास्य रूपादिमज्जगन्निर्माणे काचिद्रूपादिमती सामग्री दृश्यते। प्रधानरूपा सामग्री तु तद्विलक्षणा रूपादिहीना न युक्तेतिवेदितव्यम्। रूपादिहीनं चक्षुरादि करणवृन्दं पुरुष इव रूपादिहीनां प्रकृतिमीश्वरोऽधितिष्ठति इतिचेन्न। भोगदर्शनकरणाधिष्ठातृत्वप्रमापकम् नभोगदर्शनमीश्वरे स्वीक्रियते। स्वीकृतौ तु सुखदुःखभुजामस्माकमिव ईश्वरस्यापि संसारित्वं प्रसज्येत। एवमीश्वरस्य जगद्रचनां प्रति अप्रकृतिनिमित्तेश्वरकल्पयिता योग्यप्ययोग्योभवत्यप्रकृतिस्थः प्रकृतिस्थः साङ्ख्यसंसर्गादिति वेदितव्यम्। अपिच प्रवर्त्तनालक्षणादोषा-इतिनैयायिकसमयः तेनापि तार्किकमतेन अस्मत्पक्षपातिना सूच्यते रागादिदोषप्रयुक्त एव सर्वोजनः स्वार्थे परार्थे वा प्रवर्त्तते। दृश्यते च तथा लोके प्रवृत्तिः। अपिच स्वार्थ एव जनस्य परार्थप्रवृत्तिहेतुरपि दृश्यते। ततः प्रवर्त्तमानस्येश्वरस्य स्वार्थप्रसक्त्या निरीश्वरत्वप्रसक्तिरपि आपतति। तस्माद्भवद्भिरास्तिकैर्योगिभिः पक्षपातरहितैरेव भावव्यम् वैदिकानुयायिभिर्भवितव्यमित्यर्थः। न चोद्य-

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

मत्र दौर्जन्यम् पक्षपातादिदोषवहुलमस्मासु स्वपरयोर्मतमण्डनखण्ड-नाभ्यां यतः नात्र पक्षपातेन मतखण्डनम् किन्तु स्वरूपविप्रतिपत्ति-निरासेन तेषामद्वैतप्रियाणां मुमुक्षूणामधिकारिणाञ्च क्रमशोमोहनि-राकरणश्रद्धासम्वर्द्धनपूर्विका प्रतिपत्तिर्भूयादित्यनुकम्पयैवेतिवेद्यम्। इदानीं स्वरूपप्रतिपादनसमये भवति च पुनः शङ्कोत्थानम् किम्परि-माण आत्मेति ? अणुपरिमाण उत मध्यमपरिमाणः शरीरपरिमाण इतिभावः आहोस्वित् महापरिमाणइति "एषोऽणुरात्मा चेतसा वेदितव्योयस्मिन् प्राणः पञ्चधा संविवेश" इत्यादिश्रुतिभिः "वालाग्रशतभागस्य शतधाकल्पितस्य च। भागोजीवः स विज्ञेयः" इत्यादिस्मृतिभिश्च केषांचित् पाञ्चरात्रादीनां सम्मतिभिश्च तावत् अणुपरिमाण आत्मेतिसिद्धौ प्रत्युच्यते यदि चित्स्वरूप अ-ण्वात्मा तर्हि अण्वात्मदेशीयाणुरूपशरीरावयवातिरिक्ते सर्व्वत्र शरीरे शैत्यवोधो न स्यात् व्यापिज्ञानगुणवत्त्वमात्मनश्चे-तिनोक्तदोष इतिचेन्न। ज्ञानस्य ज्ञानरूपस्यात्मनश्च साधर्म्यात् गुणगु-णिभाव अनुपपन्नः वैधर्म्यएव तस्य दर्शनात् अवैधर्म्ये सकलशरीरव्या-पकः सर्व्वदेहगतशैत्यग्रहीता आत्मनोवोधोज्ञानाख्यगुणश्च आत्माति-रिक्तोन सम्भवति वैधर्म्यकल्पनायाञ्च जड़स्याण्वात्मनोगुणोज्ञानं सक-लतनुव्यापकं न स्यात् गुणस्य गुण्यधिकदेशवृत्तित्वायौगात् गुणगु-णिनोःसमानदेशत्वनियमात् इतियावत् अणुपरिमाणरूपा श्रुतिस्तु "सवा एष महानज आत्मा योयम्विज्ञानमयःप्राणेषु आकाशवत्सर्वगतश्च-नित्यः"इत्यादिश्रुतिविरोधपरिहाराय आत्मनःऔपाधिकपरिच्छिन्नत्वे तात्पर्य्यवती न वास्तवाणुत्वप्रतिपादिकेतिवेदितव्यम्। वालाग्रशतभा-गस्य"इत्युपक्रम्य "सचानन्त्याय कल्पते"इतिशिष्टस्वरूपवती स्मृतिर-पिऔपाधिकपरिच्छेदतात्पर्य्यवतीअणुत्वंप्रतिपाद्य याथात्म्यतात्पर्य्या-वलम्बिनी सती आनन्त्यमेवात्मनः प्रतिपादयतीतिवेदितव्यम् । ननु यथाहि शरीरैकदेशसम्बन्धी श्रीखण्डचन्दनविन्दुः सकलदेहाह्लादको-भवति तथादेहैकदेशवर्त्ती अणुरप्यात्मा सकलदेहव्यापकः शैत्यादि-ग्रहीता भविष्यति इतिचेन्न। दृष्टान्तदार्ष्टान्तिकयोरसादृश्यात् चन्दनस्य देहैकदेशत्वं प्रत्यक्षप्रमाणसिद्धम् नात्रानुमानं सम्भवति किमात्मनः सकलदेहगतवोधःत्वगिन्द्रियस्येव सकलदेहव्यापिनः किम्वा व्याप-कस्य गगनस्येव आहोस्वित् चन्दनविन्दोरिवाणोरेकदेशस्थस्येति-संशयसत्त्वात् "हृदि ह्येषआत्मा" इत्यादिश्रुतीनाम् अणुत्वप्रतिपा-

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

दकश्रुतिवत् उपाधिपरिच्छेदे तात्पर्य्यान्नाणुत्वसिद्धिः। ननु नीलकमलादिगुणिवृत्तिनीलादिगुणस्य गुण्यनधिकदेशवृत्तित्वमितिव्याप्तिस्तु गुणिदीपस्य प्रभागुणस्य अन्यदेशवृत्तित्वदर्शनात् व्यभिचरतीतिचेन्न। प्रभाया अपि द्रव्यत्वस्वीकारात् तेजोद्रव्यमेव निविडावयवं प्रदीपः प्रविरलावयवन्तु तेजोद्रव्यमेव प्रभेतिहेतोर्न व्यभिचारसम्भवः। गन्धगन्धिनोरप्राप्तेष्वपि कस्तूरीकुसुमादिषु केषुचिद्गन्धवत्सु गन्धानुभवात् अधिकदेशवृत्तित्वसम्भवात् पुनर्व्यभिचारशङ्केतिचेन्न। गन्धवत्सु वस्तुषु गन्धाश्रयस्यैव पृथ्वीतत्वस्य सूक्ष्मावयवत्वाभ्युपगमात् गन्धिनो गन्धनिःसरणेपि गुरुत्वाननुपलब्धिरवयवातिसूक्ष्मत्वाद्वेदितव्यम्। अन्यथा "पृथिव्यामेव तं विद्यादपोवायुञ्च संश्रितम् उपलभ्याप्सु चेद्गन्धं केचिद्ब्रूयुरनैपुणाः" इतिद्वैपायनोक्तेरप्रामाण्यम्प्रसज्येत् एवं नाणुपरिमाण आत्मेति सिद्धम्। आत्मा शरीरपरिमाण इत्यार्हता मन्यन्ते नतत्सम्भवः तथा सति "स वा एष महानज आत्मा" इत्यादिश्रुतिविरोधः प्रसज्येत्। यदि वेदवाह्यत्वेन नैते वेदविरोधभीता इतिचेत् युक्त्यापि न तदभिमतं आत्मनः शरीरपरिमाणत्वं सम्भवति शरीरपरिमाणत्वे आत्मनः परिच्छिन्नत्वं सम्भवति तस्मादनित्यत्वमपि घटते यद्यत्परिच्छिन्नं तत्तदनित्यम् घटादिवदित्यनुमानात् शरीरस्य नियतपरिमाणत्वाभावात् मनुष्यशरीरक आत्मा मनुष्यशरीरपरिमाणः किञ्चित् कर्म्मा विपाकोपस्थितहस्तिजन्मा कथं हस्तिशरीरं सम्पूर्णं व्याप्नुयात् तथा लघुरपि पीलिकाजन्मा कथं पिपीलिकाशरीरे मीयेत एकस्मिन्नपि जन्मनि बाल्यतारुण्यवार्द्धक्येषु समान एव तद्दोषप्रसङ्गः। ननु आत्मनः अनन्तावयवत्वं महदल्पशरीरयोः विकाशसङ्कोचशालित्वेन व्यापनप्रवेशसम्पादकमितिचेन्न अवयवानां एकदेशवृत्तित्वमनेकदेशवृत्तित्वम्वा। आद्यएकावयवदेशत्वपक्षे सर्व्वेषामवयवानां महिमानुपपत्तेः अणुरात्मा प्रसज्येत। द्वितीये नानन्तावयवाः परिच्छेदे सम्मीयेरन् इति शरीरमात्रावच्छिन्नत्वेऽवयवानां नानन्त्यमप्युत्प्रेक्षणीयम्। सङ्कोचविकाशदृष्टान्तत्वे न कूर्म्मावयवा योग्याः कूर्म्मावयवानां देशतः संख्यातश्चान्तवत्त्वदर्शनात् आत्मावयवानान्तु आनन्त्याभ्युपगमाच्च आत्मनः शरीरपरिमाणस्य उपचयापचयस्वीकारे चर्म्मादिवत् विकारित्वम् ततश्चानित्यत्वञ्च प्रसज्येत किञ्चावयववृद्ध्यपक्षयस्वीकारात् आगमापायिधर्म्मवत्त्वादवयवानां शरीरादिवदनात्म्यप्रसक्तिश्च

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

ततश्च निर्मोक्षप्रसङ्गः अयमेवावयव आत्मेत्यशक्यनिरूपण आत्मा नियामकहेत्वसत्वात् अपरिहार्य्यानात्म्यनिर्मोक्षदोषप्रसङ्गश्च किञ्च-आगच्छदपगच्छतामवयवानां कुत आविर्भावः तिरोभावश्च नच भूतानि आविर्भावतिरोभावस्थानानि उपपद्यन्ते अभौतिकत्वादात्मनः ततश्च तदवयवानां न कश्चिदन्यो विशेषोनिर्विशेषोवा अवयवाधारोभवितुमर्हति प्रमाणाभावात्। एवं नात्मा मध्यमपरिमाण इतिवेदितव्यम्। परिशेषात् "स वा एष महानज आत्मा" इत्यादिश्रुतिभिः औपनिषद्ब्रह्मशब्दस्यापि महत्त्वार्थकत्वात् वृहिवृद्धावितिधातोरर्थानुगमात् वृंहणात् व्यापनात् ब्रह्मेति व्युत्पत्त्या। श्रुतौ "सत्यंज्ञानमनन्तम्ब्रह्म" इत्यादिना ब्रह्मरूपात्मनः अनन्तपदेनसहप्रयोगदर्शनात् महापरिमाण आत्मेतिसिद्धम्। महत्वञ्च अनन्तपदवाच्यम् अन्तवत्त्वादिदोषवत्त्वे सर्व्वज्ञत्वादिगुणहीनत्वे अविद्यादिदोषसत्त्वे च न सम्भवति। ततश्च तस्य देशकालवस्तुकृतपरिच्छेदासत्त्वम् नित्यत्वम्। आविद्यकाशुद्धिशून्यत्वम् शुद्धत्वम्। जाड्यराहित्यं बुद्धत्वम्। बन्धावस्थायामपि शुद्धस्वभावात् स्वतोबन्धराहित्यात् मुक्तत्वम्। ज्ञानपदवाच्यत्वात् सर्व्वज्ञत्वम्। 'परास्य शक्तिर्विविधैव श्रूयते स्वाभाविकी ज्ञानबलक्रिया च" इत्यादिश्रुतिभिः सर्व्वशक्तिमत्वञ्चउपपद्यन्ते इतिवेदितव्यम्। आत्मा स भोक्तुरिति भोक्तुरकर्त्तुःसाक्षिणः जीवस्य-स ब्रह्मरूप ईश्वर आत्मास्वरूपमिति औपनिषत्समयः अत्रमुमुक्षुभिरिदं निपुणम्विचार्य्यताम्। वेदान्तेतरदर्शनानि अत्रासम्भावितानि किंव्यर्थानि ? सार्थकानिवा ? आद्ये महात्मनाम्भगवताम्विपश्चिताङ्कणाद–गौतम–कपिल–पतञ्जलि–जैमिनिप्रमुखानान्तत्रतत्र सम्मतिदर्शनात् प्रेक्षावतान्तदनुयायिनान्तत्र प्रवृत्तिदर्शनाच्च अनुपपत्तिरितिवाच्यम् परिशेषात्। द्वितीयेपक्षे स्वीकृते तु सार्थकानि तानि दर्शनानि किमर्थम्प्रवृत्तानि इति?। तत्रोच्यते परमपुरुषार्थपरम्परासाधनभूतानीतिवेदितव्यम्। "असत्ये वर्त्मनि स्थित्वा ततः सत्यं समीहते" इतिवचनात् अरुन्धतीन्यायाच्च। अत्र वैदिकब्रह्मज्ञानोत्पत्तौ अस्माभिः वेदान्तेतरदर्शनानां खण्डनमुखेन वैयर्थ्यं ध्वनितं ततः नैषां सर्व्वत्र-वैयर्थ्यं वेदितव्यम् वैयर्थ्यसार्थकत्वयोरेकाधिकरणवृत्तित्वाभावात् दृश्यते लोके तरुणी द्वितीयाश्रमे पुत्रादिप्रयोजना तुर्य्याश्रमेनिष्प्रयोजना चेतियथाक्रमं यथामति प्रतिदर्शनम् एकैकसाधनत्वम्प्रदर्श्यते। कणादगौतमौन्यायदर्शकौ सप्रमाणयुक्तिप्रदर्शनपूर्व्वकम् मनसःपरमपुरुषार्थ-

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

साधनीभूतमननसामर्थ्यं साधयतः परिचाययतश्च किञ्चिद्विशेषणविशिष्टमीश्वरम्। कपिलः साङ्ख्याचार्यो भगवान् प्रकृतिपरिचयेन वैराग्यं समुत्पाद्य तत्पदवाच्यस्य परमात्मनः आत्मभूतमवस्थान्तरापन्नम् जीवम् परिचाययति। प्रकृतिपुरुषान्यताख्यातिश्च प्रख्यापयति। भगवान् पतञ्जलिर्योगाचार्य्यः परमपुरुषार्थसाधनसमाधिं मनःकषायापहम् प्रतिपाद्य किञ्चिदूनब्रह्मलक्षणलक्षितं क्लेशकर्म्मविपाकाशयापरामृष्टम्पुरुषविशेषमीश्वरम्परिचाययति । किञ्चित्समयपरिमितान्तुरीयावस्थान्दर्शयति च । जैमिनिर्मीमांसाचार्य्यः धर्म्मशास्त्रप्रवर्त्तकः ऐहिकामुष्मिकफलप्रदःऽपूर्व्वप्रतिपादकः परमपुरुषार्थपूर्व्वसाधनीभूत पापानुत्पत्तिध्वंसहेतुफलप्रयोजकसकलकर्म्माणि प्रतिपाद्य बाह्याभ्यन्तरशुद्धिं सम्पादयति श्रौतम्पूजितविचारं दर्शयति रागिणं यथाक्रमम्परमपुरुषार्थसाधनीभूतान्तःकरणशुद्ध्या ज्ञानाधिकारिणं सम्पाद्य पारम्पर्य्येण सिद्धिं संसाधयति "कर्म्मणैव हि संसिद्धिमास्थिता जनकादयः" इत्यादिस्मरणात्। केषाञ्चित् कर्म्मानपेक्षा नैसर्गिकी सिद्धिः दृश्यते शुकादीनाम् तत्र प्राक्तनसम्पादितकर्म्मशुद्धिसत्वसम्पादिता सिद्धिर्वेदितव्या। अत्रदेहात्मवाद्यादि शून्यात्मवाद्यन्ता नास्तिका दुर्दैवतः शोच्या एव वेदबाह्यत्वात् शिष्टापरिगृहीतत्वाच्च । स्वरूपप्रतिपादनसमये भवति समाक्षेपः किमिदम्ब्रह्मस्वरूपम्प्रमेयम्वा प्रमेयत्वे किम्प्रत्यक्षस्य विषयःकिमनुमानस्य किमुपमानस्य किमर्थापत्तेः किमागमस्येति नाद्यः"अशब्दमस्पर्शमरूपमव्ययम् " इत्यादिश्रुतेः ब्रह्मणः प्रत्यक्षगुणशब्दाद्यविषयत्वात् । नद्वितीयः "नैव तस्य च लिङ्गम्" इत्यादिश्रुतेः "अचिन्त्याःखलु ये भावा न तांस्तर्केण योजयेद्"इति। प्रकृतिभ्यःपरं यच्च तदचिन्त्यस्य लक्षणम्" इत्यादिस्मृतेः । अनुमानस्य लिङ्गिलिङ्गविषयत्वात् चिन्तनानुकूलत्वाच्च। न तृतीयः गोसदृशोगवय इति। सति सादृश्ये उपमानं सम्भवति"न तत्समश्च"इत्यादिश्रुतिभिः तदनुपपत्तेः। न चतुर्थः खल्वव्यापकवस्तुनः एकत्र भावादनुपलब्धावन्यत्रादर्शनेपि भावज्ञानम् अर्थापत्तिः। यथाजीवतोदेवदत्तस्य एकत्र भावदर्शने न अन्यत्रभावस्यादृष्टस्य कल्पनम् ब्रह्मणः व्यापकत्वात् सर्व्वत्रासत्वसम्भवात् भावरूपत्वात् "यतो वा इमानि भूतानिजायन्ते यतोजातानि जीवन्ति यत्प्रयन्त्यभिसंविशन्ति"इत्यादिश्रुत्या कालत्रये सत्ताश्रवणात् "आकाशवत्सर्व्वगतश्च नित्यः" इत्यादि श्रुत्या व्यापकत्वश्रवणाच्च "नाभावोविद्यते सतः" इत्यादिस्मृत्या असत्तानिषेधाच्च

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

नपञ्चमः "यत्तदद्रेश्यमग्राह्यम्" "यतो वाचोनिवर्त्तन्ते" इत्यादिश्रुतिभिः आत्मनः आगमाप्रमेयत्वम् श्रूयते "तन्त्वौपनिषदम्पुरुषम्पृच्छामि" इत्यादिश्रुत्या आत्मनः उपनिषद्गम्यत्वं श्रूयते ततः अप्रमेयत्वप्रतिपादिकायाः श्रुतेः उपनिषद्गम्यत्वेन प्रमेयत्वप्रतिपादिकायाः श्रुतेश्च परस्परम्विरोधः सम्भवति उभयोर्म्मध्ये कस्याश्चिदप्रामाण्यम् प्रसज्येत तत्तु न युक्तम् श्रुतेः अपौरुषेयत्वात् स्वतः प्रमाणत्वाच्च तत्रोच्यते आगमप्रमापणम् न सदसतः परम् ब्रह्मस्वरूपम् नामरूपजातिगुणादिहीनम् इदमो निर्द्देशेन स्वरूपलक्षणेन प्रभावयितुं शक्नुयात् किन्तु अतद्व्यावृत्या अपवदन्नध्यारोपम् मायिकं नेतिनेत्यादिश्रुतिभिः "यन्नकिञ्चित्तदेवतत्" इत्यादिस्मृतिभिश्च तटस्थलक्षणेनैव तल्लक्षयति। तत्र त्रिविधानां शब्दप्रवृत्तीनामयोगात् अतद्व्वृत्या एव योगाच्च। शब्दप्रवृत्तयस्तु मुख्यालक्षणागौणीभेदेनत्रिधा। मुख्यापि रूढियोगभेदेन द्विधा। रूढिःनाम्ना स्वरूपेण जात्या गुणेन च निर्द्देशार्हे वस्तुनि संज्ञासंज्ञिभेदेन प्रवृत्तिभेदेन प्रवर्त्तते। यथा डित्थोगौः श्वेत इति। लक्षणा च तेनैव सङ्केतेनाभिहितार्थसम्बन्धिनि। यथागङ्गायां घोषइति। गौणी चाभिहितार्थलक्षितगुणयुक्तेतत्सदृशे वा यथा सिंहोदेवदत्तइति। तथास्मर्य्यते "अभिधेयाविनाभूतप्रवृत्तिर्लक्षणेष्यते। लक्ष्यमाणगुणैर्योगात् वृत्तेरिष्टा तु गौणता" इति। योगवृत्तिस्तु एतत्त्रिविधप्रतिपादितपदार्थयोः प्रकृतिप्रत्ययार्थयोर्वा योगेन-यथाजलजमौपगवः पाचकः खड्गशूलो हन्तीति सिंहोग्निर्माणवकइति। तत्रानिर्द्देशे ब्रह्मणि रूढवृत्तिर्न सम्भवति निर्गुणे गुणवृत्तिर्न सम्भवति सदसतः परे कार्य्यकारणाभ्यामपरिस्मिन्नसङ्गे केनचिदपि सम्बन्धाभावान्न लक्षणगुणवृत्ती सम्भवत इत्यर्थः। अथ अतद्व्यावृत्तिरूपशब्दप्रवृत्तिप्रकारः प्रदर्श्यते "परेण नाकं निहितं गुहायां विभ्राजते यद्यतयोविशन्ति" इत्यादिश्रुत्या ब्रह्मणो गुहानिहितत्वम्प्रतिपाद्यते ततश्चपञ्चकोशनिरासेन सर्वान्तरात्मा ब्रह्मेतिलक्ष्यते। तावत्कोशपञ्चकं क्रमेण निरस्यते "एष आत्मा अन्नमयः" इत्यादिश्रुत्या अन्नमयपदवाच्यदेहः आत्माभवितुमर्हति तत्रोच्यते जनकजननीभुक्तयवव्रीह्याद्यन्नजः शुक्रशोणितसम्भूतः क्षीराद्यन्नवर्द्धितः प्रागूर्ध्वञ्च अभावभूतः प्राक् जन्मनि अस्यासतोदेहस्य स्वारम्भककर्म्मोपादकत्वासम्भवात् भाविजन्मनि अस्यासतोदेहस्य वर्त्तमानशरीरसम्पादितकर्म्मणो भोगो न सम्भवति तथा सति अकृताभ्यागमकृतप्रणाशदोषप्रसङ्गात् देहोनात्माभवितुमर्हति श्रुतिस्तु सोपानरूपिणी स-

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

स्वान्तरत्वप्रतिपादनतात्पर्य्यवतीतिवेद्यम् । "अन्योऽन्तर आत्मा प्राणमयः" इत्यादिश्रुतिभिः प्राणमयकोशवाच्यः प्राणः आत्माभवितुमर्हति। तत्रोच्यते वायुः पदादिमस्तकपर्य्यन्तं व्याप्तः देहेबलं प्रयच्छन् इन्द्रियाणाम्प्रवर्त्तकः प्राणपदवाच्यः नात्माभवितुमर्हति अचैतन्यात् अन्नमयत्वाद् बुभुक्षापिपासावत्वाच्च। श्रुतिस्तु पूर्व्ववदेवज्ञातव्या। "अन्योऽन्तर आत्मा मनोमयः" इत्यादिश्रुत्या मनोमयकोशपदवाच्यं मनः आत्मा भवितुमर्हति। तत्रोच्यते देहेऽहम्भावं गेहादौ मदीयत्वाभिमानं कुर्वत् कामक्रोधादिवृत्तिमत्वेनानियतस्वभावम् अन्नमयं मनः नात्माभवितुमर्हति । अत्रविशेषणनिष्ठहेतुगर्भत्वम्वेदितव्यम् । श्रुतिस्तु पूर्व्ववदिति च वेदितव्यम्। "अन्योऽन्तर आत्मा विज्ञानमयः" इत्यादिश्रुत्या विज्ञानमयकोशपदवाच्या बुद्धिरात्माभवितुमर्हति। तत्रोच्यते चिदाभासयुक्ता सुषुप्तिकाले विलयनस्वभावा जागरणकाले आनखाग्रपर्य्यन्तम् वपुषि वर्त्तमाना स्वप्नकालेपि वृत्तिमती बुद्धि र्नात्मा भवितुमर्हति विलयाद्यवस्थावतत्त्वात्। श्रुतिस्तु पूर्व्ववदेव वेदितव्यः। ननु मनोबुद्ध्योरन्तःकरणत्वसामान्यात् नोपपन्ना मनोमय विज्ञानमय रूपेण कोशद्वयकल्पनेति समाक्षेपे समाधानम् सत्यपि अन्तःकरणसामान्ये अन्तःकरणकर्त्तृत्व करणत्वाभ्याम् परिणमते ततः कर्त्तृकरणे विज्ञानमनःशब्दवाच्ये भवत इत्यर्थः। प्रसिद्धञ्च मनोविमर्शात्मकं सङ्कल्पविकल्पात्मकमितियावत्। बुद्धिश्च निश्चयात्मिका अध्यवसायात्मिकेतियावत् "तैरन्तःकरणं सर्व्वैर्वृत्तिभेदेन तद्द्विधा । मनोविमर्शरूपं स्याद्बुद्धिःस्यान्निश्चयात्मिका" इत्युक्तेः । दृश्यतेऽपि एकस्यैव देवदत्तस्य याचकत्वपाचकत्वरूपवृत्तिभेदेन याचकत्वम्पाचकत्वञ्च। एक एव देवदत्तः याञ्चाकाले याचकः कथ्यते पाककाले पाचकश्चेतिभावः। तैत्तिरीयशाखायामन्नमयम्प्राणमयम्मनोमयम्विज्ञानमयञ्च अनुक्रम्याम्नायते "तस्माद्वा एतस्माद्विज्ञानमयादन्योऽन्तर आत्मानन्दमयः" इत्यादि अविद्यारूप कारणशरीरावच्छिन्नः भोक्ता आनन्दमय कोशपदवाच्यः प्राज्ञः आत्मा भवितुमर्हति तत्रोच्यते पुण्यकर्म्मफलानुभवकाले काचित् अतिसूक्ष्मत्वेन अनिर्वचनीयेतियावत्। बुद्धिवृत्तिः अन्तर्गा सती आनन्दप्रतिविम्बभासिनीभवति आत्मस्वरूपस्य आनन्दस्य प्रतिविम्बं भजते इतियावत् सैव पुण्यकर्म्मफलभोगोपरमे सति निद्रारूपेण लीयते सैव वृत्तिः प्राज्ञचैतन्यावस्थितिः प्राज्ञस्य प्राज्ञत्वकारिणी। प्राज्ञत्वं नाम प्रकर्षेण अज्ञत्वम् तस्य सम्पादिनीति यावत् "सति सम्पद्य न विदुः सति सम्पद्या-

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

महे" इत्यादिश्रुतेः तप्तायःपिण्डवत् प्रतिविम्बभाग्धीवृत्तिप्रतिविम्ब-रूपप्राज्ञयोस्तादात्म्यम् वेदितव्यम्। ततश्च प्राज्ञभिन्नत्वमिवापन्ना सैव वृत्तिः आनन्दमयकोशपदवाच्या भवति। भवतु वा तद्वृत्तिमान् प्राज्ञः आनन्दमयकोशपदवाच्यः प्रतिविम्बरूपश्चिदाभास इति यावत्। अय-मप्यानन्दमयोनात्मा भवितुमर्हति कादाचित्कत्वात् वृत्तिवृत्तिमतोरु-भयोरपि कादाचित्कत्वं अनियताल्पकालिकत्वं प्रसिद्धमेव सुषुप्तौ तथा दर्शनात्। ननु विद्यमानानामानन्दमयादीनां सर्वेषामनात्मत्वस्वी-कारे क आत्मेत्याकाङ्क्षायामुच्यते "ब्रह्म पुच्छं प्रतीष्ठा" इत्यादिश्रुतेः बुद्ध्यादौ प्रतिविम्बतयावस्थितस्य प्रियादिशब्दवाच्यस्य आनन्दमय-स्य विम्बभूतः कारणभूत इति यावत्। य आनन्दः असावेवात्मा भवति। सर्व्वदा स्थितेः नित्यत्वादितियावत्। "रसो वै सः, रसं ह्येवायं लब्ध्वानन्दी भवति। कोह्येवान्यात् कः प्राण्याद्यदेष आकाश आनन्दो न स्यात्। एष ह्येवानन्दयति। सैषानन्दस्य मीमांसा भवति आनन्दो ब्र-ह्मेति व्यजानात् विज्ञानमानन्दम्ब्रह्म" इत्यादिश्रुतिभ्यश्च। ननु "आन-न्दमयोऽभ्यासात्" इत्यत्र ब्रह्मसूत्र आनन्दमय एवात्मेति स्वीक्रियते। अभ्यासात् ब्रह्मण्येव बहुकृत्व आनन्दशब्दप्रयोगात् ततः सूत्रकारस्य भगवतोव्यासस्यानुमत्या आनन्दमय एवात्मा उपपद्यते। स्यादेतत् यदि ब्रह्मणः आनन्दात्मनः प्रतिपादिकासु श्रुतिषु आनन्दमयशब्दप्रयोगो लभ्येत। न च स लभ्यते। किन्तु आनन्दपदमात्रस्यैव प्रयोगो दृश्यते। "विकारशब्दान्नेति चेन्नप्राचुर्य्यात्" इत्यत्र ब्रह्मसूत्रे आनन्दोत्तरमयट आनन्दविकारार्थत्वं प्रतिषिध्य आनन्दप्राचुर्यार्थकत्वं प्रतिपादयति। तन्न आनन्दमये प्रतिविम्बरूपे सम्भवति प्रतिविम्बस्य चिदाभासस्य प्राज्ञस्य आवृतस्वरूपत्वात्। ततः प्रतिभाति ब्रह्मसूत्रे शाङ्करभाष्ये आनन्दमयशब्दप्रयोगः आनन्दमयकोशगतानन्दप्रतिविम्बकारणभूता-नन्दपर एवेति वाच्यम्। भवति तत्परत्वोपपत्तिः विम्बस्य प्रतिविम्बेन सह सम्बन्धसम्भवानुकूललक्षणावृत्तियोगात्। यद्वा आनन्दरूपवि-म्बस्य आनन्दमयरूपप्रतिविम्बस्य च न वास्तविको भेदः भेदस्य मायिकत्वात् ततस्तयोर्विम्बप्रतिविम्बयोरभेदाभिप्रायेणैव आनन्दा-भिन्ने आनन्दमये आत्मत्वं स्वीकृतं परन्तु मायिकभेदस्वीकारेणैव बन्धमोक्षाभ्युपगमात् मायिकभेदं स्वीकृत्यैव पञ्चदश्यादौ आनन्दस्यै-वात्मत्वंस्वीक्रियत इति। तस्मात् सर्व्वमनवद्यं व्याख्यानमिति वेदित-व्यम्। इदं न इदं न इति। नेति नेति उपदिशन्ती काण्ववाजसनेयिक-

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

श्रुतिः निषेधावधित्वेन अद्वयम्ब्रह्म अशेषयत् "आदिशन्त्यथ नेति नेति निषिद्धरूपमशेषतः काएववाजसनेयिकश्रुतिरप्यशेषपदद्वयम्,, इत्याद्युक्तेः "यन्न किञ्चित्तदेव तत्,, इत्यादिस्मरणाच्च अतद्व्यावृत्त्या निषेधावसानभूमिर्ब्रह्मेति वेदितव्यम्। तच्च अखण्डसच्चिदानन्दरूपं श्रुतिस्मृतिप्रसिद्धमितिवेद्यम् तदेवजीवस्य संसारिणः चित्प्रतिविम्बस्य विम्बरूपः कारणभूतः स्वरूपमिति वेदितव्यम्। तस्यैव विस्मृतिः "अनुभूतविषयासम्प्रमोषः स्मृतिः,, इति पातञ्जलोक्तेः अनुभवजन्यसंस्कारजन्यज्ञानविषयीभूता चित्तवृत्तिः स्मृतिरिति यावत्। ग्रहणाकारपूर्व्वत्वग्राह्याकारपूर्व्वत्वाभ्यां बुद्धिस्मृती भिद्येते। सा च स्मृतिः द्विधा भावितस्मर्त्तव्या अभावितस्मर्त्तव्या चेति।स्वप्ने भावितस्मर्त्तव्या जाग्रति त्वभावितस्मर्त्तव्येति सर्व्वाः स्मृतयः प्रमाणविपर्य्ययविकल्पनिद्रास्मृतीनामनुभवात् प्रभवन्ति। तस्या एव स्मृत्याः पूर्व्वभावरूपायाः पश्चात् असत्ता किञ्चित्कारणनिवन्धना विस्मृतिःसंसृतिः पूर्व्वव्युत्पादिता संसार इति वेदितव्यम्। तत्र शङ्क्यते संसारस्य अनादित्वात् जीवस्य स्वरूपानुभवायोगात् कथं स्वरूपविस्मृतिः सम्भवति। तत्रोच्यते प्रलये सुषुप्तौ च जीवात्मा स्वरूपसम्पन्नो भवति। "सता सौम्य तदा सम्पन्नः स्वमपीतो भवति,, इत्यादिश्रुतेः "आसीत् सदैव हि भवान् सम्पद्य यत्र मधुनीव रसाः सुषुप्तौ,, इत्यादिस्मृतेश्च सुषुप्तिप्रलयकालीनस्यैवानुभूतस्य स्वरूपस्य विस्मृतिरत्रोच्यते इति वेदितव्यम्। भवति च श्वेतकेतूपदेशश्रुतिस्वरसावलम्बिनी स्मृतिः "अब्धिर्यथाजलधरैरुपनीयनीतोनद्यादिभावमुदधित्वमतिं जहौ स्वाम् एवम्भवानुपधिभिः खलु विस्मृतः स्वम् सद्ब्रह्म तत्त्वमसि संस्मर पूर्णभावम्" इति। भवति च पुनः शङ्कोत्थानम् किङ्कारणनिवन्धनाविस्मृतिरेषेति। तत्रोच्यते "सतिसम्पद्य न विदुः सति सम्पद्यामहे सुखमहमस्वाप्सम् नैव किंचिदवेदिषम्,, इत्यादिश्रुतेः "अविद्यावशगस्त्वन्यस्तद्वैचित्र्यादनेकधा। साकारशरीरं स्यात् प्राज्ञस्तत्राभिमानवान्" इत्याद्युक्तेश्च सुषुप्तौ अज्ञानसद्भावो दृश्यते। ततः प्रलयकालेपि अज्ञानसद्भावोनुमीयते सुषुप्तिप्रलययोः सादृश्यात् तयोः साहचर्य्याच्च अज्ञानस्यैव विस्मृतिकारणत्वमुपपद्यते "अन्नम्प्राणोमनोबुद्धिरानन्दश्चेति पंचधा। कोशास्तैरावृतः स्वात्मा विस्मृत्या संसृतिं व्रजेत्" इत्यादिवचनात् अत्रवाक्ये आवृतशब्दश्रवणेन आवरणकारिणी आवृतिशक्तिरविद्यापदवाच्या अनुमीयत इति वेदितव्यम्। अस्याः स्मृतेः

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

स्वारस्यात् सर्व्वत्र कोशेषु अवस्थात्रयरूपेषु विस्मृतस्वरूप एव विद्यते। अवस्थानां तुर्येतराणाम्बुद्ध्यवस्थानभूतसांसारिकदशात्वाभ्युपगमात् परन्तु तथा सति सुषुप्तिदशायामपि सांसारिकदशात्वम्प्रसज्यत एव। तत्रोच्यते अविद्यासद्भावात् तत्रापि सांसारिकदशात्वमस्त्येव परन्तु स्वरूपसम्पत्त्या वेदप्रमाणसिद्धया सौषुप्तसर्व्वभोगोपरमसौख्यदर्शनाच्च स्वरूपसम्पन्निष्ठमसांसारिकदशात्वमितरावस्थाविलक्षणमुपपद्यत एव इति।

अत्रभाष्ये स्वरूपविस्मृतिरूपसंसारहेतुत्वेन आवृतिशक्तिरूपा अविद्याप्रतिपादिता सैवात्र अग्रिमसूत्रे श्रीमता सूत्रकारेण विशदीक्रियते।

तद्धेतुरविद्या देहादावात्मबुद्धिस्वरूपा अनादिः सान्ता च १।१।४॥

तद्धेतुरत्र तच्छब्देन तृतीयसूत्रादिमावयवभूतसंसृतिशब्दस्य उपसर्ज्जनस्यापि सन्निकृष्टस्वरूपविस्मृतिशब्दलक्ष्यभूतस्य अविद्याकार्य्यत्वेन प्रसिद्धस्य परामर्शः तस्याः संसृतेः हेतुः कारणम् तद्धेतुः संसृतिकारणमितियावत्। अविद्या "विदज्ञाने" इतिधातोरर्थानुगमात्। विद्याशब्दस्य ज्ञानार्थकत्वम्वेदितव्यम्। न विद्या अविद्या ज्ञानप्रतिद्वन्द्वि अज्ञानमितियावत्। अहमज्ञोस्मि इत्यनुभवप्रमाणात् सिद्धमनाद्यज्ञानम् अहम्पदलक्षितशुद्धचैतन्ये स्थितमशुद्धचिद्रूपस्वरूपग्राहकम्चैतन्यम् आत्मस्वरूपम् आवृत्य सर्व्वज्ञत्वनिरतिशयानन्दत्वादिनैजम्भावम्प्रच्छाद्येतियावत् चैतन्यसत्तयैव स्फुरति प्रसिद्ध्यतीतियावत्। यथा- राहुः तमोरूपः चन्द्रम्प्रकाशरूपमाच्छाद्य चन्द्रचन्द्रिकयैवस्फुरति। तमोरूपोलोके दृश्यत इतियावत्। तच्च अज्ञानम् आवरणानन्तरम् मिथ्यैव संसारिणः संसारमुद्भावयति। अहमिदमित्यादिभ्रमेण संसारिणं चेतनं भ्रमयतीतियावत्। तच्चाज्ञानंदुर्निरूपं चित्यध्यस्तत्वात् स्वरूपतो ब्रह्मभिन्नत्वादसत्। चिद्गतेदंतयास्फुरत् ब्रह्माभिन्नत्वेसत् इति स्वप्नवदनिर्वचनीयमितिवेद्यम्। स्वसिद्धौ स्वहेतुत्वाद्दृष्टेः सकलाध्यासहेत्वज्ञानाध्यासे हेत्वन्तरासिद्धेर्नाज्ञानरूपाविद्यारिति चेदुच्यते या चिद्भाने चितिरिव भेदे भिदेव निजपरयोर्निर्वाहे स्वतः समर्था सम्भाव्येतरघटनापटीयसी सा अविद्या विलासेन जीवत्वादिमहाभ्रान्तिं जनयति अध्यासम्प्रकटयतीति यावत्। सामान्यतो भासमानेपि वि-

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

शेषतः अभासमाने पदार्थे आरोप्यभिन्ने आरोप्यबुद्धिः अध्यासः सचाध्यासः अहमिति भासमाने प्रत्यगात्मनि साक्षिणि साक्षात्प्रतीयते अज्ञोहम् स्थूलोहम् मनुष्योहम् निर्बलोहम् मैथिलोहमित्याद्यहन्तारूपः मम पुत्राः कथं जीवेयुरित्यादि ममतारूपश्च स एषः अहन्ताममतारूपोध्यासः द्विविधः। आत्मनि अनात्मधर्म्मारोपरूप एकः। अनात्मनि आत्मधर्मारोपरूपोद्वितीयः। तद्यथा शुद्धोहम्बुद्धोहमानन्दोहम् स्थिरोहमित्यादि शुद्धत्वाद्यात्मधर्म्माणामनात्मनि देहे अध्यासः। युवाहम् गौरोहम्पटुरहमिति आत्मनि देहधर्माणामध्यासः। इत्युभयविधः परस्परतादात्म्यसंसर्गाध्यास इतिवेदितव्यम्। सामान्यभासमानत्वेपि विशेषाभासमनत्वे दृष्टान्तम्प्रदर्श्यते। ततश्च दार्ष्टान्तिकमप्यज्ञानम् प्रदक्ष्यते वक्ष्यमाणयोक्त्या "अध्येतृवर्गमध्यस्थ पुत्राध्ययनशब्दवत्। भानेप्यभानम्भानस्यप्रतिबन्धेनयुज्यते। प्रतिबन्धोस्तिभातीति व्यवहारार्हवस्तुनि। तन्निरस्य विरुद्धस्य तस्योत्पादनमुच्यते। तस्यहेतुः समानाभिहारः पुत्रध्वनिश्रुतौ। इहानादिरविद्यैव व्यामोहैकनिबन्धनम्" इति अत्र स्मृतौ इहशब्देन सामान्यतो भासमानात्मवस्तुनि विशेषतः अभासमाने इत्यर्थोवेदितव्यः। अत्राहमज्ञोस्मीत्यनुभवात् अहमात्मनि अज्ञानम्प्रतिपादितम्। अहमात्मा च अशुद्धं चैतन्यं प्रतिपादितम् तत्रकथम् अहमितिशब्देन शुद्धञ्चैतन्यमेव प्रतिपाद्यते नान्येपदार्थाः इतितत्रोच्यते अहम्प्रत्ययार्थो देहोवा प्राणोवा इन्द्रियाणिवा मनोवा ऽहङ्कारोवा विश्वोवा तैजसोवा प्राज्ञोवा आद्येस्वप्नदेहोवा जाग्रद्देहोवा उतोभयम्वा। नाद्यः जाग्रतिनाहमस्मीति तवाभावप्रसङ्गात् प्रत्यक्षविरोधाच्च स्वप्नदेशनाशात् अहमर्थस्यापि नाशप्रसङ्गात् न द्वितीयः स्वप्नेपि यस्य कस्याप्यहम्प्रत्ययस्योदयात्। मृतेदेहे विद्यमानेप्यहम्प्रत्ययोदयादर्शनाच्च। न तृतीयः द्वयोः सामानाधिकरण्यायोगात्। नादिमो द्वितीयः पक्षः स्वभावजड़त्वात् प्राणस्य जाग्रति स्वप्ने च निजपरयोरज्ञातृत्वाच्च तृतीये एकस्य वा इन्द्रियस्य सर्व्वेषाम्वाहमर्थत्वं शब्दादिष्वेकस्यैवार्थस्य उपलब्धिप्रसङ्गात्। शब्दादेः सर्व्वस्य सर्व्वत्रोपलब्धिदर्शनात् प्रत्यक्षविरोधः प्रसज्येत। न द्वितीयः अहम्मनुष्य इत्यत्र करणादीनाम् प्रत्येकम् मनुष्यशब्दार्थत्वे मनुष्यबहुत्वसिद्धौ अयमेकोमनुष्य इति प्रत्यक्षसिद्धमनुष्यैकत्वव्यवहारविरोधात् अहञ्चक्षुषापश्यामि पाणिना स्पृशामि इति दृगादिभ्यो भिन्नस्याहमर्थत्वस्य सिद्धौ इन्द्रियाणां तदनुपपत्तेः। नापिचतुर्थः

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

चक्षुरादिवत् करणसादृश्यात् "मनसाह्येव पश्यति" इति श्रुतेः करणत्वेननिर्देशविरोधाच्च । नापि पञ्चमः विकारित्वात् ज्ञातृत्वानुपपत्तावहमर्थत्वानुपपत्तेः सुषुप्तौ लयदर्शनाच्च अयमहङ्कारी अयं निरहङ्कारी इति अहङ्कारस्य अनैकान्तिकत्वात् शैशवे यथा द्राक्षाभुक्तेति तेन तेन सहैव विकारेण विनश्यतोऽहङ्कारस्य विकारिणः शैशवे भुक्तद्राक्षानुभूतिरचिरकालिकाचिरकालानन्तरम् वृद्धत्वे नोपपद्यते तदनुपपत्तावहमर्थत्वं न सम्भवति नापिषष्ठो नापिसप्तमो नाप्यष्टमश्च विश्वादीनाम्प्रत्येकम् जाग्रत् स्वप्न सुषुप्ति दशावत्त्वात् अन्वयव्यतिरेकभागित्वात् योहम् स्वप्न मद्राक्षम् योहम् सुखमस्वाप्सम् सोहम् जागर्मि इत्यन्यस्य स्थानत्रयविलक्षणस्य नित्यसत्ताकस्य अहम्प्रत्ययार्थस्य सत्त्वात् "शिवं शान्तञ्चतुर्थम्मन्यन्ते" इत्यादिश्रवणात् "त्रिषु धामसु यद्भोग्यम् भोक्ता भोगश्च यद्भवेत्। तेभ्यो-विलक्षणः साक्षी चिन्मात्रोहं सदाशिवः" इत्यादिस्मरणाच्च विकल्पिते-देहादिप्राज्ञपर्य्यन्ताष्टकान्यस्यात्मनः सिद्धान्तपक्षेनिर्देशात् सिद्धनित्योपलब्धिरूपस्यैवात्मनः नित्यानिर्लुप्तज्ञानरूपस्य वास्तविकमहम्प्रत्ययार्थत्वम् न तदाश्रितायाः अविद्याया इति वेदितव्यम् । अविद्यायाः संसारहेतुत्वम् "मयाध्यक्षेणप्रकृतिः सूयतेस चराचरम् । हेतुनानेन कौन्तेय जगद्विपरिवर्त्तते । आत्माज्ञानाज्जगद्भाति तज्ज्ञानाद्भासते नहि । रज्ज्वज्ञानादहिर्भाति तज्ज्ञानाद् भासते नहि" इत्यादि भगवद्गीताष्टावक्रगीतावाक्याभ्यामपि स्मर्य्यते । सा अविद्या किंलक्षणा इत्याकाङ्क्षायां भगवान्सूत्रकारः अविद्याया विशेषणानुवादेन तल्लक्षणम्प्रतिपादयति "देहादावात्मबुद्धिस्वरूपेति" अपि च आदिपद लक्षितगेहादौ आत्मीयबुद्धिस्वरूपेति वेदितव्यम् । अध्यासस्य अहन्ताममतारूपद्वैविध्यप्रसिद्धेर्देहादावात्मबुद्धिस्वरूपेति एकदेश-प्रदर्शनेन आत्मनि देहादिबुद्धिस्वरूपा इत्यपि योजनीयम् वेदितव्यम् अनात्मनि आत्मधर्म्मारोपरूपत्वेन च अध्यासस्य द्वैविध्यप्रसिद्धेः यथा च प्रदर्शितमप्यत्रैव चतुर्थसूत्रभाष्ये अध्यासस्वरूपप्रतिपादनावसरे अविद्यास्वरूपप्रदर्शनार्थम् सूत्रकारस्वरसानुसारभगवान् पतञ्जलिर्योगाचार्य्यः अविद्याम्विशिनष्टि वक्ष्यमाणयोगसूत्रेण "अनित्याशुचिदुःखानात्मसु नित्यशुचिसुखात्मख्यातिरविद्या" इति अनित्ये अध्रुवे प्राकृतिकवस्तुनि नित्यख्यातिः ध्रुवत्व निश्चायिकाबुद्धिः तद्यथा ध्रुवा भूमिः ध्रुवः स्वर्गः अमृताः स्वर्गिण इति।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

तथा अशुचौ अपवित्रे परमबीभत्से देहे शुचिख्यातिः पावित्र्यग्रहः यथा लालाष्ठीवश्लेष्मागारम् कामिनीमुखम् शारदपूर्णनिशाकरम् तस्याः उत्तानमृतमण्डूकनिभम् अवमेहनभूमिम् परमसुखावनिम्मनोजराजधानीम्मन्यन्ते रागिनोमूढाः इति। एतेन अधर्म्मे धर्म्मप्रतीतिः अनर्थे चार्थप्रतीतिरपि वेदितव्या तथादुःखे मनउद्वेगनिमित्तेवस्तुनि सुखख्यातिः मनःप्रसादनिमित्तवस्तुबुद्धिः यथा च स्मर्य्यते मनुष्यस्वभावः "दुःखे च सुखमानिनः" यथा च कटुतिक्तादिभक्षकः दुःखमनुभवन् स्रवन्नेत्रजलः सीत्कारसहितः शिथिलदन्तावलिः सुखमभिमन्यते तथा अनात्मनि स्थावरजङ्गमेषु भोगायतने शरीरे वा पुरुषोपकरणे मनसि वा आत्मख्यातिःअविद्याव्यक्तमव्यक्तम्वास.वं स्वरूपत्वेनाभिमंत्य तस्य सम्पत्तिमनुनन्दति स्वरूपसम्पत्तिमभिमन्यमानःतस्य विपत्तिमनुशोचति स्वरूपविपत्तिमभिमन्यमानः सर्व्वः अप्रतिबुद्धः संसारीपुरुषः इत्येषा चतुष्पदा भवत्यविद्या अविद्यास्मितारागद्वेषाभिनिवेशरूपप्रसिद्धपञ्चक्लेशेषु तमोमोहमहामोहतामिस्रान्धतामिस्रेत्यपराख्येषु प्रधानभूता प्रथमा प्रसवभूमिरुत्तरेषामस्मितादीनामितिवेदितव्यम् सत्यविद्यासत्त्वे अस्मितादिसत्त्वम् तदसत्त्वे तदसत्त्वमितिवेदितव्यम्। पुनरविद्याम्विशिनष्टिकरुणापूरितहृदयः गुरुवरः श्रीमान्सूत्रकारः अनादिःन आदिर्यस्या इति अनादिः शास्त्रसम्मतबीजाङ्कुरन्यायसिद्धसृष्टिप्रलयप्रवाहरूपसंसारानादित्वेसिद्धे तद्धेतोरविद्यायाः अनादित्वम् सिद्धमेवेति वेद्यम्। स्मर्य्यतेपि। "इहानादिरविद्यैव" इत्यादि"अनादिमायया सुप्तो यदाजीवः प्रबुध्यते" इत्यादिवचनैरविद्याया अनादित्वम् पुनरप्यविद्याम्विशिनष्टि श्रीमान्सूत्रकारः अविद्यायाः अनादिरूपविशेषणश्रवणेनैव मुमुक्षुरविद्याया आनन्त्यम्माप्रतीयात्। ततश्चअमृतोत्पत्त्यनुत्साहो माभूयात् इत्याशयेन कथम्भूता पुनरपि सा अविद्या सान्ता अन्तेनसहिता सान्ता विनाशशालिनी इत्यर्थः "अनादिमायया सुप्तोयदा जीवःप्रबुद्ध्यते अजमनिद्रमस्वप्नमद्वैतं बुद्ध्यते तदा" इति वेदान्तानुकूल सत्पदार्थविद्भिराचार्यैरुक्तवाक्ये मायया सुप्त इति दर्शनात् मायापदवाच्याया अविद्याया जीवावृत्तिरूपिण्या निद्रारूपत्वं व्यज्यते बुद्ध्यते इति शब्दस्य दर्शनात् मायरूपजीवनिद्राभङ्गोनुमीयते सान्तत्वमुपपद्यत इति वेदितव्यम्। स्मर्य्यतेपि "प्रकृतिःपुरुषस्येह दह्यमाना त्वहर्न्निशम्। तिरोभवित्री शनकैरग्नेर्योनिरिवारणिः" इत्यादि "गुण-

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

नेतानतीत्य त्रीन्देहीदेहसमुद्भवान् जन्ममृत्युजरादुखैर्विमुक्तोमृतमश्नुते" अत्रापित्रिगुणातिक्रमणेन त्रिगुणवत्या अविद्याया अन्तवत्त्वम् सूच्यते भगवद्वाक्यात् "रङ्गस्यदर्शयित्वा निवर्त्तते नर्त्तकी यथा नृत्यात् पुरुषस्यतथात्मानम् प्रकाश्यविनिवर्त्तते प्रकृतिः" इत्यादिकापिलोक्तेरपि अविद्याया अन्तवत्त्वमुपपद्यते। ननु सान्तत्वं द्विविधं दृश्यते लोके यथा सान्तस्य दिनस्य सान्तत्वम् पुनःपुनरनुभूयमान मनत्यन्तम् तथा कलादिप्रलयपर्यन्तस्य प्रत्येकम्परिमितस्य कालस्य वेदितव्यम्। अन्येषामपि आगमापायिनामन्तवत्त्वम् तथैव वेदितव्यम्। रज्जावहिरिति अध्यासरूपपदार्थस्य सान्तस्य नायमहिः किन्तु रज्जुरिति बोधेन सान्तत्वमत्यन्तमिति तथा प्रध्वस्तघटा नामपि सान्तत्वम्वेदितव्यम्। तत्र भवति संशयः अविद्यायाः सान्तत्वं किम्विधम् अनत्यन्तमत्यन्तमुभयम्वा। नाद्यः निर्मोक्षप्रसङ्गात्। नद्वितीयः संसार हेतोरविद्याया अत्यन्तान्तवत्याम् सत्याम् सृष्टिप्रलयरूपप्रवाहात्मकस्य अनाद्यन्तस्य संसारस्य प्रविनाशप्रसङ्गात्। ततश्च निर्बन्धप्रसङ्गात् शास्त्रस्य स्वर्गनरकादिकल्पनाविधिनिषेधप्रतिपादनवैयर्थ्याच्च। न तृतीयः द्वयोरनन्तत्वात्यन्तत्वयोः सामानाधिकरण्यायोगात्। एवमविद्यायाः अन्तवत्त्वम् न अनत्यन्तम् न अत्यन्तम् नोभयविधम् इति। पूर्व्वपक्षे सिद्धे प्रसज्यते अविद्यासान्तत्वप्रतिपादकपूर्व्वोक्तवाक्याप्रामाण्यम् निर्मोक्षप्रसङ्गश्च उपतिष्ठति मोक्षशास्त्रवैयर्थ्यापत्तिश्च सम्भवति। तस्मात् स्वीकार्य्यमेवाविद्यासान्तत्वम् वक्ष्यमाणप्रकारेणेति वेदितव्यम्। तथाहि यथा एकमेवाकाशगतम् सूर्य्यविम्बम् जलान्वितानेकघटेषु अनेकप्रतिविम्बभावं प्राप्नोति तथैक एवाखण्डसच्चिदानन्दात्मा विम्बरूपःअनेकान्तःकरणेषु जीवोपाधिभूतेषु अविद्यारूपेषु सस्थूलसूक्ष्मकारणशरीरेषु संसारित्वमनेकप्रतिविम्बभावम् जीवत्वं गच्छतीतिवेद्यम्। तथा स्मर्य्यते च "यथैकमाकाशगमर्कविम्बम् क्षुद्रेषु पात्रेषु जलान्वितेषु भजत्यनेकप्रतिविम्बभावम्। तथा त्वमन्तःकरणेषु देव" इत्यादि। तथा श्रूयते च" तत्सृष्ट्वा तदेवानुप्राविशत्" इति यथा एकस्मिन् घटे भग्ने सति तद्घटजलावच्छिन्नमेवैकम् प्रतिविम्बम् विम्बत्वं लभते न चाभग्नसर्वघटजलावच्छिन्नसर्व्वप्रतिविम्बानाम् विम्बत्वं सम्पद्यते तथैव स्थूलसूक्ष्मशरीरावच्छिन्नान्तःकरणरूपे एकस्मिन् कारणशरीरे तत्र प्रतिविम्बितविम्बप्रतिविम्बरूपस्य जीवस्य संसारिणो विम्बरूपम् ब्रह्मत्वम् स्वरूप-

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

सम्पत्तिर्घटते । नान्येषाम् सर्व्वेषाम् सर्व्वस्थूलसूक्ष्मशरीराव-च्छिन्नसर्व्वान्तःकरणावच्छिन्नानाम् तत्र तत्र प्रतिबिम्बित-प्रतिबिम्बरूपजीवानाम्निस्वरूपम् ब्रह्मत्वं स्वरूपसम्पत्तिर्घटते इतिवेदितव्यम् । तत्र यथा एकस्यैव सजलघटस्य भङ्गोदृश्यते तथा एकस्यैव सस्थूलससूक्ष्मशरीरकारणशरीरस्य अविद्या-रूपस्य प्रणाश उपपद्यते । अनेनैव प्रकारेण अविद्यायाः सान्तत्व-मुपपन्नम् भवतीतिवेदितव्यम् । यथाच भग्नस्य सजलघटस्य अन्त-वत्त्वं अत्यन्तं दृश्यते । तथा अविद्याया अपि अन्तवत्त्वमत्यन्तमेवेति वेदितव्यम् । अत्राविद्याया अनेकजलान्विघटसादृश्यदर्शनात् अवि-द्याया अनेकत्वं सम्भवति तच्च अजामेकामित्यादिवाक्यान्न सम्भ-वति । तत्रोच्यते यथा एक एवाकाशः तत्तद्घटावच्छिन्नत्वेन तत्तद्घटाकाशत्वरूपमनेकत्वम्भजति । तथात्राप्येकमेव जलतत्त्वम् तत्तद्घटावच्छिन्नत्वेन तत्तद्घटजलत्वरूपमनेकत्वम्भजति । तथैव च एकैवाविद्या समष्टिरूपा तत्तत्स्थूलसूक्ष्मोपाध्यवच्छिन्नत्वेन तत्तदु-पहितान्तःकरणत्वरूपमनेकत्वम् व्यष्टित्वम् भजतीतिवेदितव्यम् । ततश्च न अविद्यैकत्वव्याहतिप्रसक्तिरिति वेदितव्यम् । एवमुक्तप्रकारेण अविद्यात्यन्तसान्तत्वविषयकपूर्व्वोक्तसृष्टिप्रलयरूपप्रवाहात्मकसंसा-रप्रणाशप्रसङ्गनिर्बन्धप्रसङ्गादिसकलदोषनिरास उपपन्न इतिवेदित-व्यम् । "प्रकृतिःपुरुषस्येह" इत्यादिस्मृतावपि पुरुषस्येत्येकवचनप्रयो-गात् व्यष्टिरूपिण्याएव अविद्याया भङ्गोनुमीयते ततश्चापि संसारलो-पादिपूर्व्वोक्तदोषनिरासइत्यवगन्तव्यम् । सत्यपि प्रकृतिःविवेकिनः प्रकृतिपरिचयिनः पुरुषस्य समीपं नोपजाति पुरुषश्चविविक्तात्म-स्वरूपः सतीमपि ताम्प्रकृतिमुपेक्ष्यत इति साङ्ख्यवित्समयः । तथाच प्रतिपाद्यते ईश्वरकृष्णेन कपिलानुयायिना "प्रकृतेःसुकुमारतरन्नकिंचि-द्स्तीति मे मतिर्भवति । या दृष्टास्मीति न पुनर्दर्शनमुपैति पुरुषस्य । दृष्टा मयेत्युपेक्षक एकोद्रष्टाहमित्युपरमत्यन्या । सति संयोगेपि तयोः प्रयोजनं नास्ति सर्गस्य" इत्यादिवाक्यैः । ततो वस्तुतोप्यर्थतश्च अवि-द्याया मुक्तिदशायामत्यन्तसान्तत्वमुपपद्यत एवेतिवेदितव्यम् । अत्र विचार्य्यते अविद्यास्वरूपम् एतन्निदानभूतम् क्लेशसन्तानस्य कर्म्मा-शयस्य च सविपाकस्येति । ततश्चामित्रावत्सपदवत् वस्तुसत्ता वेदि-तव्या यथा नामित्रोमित्राभावोनमित्रभावः किन्तु तद्विरुद्धःसम्पन्नः यथावा अवत्सपदम् न वत्सपदाभावो नवत्सपदभावः किन्तु स्थानं

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

ताभ्यामन्यत् वस्त्वन्तरम् अन्येपि अधनादिपदार्थाद दृष्टान्तावेदितव्याः एवमविद्या न प्रमाणम् न प्रमाणाभावः किन्तु विद्याविपरीतमज्ञानपदवाच्यज्ञानान्तरम् मिथ्या ज्ञानमितियावत् वेदितव्यम् । यथा च मृतमातृकोबालः आजन्मनः जातोपमातृगतमातृसंस्कारः उपमातरमेव मातरम्विजानाति तथा विस्मृतस्वरूपः पुरुषः आसृष्टेः संजातानात्मदेहाद्यहम्बुद्धिः देहाद्येव स्वरूपं विजानातीत्यर्थोवेदितव्यः । अविद्याव्याख्यानावसरगतप्रसंगप्राप्तास्मितादिक्लेशाः यथाक्रमम् व्याख्यायन्ते "तत्वम्पदार्थौ परमात्मजीवकावसीति चैकात्म्यमथानयोर्भवेत्" अत्रस्मृतौ परात्मजीवयोः असिशब्देन ऐकात्म्यं सूच्यते तथैव अहम्प्रत्ययार्थपुरुषबुद्ध्योः द्रष्टृ दृश्ययोः क्षेत्रज्ञक्षेत्रयोरितियावत् । ऐकात्म्यं तादात्म्यमिति यावत् प्रतीयते तद्भावः अस्मिता इतिद्वितीयःक्लेशः । रागस्यपातंजलयोगसूत्राव्यासभाष्ये तृष्णार्थकत्वाभ्युपगमात् तृष्णाशब्दस्य कामशब्दपर्य्यायत्वात् द्वेषस्य च तत्रैव भाष्ये क्रोधार्थत्वाभ्युपगमात् रागद्वेषशब्दाभ्यां कामक्रोधौ प्रतीयेते प्रसिद्धंच "काम एष क्रोध एष रजोगुणसमुद्भवः । महाशनो महापाप्मा विद्ध्येनमिहवैरिणम्" इति भगवद्वाक्यात् रागद्वेषयोः कामक्रोधरूपयोः क्लेशरूपत्वम् रागः कामोराजसः पुनःपुनःप्रपूर्य्यमाणोप्यपूर्य्यमाणः महाशनः तृतीयः क्लेशः । शत्रुः अहितकारी द्वेषः क्रोधः राजसः ब्रह्महत्यादिपापजनकः महापाप्मा शत्रुः अहितकारी चतुर्थक्लेशः वेदितव्यः । यद्वा पुरुषबुद्ध्योः ऐकात्म्य प्रतीतिरस्मिता "दृग्दर्शनशक्त्योरेकात्मितैवास्मिता" इतिपातञ्जलयोगसूत्रात् अनुभूतसुखस्य सुखानुस्मृतिपूर्व्वकः सुखे तत्साधने वा यो लोभः तृष्णा रञ्जनात्मकचित्तवृत्तिविशेषः स राग इति तथाच पातञ्जलयोगसत्रम् " सुखानुशयी रागः" इतिअनुभूतदुःखस्यदुःखानुस्मृतिपूर्व्वकः दुःखे तत्साधने वा जिघान्सा अमर्षः स द्वेषः "दुःखानुशयी द्वेषः" इति पातञ्जलयोगसूत्रात् । सर्व्वस्य प्राणिमात्रस्य अनुभूतमरणभावस्य "मा न भूवंहि भूयासम्" इत्यादिश्रुतिप्रतिपादितात्माशीर्भवति मरणकालिकपरमदुस्सहक्लेशानुभवभाविता तथैव पूर्व्वजन्मनिष्ठदुस्सहदुःखानुभवश्च प्रतीयते । कृमेरपि जातमात्रस्य शिशोरपि अनुत्पन्नबोधस्य च प्रत्यक्षानुमानागमादिप्रमाणसम्भावितम्मरणभयम् मरणवस्तुनः गतिक्रन्दनादि संसूचितं प्रागनुभूतम् मरणकालिकदुस्सहदुःखमनुमापयति स एव पूर्व्वानुभूतः क्लेशः विद्य-

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

मानदशायामपि नैसर्गिकःस्वपूर्व्वस्थितिभावितः अभिनिविष्टो वर्त्तते अभिनिवेशः प्राणिमात्रमभिव्याप्य निवेशः प्रवेशः अभिसर्व्वतोभावेन वासितसूक्ष्मरूपेण निवेशःप्रवेशोवा स अभिनिवेशः अस्यास्तीतिअभिनिवेशः अर्शाद्यच् इतिपाणिनिः स अभिनिवेशाख्यः क्लेशः यथाचायम् विमूढेषु दृश्यते। तथा विवेकिष्वपि समाना हि तयोः कुशलाकुशलयोः मरणदुःखानुभवादियम्वासनेति "स्वरसवाही विदुषोपि तथारूढोभिनिवेशः" इतिपातञ्जलयोगसूत्रात् ॥

एवमविद्यायाः देहाद्यहम्बुद्धित्वमनादित्वम् सान्तत्वम् निर्णीय सूत्रकारः पुनरपि तां वक्ष्यमाणविशेषणैः परिचाययति मुमुक्षूणाम्विवेकदार्ढ्याय पञ्चमसूत्रेण।

सा हि कर्म्मानुगेश्वरानुशास्या प्रपञ्चोपादानस्वभावा १।१।५।

साशब्देन पूर्व्वनिर्द्दिष्टस्य चतुर्थसूत्रस्थस्य अविद्याशब्दस्य परामर्शः हीतिनिश्चयार्थं अव्ययपदम् सा अविद्या किम्विशेषणविशिष्टा कर्म्मानुगा कर्म्म पुण्यपापरूपम् तस्य अनुगा पश्चाद्गामिनी तमनुगच्छतीतिभावः जगद्वैचित्र्यसचिवपुण्यपापनिमित्तकसुखदुःखफलप्रदात्रीतियावत्। ननु "वैषम्यनैर्घृण्येन सापेक्षत्वात् तथाहि दृश्यते" इतिब्रह्मसूत्रे ईश्वरस्य सुखदुःखाढ्याम् विषमांसृष्टिं निर्मिमाणस्य प्राकृतजनस्येव रागद्वेषोपपत्तौ वैषम्यनैर्घृण्ये प्रसज्येते इत्याक्षिप्य तद्वारणाय कर्म्मसापेक्षत्वमीश्वरस्य व्यवतिष्ठति पर्जन्यसादृश्यञ्च दर्शयति यथाहि व्रीहियवादिसृष्टौ साधारणकारणं मेघः व्रीहियवादिवैषम्ये तत्तद्बीजगतविशेषसामर्थ्यानि असाधारणकारणानि एवम् ईश्वरः देवमनुष्यादिसृष्टौ साधारणकारणम् देवमनुष्यादिवैषम्ये तत्तज्जीवगतविशेषकर्म्माणि असाधारणकारणानीति तथाच श्रुतिः"एष ह्येव साधु कर्म्म कारयति तं यमेभ्योलोकेभ्य उन्निनीषत एष एवासाधु कर्म्म कारयति तं यमेभ्योलोकेभ्योऽधोनिनीषते" इति "पुण्योवै पुण्येन कर्म्मणा भवति पापः पापेन" इतिच। तथाच स्मृतिः"ये यथा माम्प्रपद्यन्ते तांस्तथैव भजाम्यहम्"तत् कथमविद्यायाः कर्म्मसापेक्षत्वम् तत्रोच्यते "उपपद्यते चाप्युपलभ्यते च" इति ब्रह्मसूत्रीयभाष्येन न चाविद्या केवला वैषम्यस्य कारणम्

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

एकरूपत्वात् रागादिक्लेशवासनाक्षिप्तकर्म्मापेक्षा त्वविद्या वैषम्यकरी स्यात् इतिदृश्यते तेन ईश्वरस्यापि अविद्याया अपि कर्म्मसापेक्षत्वमुपपद्यते तत्र ईश्वरस्तु "निष्कलं निःक्रियंशान्तम्" इत्यादिश्रुतेः निःक्रियत्वेन प्रसिद्धः "यतो वा इमानि भूतानि जायन्ते येन जातानि जीवन्ति यत्प्रयन्त्यभिसंविशन्ति" इत्यादिश्रुतेः जगज्जननादिहेतुरप्युच्यते तत्र परस्परधर्म्मविरोधः प्रसज्यते तत्रोच्यते ईश्वरः सर्व्वशक्तिमान् प्रतिपाद्यते शास्त्रे तस्यैका शक्तिर्विक्षेपशक्तिरितिकथ्यते स्मर्य्यते च "विक्षेपशक्तिर्लिङ्गादिब्रह्माण्डान्तञ्जगत्सृजेत्" इतिविक्षेपशक्तिरूपिण्या ईश्वरशक्त्या एव अविद्यापदवाच्यत्वम् तस्या एव जगद्वैचित्र्यवैषम्यकर्त्तृत्वस्वीकृतत्वेन कर्म्मसापेक्षत्वमीश्वर उपचर्य्यते यद्वा शक्तिशक्तिमतोश्चन्द्रिकाचन्द्रयोरिवानन्यत्वाभ्युपगमात् एकत्र कर्म्मसापेक्षत्वमुभयत्र सम्बद्ध्यते तत उपपन्नमविद्यायाः कर्म्मानुगत्वम् व्याख्यानञ्चाप्यनवद्यम् । यद्वा अविद्यासहकारित्वेन ईश्वरस्य जगद्वैचित्र्यकर्त्तृत्वप्रसिद्धेः उपपन्नमेवाविद्यायाः कर्म्मानुगत्वमितिवेदितव्यम् । सा अविद्या पुनः किम्विशेषणविशिष्टा ईश्वरानुशास्या ईश्वरेण अनुशास्या अनुशासनरूपक्रियाविषयीभूता ईश्वरानुज्ञापनीया तत्प्रेर्य्या इतिवेदिव्यम् । "ईश्वरः सर्व्वभूतानां हृद्देशे ऽर्जुन तिष्ठति । भ्रामयन्सर्व्वभूतानि यन्त्रारूढानि मायया" इतिस्मरणात् मायया इतिशब्देन अविद्यारूपिण्या मायाया ईश्वरप्रेर्य्यत्वमभ्युपगम्यते राजा दूतेन सन्देशङ्गमयति तत्र यथा दूतस्य राजप्रेर्य्यत्वन्तथा अविद्याया ईश्वरप्रेर्य्यत्वमितिवेद्यम् सा अविद्या पुनःकिम्विशेषणविशिष्टा प्रपञ्चोपादानस्वभावा प्रपञ्चस्य जगत्कार्य्यस्य उपादानस्वभावा कार्य्यमुपादीयते अनेनेति उपादानङ्कारणं तत्स्वरूपा इति वेदितव्यम् । ननु "यतोवा इमानि भूतानि जायन्ते" अत्रश्रुतौ यत इतिपञ्चमी प्रकृतौ द्रष्टव्या जनिकर्तुरितिंसूत्रात् जायमानस्य कार्य्यस्य प्रकृतिरपादानसंज्ञिका भवतीतिसूत्रार्थः । अपादाने पंचमी इतिसूत्रात् प्रकृतौ पञ्चमीलाभः।ततः यतोवा इतिश्रुतिलक्षितस्य ब्रह्मणः जगतः प्रकृतत्वम् नाम उपादानकारणत्वम् सम्भवति तत्कथम् अविद्यायाः जगतः उपादानकारणत्वम्प्रतिज्ञातव्यम् ।तत्रोच्यतेब्रह्मणः जगदुपादानकारणत्वङ्किङ्कार्य्यसमसत्ताकम् किङ्कार्य्यविषमसत्ताकम् । नाद्यः कूटस्थस्यात्मनः ब्रह्मणः परिणामविकारप्रसङ्गात् । नद्वितीयःव्रीहियवादिकार्य्यस्य समसत्ताकस्यपृथिवीरूपोपादानकारणस्य प्रत्यक्षसिद्धस्य

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

विरोधप्रसङ्गात्। परन्तु श्रुतिस्मृतिप्रसिद्धयुक्तिसिद्धजगदुपादानकारणत्वमपि ब्रह्मणोभवितव्यमेव। परिणामविकारप्रत्यक्षविरोधदोषोपि परिहार्य्यएव तत्प्रकारःप्रदर्श्यते। यथाप्रत्यक्षं कार्य्यविषमसत्ताकं कारणम् रज्वादि सर्प्पादिरूपं कार्य्यं जनयति तथैव ब्रह्मापितद्रूपं अध्यस्तं जगज्जनयतीतिवेदितव्यम्। यथा रज्वादिकारणंकार्यविषमसत्ताकमपि सर्प्पादिकार्यसृष्टौ न परिणमते प्रत्यक्षविरोधं न लभते तथा ब्रह्माप्यपरिणाम्येव प्रत्यक्षाविरुद्धम् कार्यविषमसत्ताकं कारणमितिवेद्यम्। तत्र यथा रज्ज्वधिष्ठानेदन्तारूपसत्तावदज्ज्वज्ञानमपि सर्प्पाकारेण उपादानकारणत्वं लभते प्रतीयते च रज्ज्वधिष्ठानं विवर्त्तोपादानत्वम् कार्य्यविषमसत्ताकत्वम् अपरिणामित्वम्प्रत्यक्षाविरोधं च लभते। तथैव ब्रह्माधिष्ठानेदन्ता रूपसत्तावती अविद्या जगदाकारेण उपादानकारणत्वंलभतेप्रतीयतेच ब्रह्माधिष्ठानं विवर्तोपादानत्वं कार्यविषमसत्ताकत्वम् अपरिणामित्वम्प्रत्यक्षाविरोधं च लभत इतिवेद्यम्। तथाच जगत्कार्य्यस्य ब्रह्मविवर्त्तरूपोपादानकारणमितिवेदितव्यम् विवर्त्तोपादानतात्पर्य्यवत्येव "यतोवा इमानि भूतानि जायन्ते" इति श्रुतिर्वेदितव्या। "निःकलं निःक्रियम्" इत्यादिश्रुत्येकवाक्यत्वात् पूर्व्वोक्तप्रकारस्वारस्याच्च। अविद्याच जगत्कार्य्यस्य उपादानकारणमित्यपि वेदितव्यम्। पूर्व्वोक्तप्रकारानुरोधात् ब्रह्माधिष्ठानेदन्तारूपसत्तावदज्ञानम् जगदाकारेण प्रतीयते उपादानकारणत्वं लभते यद्यपि अध्यासः मिथ्याज्ञानरूपः अतद्रूपप्रतिष्ठः भूतार्थविषयप्रमाणबाधः प्रत्यक्षविरुद्धः। तथापि अबाधितदशायां प्रत्यक्षवत्प्रतीयमानः असत्प्रत्यक्षोपि प्रत्यक्ष एवेतिवद्यम्। न च कश्चित् निमीलितनयनः शुक्तिकारजतम् रज्जुसर्प्पम् स्थाणुपुरुषम्वा पश्यति तस्मात्सिद्धम् कार्यविषमसत्ताकरज्जुवत् ब्रह्मापि प्रमाणसिद्धमुपादानकारणमितिवेद्यम् 'प्रकृतिर्ह्यस्योपादानम्" ":अज्ञानमेवास्य हि मूलकारणम्' अज्ञानतो ऽध्यासवशात् प्रतीयते" इत्यादिस्मरणात्। "तमेव विदित्वातिमृत्युमेति नान्यः पन्था विद्यतेयनाय" अत्र श्रुतौ ज्ञानेन संसारप्रणाशोव्यज्यते। ततः संसारस्य अज्ञानरूपं कल्पनीयम् प्रकाशनाश्यायास्तमिस्रायाः तमोरूपत्वात् यथा प्रकाशतमसोः परस्परम् विरोधोदृश्यते तथैव ज्ञानाज्ञानयोरपि परस्परम्विरोधोवेदितव्यः। यथा तमिस्रायाः तम उपादानत्वं दृश्यते। तथैव संसारस्यापि अज्ञानोपादानत्वमुपपन्नमितिवेदितव्यम्। एवं सूत्रकारः

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

विशेषणत्रयेण अविद्यास्वरूपमुपदिश्य अविद्याः स्वरूपविचार अविद्यायाःप्रपञ्चोपादानत्वस्वभावश्रवणेन कथं श्रुतिस्मृतिप्रसिद्धम्ब्रह्मणः जगदुपादानकारणत्वम् निषिध्यत इतिशङ्कोदयः अधिकारिणां मा भूयादित्याशयेन श्रीमान् सूत्रकारः षष्ठं सूत्रमविद्यापरिचायकम् सूत्रयति ॥

ब्रह्मण्यधिष्ठिता ॥ १।१।६।

सा जगदुपानभूता अविद्या अधिष्ठाने सकलप्राकृतवस्तुसमाश्रयीभूते ब्रह्मणि अधिष्ठिता समाश्रिता इतिवेदितव्यम् । प्रकृतिरेवाविद्यापदवाच्या प्राकृतवस्त्वाकारेण प्रतीयमाना प्राकृतवस्तूपादानीभूता अधिष्ठानब्रह्मेदन्तारूपसत्तया प्रतीयमाना अधिष्ठाने ब्रह्मण्येवावतिष्ठत इतिवेदितव्यम्। एतञ्च तृतीयसूत्रीयाविद्यापदव्याख्यानावसरे अध्यासस्वरूपप्रदर्शने अविद्यायाः शुद्धचैतन्ये अहम्प्रत्ययार्थभूते ब्रह्मण्यधिष्ठितत्वम् विस्तरेण प्रतिपादितमित्यत्र संक्षेपेणैवप्रदर्शितमितिवेदितव्यम्। एतनैव ब्रह्मणः जगत्कार्य्यम्प्रति विवर्त्तोपादानत्वमविद्यायाः उपादानत्वञ्च प्रदर्शितमितिवेदितव्यम् । एतच्चापि विवर्त्तोपादानत्वमुपादानत्वञ्च ब्रह्मणः अविद्यायाश्च रज्जुरज्ज्वज्ञानसादृश्येन पञ्चमसूत्रीयभाष्ये प्रतिपादितमेवात्र समासेनैव प्रतिपाद्यते रज्ज्वधिष्ठाने विवर्त्तोपादाने अधिष्ठितेनरज्ज्वज्ञानेन उपादानकारणेन सर्प्पकार्य्यं यथा प्रतीयते तथैव ब्रह्माधिष्ठाने विवर्त्तोपादाने अधिष्ठितेन ब्रह्माज्ञानेन अविद्यारूपेण उपादानकारणेन जगत्कार्य्यम्प्रतीयत इतिवेदितव्यम्। यथा रज्जौ अज्ञानकल्पितसर्प्पस्य प्रतीतिमात्रम् न वस्तुसत्त्वम् किन्तु मिथ्यात्वमेव तथैव ब्रह्मणि अविद्याकल्पितप्रपञ्चस्य प्रतीतिमात्रम् न वस्तुसत्त्वम् किन्तु मिथ्यात्वमेवेतिवेदितव्यम्। "आत्मचैतन्यमाश्रित्य देहेन्द्रियमनोधियः स्वकीयार्थेषु वर्त्तन्ते सूर्य्यालोकं यथा जनाः". इतिस्मृत्यैषाम् स्थूलसूक्ष्मकारणशरीररूपाणाम् देहेन्द्रियमनोधियाम् चैतन्याश्रयत्वम्प्रतिपाद्यते । तेन च "सा कारणशरीरं स्यात्" इत्याद्युक्तया कारणशरीररूपाया अविद्याया अपि चैतन्याश्रितत्वम् तेन च तस्याः प्रत्यग्भिन्नब्रह्मचैतन्याश्रितत्वम् ब्रह्मण्यधिष्ठितत्वम् सिद्धमेवेतिवेदितव्यम् । अविद्यैव व्यष्टिरूपा धीशब्दपर्य्यायबुद्धिपदवाच्या समष्टिरूपा महत्पदवाच्येतिवेदान्तसम्प्रदायाद्वेदितव्यम् । सूच्यते पि महतः जगदुपादानीभूतत्वात् अवि-

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

द्यात्वम् "मम योनिर्महद् ब्रह्मतस्मिन् गर्भं दधाम्यहम्" इतिस्मृतयो निशब्दप्रयोगात् महतः उपादानत्वम् व्यज्यते योनिशब्दश्च प्रकृतिवचनः समधिगतोलोके पृथिवी योनिरोषधिवनस्पतीनामिति स्त्रीयोनिरप्यस्त्येवावयवद्वारेण गर्भम्प्रत्युपादानकारणम् क्वचित् स्थानवाचकोपि योनिशब्दः श्रूयते "योनिष्ठ इन्द्र अकारि" इत्यादिश्रुतौ तत्र प्रकृतिवचनता भवतु मावा भवतु अत्रतु गर्भं दधाम्यहमितिप्रयोगात् उपादानत्वंयुक्तमेव अत्र महद्विशेषणब्रह्मशब्दस्य व्यापनशीलत्वम् समष्टित्वमितिवेदितव्यम्। यद्यपि "अनाद्यविद्योद्भवबुद्धिबिम्बितोजीवः प्रकाशोयमितीर्य्यते चितः" इत्यादिस्मृतौ बुद्धेः अविद्योद्भवत्वस्मरणात् न अविद्यारूपत्वम् तथाप्यत्रैव श्रुतौ बुद्धौ जीवस्य प्रतिबिम्बितत्वमपि श्रूयते तत्र प्रकारः अविद्या एव जीवरूपप्रतिबिम्बाधारत्वेन श्रुतिस्मृतिभ्यामभ्युपगम्यते ततः अविद्यायाः अवस्थाविवेचनायाम् अविद्याबुद्धिरूपेण द्वैविध्यं कल्पनीयम् स्वरूपविवेचनायान्तु ऐक्यमेवेतिवेदितव्यम्। एकस्यैव देवदत्तस्य यथा अवस्थाभेदेन अध्येतृत्वाध्यापकत्वरूपेण द्वैविध्यम्स्वरूपेण ऐक्यमिति "बुद्ध्यवच्छिन्नचैतन्यमेकम्पूर्णमथापरम्" इत्यादिस्मृतेरपिबुद्धेःकारणशरीत्वव्यज्यते ततश्च अविद्यात्वमपि व्यज्यते ततश्च बुद्ध्याश्नयत्वेन प्रतिपादितम् चैतन्यम् ब्रह्मात्मकम् अविद्याश्रयमित्युपपन्नम् भवति। ततश्च अविद्यायाः ब्रह्मण्यधिष्ठितत्वम् सिद्धमितिवेदितव्यम् ।१।१।६॥ इति परमपूज्यपादश्रीमद्योगदत्तशर्म्मकृतामृतोपदेशे पूज्यपादश्रीमद्योगदत्तशर्म्मशिष्यश्रीमत्सत्यनारायणशर्म्मकृतभाष्ये प्रथमाध्यायस्य प्रथमः पादः। समाप्तः॥

सूत्रकारः प्रथमाध्यायस्थप्रथमपादस्थचतुर्थसूत्रस्थदेहं जीवोपाधिभूतं कारागृहोपमम् कर्म्मनिबन्धनम् शरीरपदवाच्यं शीर्य्यत इतिव्युत्पत्त्या शीर्णत्वविशिष्टम् करिकलभकर्णाग्रचपलम् प्रकारसंख्यया परिचाययति॥

स्थूलसूक्ष्मकारणभेदात्त्रिविधोदेहः ॥ १।२।१

स्थूलसूक्ष्मकारणभेदात् इन्द्रियगोचरत्वम् स्थूलत्वम्। इन्द्रियागोचरत्वम् सूक्ष्मत्वम्। सेन्द्रियागोचरत्वस्थूलसूक्ष्महेतुत्वम् कारणत्वम्। अस्मात् :-स्थूलत्वविशिष्टसूक्ष्मत्वविशिष्टकारणत्वविशिष्टप्रकारतृतयाद्धेतोः त्रिविधः तिस्रोविधा. प्रकाराः यस्येतित्रिविधः त्रिप्रकारः देहः

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

शरीरमितिवेदितव्यम्। तत्र सौक्ष्म्यात् इन्द्रियागोचरत्वेन अनुपलब्धौ सत्याम् अननुभूतसप्तमरससादृश्येन सूक्ष्मशरीरस्य अभावः शङ्कनीयो-भवति तत्रोच्यते यत्र स्वप्नदशायाम् स्थूलदेहोनिवृत्तिकस्तिष्ठति इन्द्रियवृत्तिराहित्यात् तत्रापि स्वाप्नवृत्तिर्दृश्यते यत्र यतश्च लोका-न्तरे लोकान्तराच्च स्थूलदेहस्य गत्यागती न सम्भवतः तत्र तत-श्चापि गत्यागती श्रूयेते "ये वै के चास्माल्लोकात् प्रयन्ति चन्द्रम-समेव ते सर्व्वे गच्छन्ति" इयङ्गतिश्रुतिः 'तस्माल्लोकात् पुनरेत्यस्मै लोकाय कर्म्मणः" इत्यागतिश्रुतिः अस्मात् स्थूलदेहात् उत्क्रान्तिरपि श्रूयते "स यदास्मात् शरीरादुत्क्रामति सहैवैतैः सर्व्वैरुत्क्रामति" ननु उत्क्रान्तिगत्यागतीनां श्रवणात् जीव उत्क्रामति गच्छति आगच्छति इतिकल्पनीयम् उत्क्रान्तिगत्यागतिक्रियाकर्तृत्वेन तत्तल्लोकफलभो-क्तृत्वेन च जीवस्यैव स्वीकृतत्वादितिचेन्न न विभोरात्मनश्चलनमव-कल्पते "आकाशवत्सर्व्वगतश्च नित्यः" इत्यादिश्रुत्या अस्त्येव सि-द्धम्वैभवन्तस्य ततः परिच्छिन्नस्यैव जीवस्य घटाकाशस्येव चलन-मवकल्पते। सति च परिच्छेदे स एव परिच्छेदः सूक्ष्मदेह इतिवेदित-व्यम्।"अथैनमेते प्राणा अभिसमायन्ति" "स एतास्तेजोमात्राः सम-भ्याददानः" इत्यादिश्रुतिभिः सूक्ष्मदेहस्य प्राणेन्द्रियान्तःकरणसमुदा-यरूपस्य परिच्छेदत्वं सम्भवति उक्तश्रुतौ प्राणशब्दप्रयोगात् सूक्ष्म-देहोपगतप्राणोपलब्धेः समनन्तरश्रुतौ तेजोमात्राशब्दश्रवणात् सूक्ष्म-देहगतचक्षुराद्युपलब्धेरुक्तिसिद्धिर्वेदितव्या। ततश्च सूक्ष्मदेहस्य इन्द्रि-यागोचरत्वं अनुपलब्धिरितियावत् नाभावनिबन्धनम् किन्तु सौक्ष्म्य-निबन्धनमेवेतिवेदितव्यम् "अतिदूरात् सामीप्यात् इन्द्रियघातान्म-नोनवस्थानात् सौक्ष्म्याद्व्यवधानादभिभवात् समानाभिहाराच्च" इत्युक्तौ एतैर्हेतुभिरनुपलब्धिर्भवतीतिप्रतिपाद्यते। ततोपि सौक्ष्म्याद-नुपलब्धिर्भवतीतिसिद्धमितिवेदितव्यम्। पुनरपिस्मर्य्यते "सौक्ष्म्या-दनुपलब्धिर्नाभावात् कार्य्यतस्तदुपलब्धेः" इति। ततोपि उक्तसिद्धिः परिपुष्टेतिवेदितव्यम्। कारणत्वम् स्थूलसूक्ष्महेतुत्वेन प्रतिपादितम् तत्र कारणस्य इन्द्रियागोचरत्वे सति केन प्रमाणेन तदुभयहेतुत्वम-भ्युपगम्यं स्यात् तत्रोच्यते "बीजान्यान्युपदग्धानि न रोहन्ति यथा पुनः। ज्ञानदग्धैस्तथाक्लेशैर्नात्मा सम्पद्यते पुनः" अत्र स्मृतौ अग्नि-दग्धबीजसादृश्यात् क्लेशानान्तेषामपि बीजभावोभ्युपगम्यः अविद्या याश्च क्लेशत्वम्प्रसिद्धमेव तथा च कारणत्वमपि ततः कारणम्बीज-

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

रूपमिति सिद्धम् वेदितव्यम् । यथा बीजादङ्कुरःप्ररोहति तथैव कारणात् स्थूलसूक्ष्मौ प्ररोहत इति वेदितव्यम् । यद्यप्युक्तश्रुतौ क्लेशैः सह आत्मनः सम्पत्तिर्व्यज्यते न च ततः स्थूलसूक्ष्मप्ररोहो व्यज्यते तथापि निरवयवस्यात्मनः तत्सम्पदायोगात् स्थूलसूक्ष्मपरिच्छिन्नस्यैव आत्मनः तत्सम्पत्तिः सम्भवति तथा च युक्तम् कारणत्वम् स्थूलसूक्ष्मकारणत्वमिति वेदितव्यम् । "तमःप्रधानप्रकृतेस्तद्भोगायेश्वराज्ञया । वियत्पवनतेजोऽम्बुभुवोभूतानि यज्ञिरे" इत्याद्युक्तेरपि तमःप्रधानप्रकृतेर्मलिनसत्त्वःप्रधानाया अविद्यारूपकारणस्येति यावत् स्थूलसूक्ष्महेतुत्वम्प्रतिपाद्यते "मायामयं स्थूलमुपाधिमात्मनः" इत्यादिस्मृतिरपि उक्तसिद्धिम्पोषयतीति वेदितव्यम् ॥

एवं सूत्रकृता देहत्रैविध्यम्प्रतिपाद्य प्रत्येको देहः परिचीयते अग्रिमसूत्रेण

आप्रारब्धस्थायी स्थूलः सूक्ष्मस्तु प्रलयावधिः आमुक्तेः कारणम् १।२।२।

स्थूलः वृहत्परिमाणः देहः किं लक्षणः आप्रारब्धस्थायी प्रारब्धपर्य्यन्तं स्थितिशीलः प्रारब्धकर्म्मभोगपर्य्यन्तं तिष्ठति तदन्ते नश्यतीत्यर्थः इदन्तु स्थूलदेहस्य तटस्थलक्षणमुक्तम् पूज्यपादसूत्रकारेण "रसादिपञ्चीकृतभूतसम्भवम् भोगालयं दुःखसुखादिकर्म्मणाम् । शरीरमाद्यन्तवदादिकर्म्मजम् मायामयं स्थूलमुपाधिमात्मनः" इत्यादिस्मृतिः स्थूलदेहस्य स्वरूपलक्षणं स्मारयतीति वेदितव्यम् । अत्रस्मृतौ रसादीति रसः रागः अभिलाषः कामः आदिः उत्पत्तिहेतुर्यस्येति तथाभूतम् यद्वा रसो धातुविशेषः आदिः उत्पत्तिहेतुर्यस्येति रसशब्दः " रसासृङ्मांसमेदोऽस्थिमज्जाशुक्राणि धातवः " इतिस्मृतिलक्षितः सर्व्वधातूपलक्षक इतिवेदितव्यम् । अविशेषाणाम् शब्दस्पर्शरूपरसगन्धतन्मात्राणाम्विशेषाः आकाशवाय्वग्न्युदकभूमयो भूतानि अपञ्चीकृतानि पञ्चीकृतानि सम्पाद्यन्ते तेभ्यः पञ्चीकृतभूतेभ्यः सम्भवः समुत्पत्तिर्यस्येति पञ्चीकृतभूतसम्भवम् पञ्चीकरणप्रकारः प्रदर्श्यते आकाशादिप्रत्येकम्भागद्वयोपेतम् कृत्वा पुनश्च प्रथमम्प्रथमम्भागम्भागचतुष्टयोपेतम् विधाय स्वस्मात् स्वस्मात् इतरेषाम् चतुर्णाम् चतुर्णाम् यो यो द्वितीयः स्थूलो भागस्तेन

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

तेन सह प्रथमप्रथमभागांशानाम् चतुर्णाञ्चतुर्णाम्मध्ये एकैकस्य योजनात् ते वियदादयः पञ्चपञ्चात्मका भवन्ति इति यथाच स्मर्य्यते "द्विधा विधाय चैकैकं चतुर्धा प्रथमस्पुनः। स्वस्वेतरद्वितीयांशैर्योजनात् पञ्च पञ्च ते "इति अस्याः स्मृतेः भोगालयमित्यादिपदानि सुगमत्वात् न व्याख्यातानीति वेदितव्वम्। अस्मिन् स्थूलदेहे वर्त्तमानम् व्यष्टिचैतन्यम् विश्वाख्यम्भवति समष्टिचैतन्यम् वैश्वानराख्यञ्चेति वेदितव्यम्। स्थूलदेहस्य वृत्तिमती अवस्थितिः जाग्रत्पदवाच्या भवति। यत्रेन्द्रियैर्विषयोपलब्धिर्भवतीति वेदितव्यम्। स्थूलदेह एव अन्नमयकोशपदवाच्यो भवतीति वेद्यम्। सूक्ष्मस्तु प्रलयावधिः सूक्ष्मः सूक्ष्मदेहः अणुपरिमाणः तु शब्दः स्थूलदेहात् सूक्ष्मदेहं व्यावर्त्तयति। स्थूलदेहात् सूक्ष्मदेहस्य वैलक्षण्यं द्योतयतीत्यर्थः। किंलक्षणः प्रलयावधिः प्रलयः कल्पान्तः अवधिः अवसानभूमिः सीमा यस्येति स तथाभूतः स्थितिकाले तिष्ठति प्रलयकाले नश्यतीत्यर्थः। इदन्तु तटस्थलक्षणम् सूक्ष्मदेहस्य पूज्यपादसूत्रकारेण प्रतिपादितम् स्वरूपलक्षणन्तु वक्ष्यमाणस्मृत्या प्रतिपाद्यते "सूक्ष्मम्मनोबुद्धिदशेन्द्रियैर्युतम् प्राणैरपञ्चीकृतभूतसम्भवम्। भोक्तुः सुखादेरनुसाधनम् भवेच्छरीरमन्यद्विदुरात्मनोबुधाः" इति अत्रस्मृतौ सूक्ष्मशरीरम् अपञ्चीकृतभूतसम्भवम् कथ्यते तत्प्रकारः प्रदर्श्यते तमःप्रधानप्रकृतिजानामपञ्चीकृतानाम्वियदादीनाम्भूतानाम्पञ्चभिः सत्वगुणभागैरुपादानभूतैः श्रोत्रत्वगक्षिरसनाघ्राणाख्यम् ज्ञानेन्द्रियपञ्चकम् क्रमादुपजायते एकैकभूतसत्त्वांशादेकैकमिन्द्रियम् यथाक्रमम् जायतइत्यर्थः तैः सत्त्वांशैः सर्वैः सम्भूय वर्त्तमानैः अन्तःकरणम् मनो बुद्धिरुपादानभूतम द्रव्यमुपजायते तदन्तः करणम् विमर्शाध्यवसायभेदात् मनोबुद्धिरूपाभ्यां द्विप्रकारम्भवति। तेषाम्वियदादीनामेव पञ्चभीरजोभागैस्तदुपादानभूतैर्वाक्पाणिपादपायूपस्थाभिधानानि कर्म्मेन्द्रियाणि क्रियाजनकानीन्द्रियाणि क्रमादुपजायन्ते एकैकभूतरजोन्शादेकैकमिन्द्रियं यथाक्रमं जायत इत्यर्थः। तैः रजोन्शैः सर्वैः सम्भूयवर्त्तमानैः प्राणोजायते स प्राणः प्राणनादिव्यापारभेदात् प्राणापानसमानोदानव्यानरूपेभ्यः पञ्चधाभवति। ज्ञानेन्द्रियकर्म्मेन्द्रियप्राणपञ्चकैर्मनसा बुद्धया सह सप्तदशभिः सूक्ष्मं शरीरम्भवति तदेव लिङ्गमप्युच्यते सूक्ष्मशरीरस्य अपञ्चीकृतभूतसम्भवत्वप्रदर्शनेनैव सूक्ष्म शरीरगतसप्तदशपदार्था अपि व्याख्याता इतिवेदितव्यम्। भोक्तुर्जी-

७

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

वंस्य सुखादेः सुखदुःखरूपभोगस्य अनुसाधनम् अत्र लोके तेनैव भोगानुभवात् "चक्षुषा पश्यति मनसा पश्यति" इत्यादिश्रुतिभिः लोकान्तरे च सूक्ष्मशरीरेणैव गमनसम्भवात्। तत्रापि तेनैव भोगानुभवात् इत्यर्थः। अस्मिन् सूक्ष्मदेहे वर्त्तमानम् समष्टिचैतन्यम् हिरण्यगर्भाख्यम्भवति व्यष्टिचैतन्यम् तैजसाख्यञ्च सूक्ष्मदेहस्य वृत्तिमती अवस्थितिः स्वप्नपदवाच्या जागरितसंस्कारजन्यप्रत्ययविषयणीभवति यद्यपि जाग्रत्यपि सूक्ष्मदेहस्य वृत्तिर्भवति। परन्तु स्थूलदेहापेक्षैव भवति। स्वप्ने स्थूलदेहनिर्पेक्षेति वेदितव्यम्। सूक्ष्मदेहे एव प्राणमयमनोमयविज्ञानमयकोशाः अन्तर्भवन्ति इति वेदितव्यम्। स्थूलसूक्ष्मदेहगतभूतेन्द्रियान्तःकरणप्राणाः यथाक्रमम्परिचीयन्ते शब्दगुणवानाकाशः। स्पर्शगुणवान् वायुः परान्वयात् शब्दगुणवाँश्च। रूपगुणवानग्निः परान्वयात् शब्दस्पर्शगुणवाँश्च। रसगुणवज्जलम् परान्वयात् शब्दस्पर्शरूपगुणवच्च। गन्धगुणवती पृथ्वी परान्वयात् शब्दस्पर्शरूपरसवती च। श्रोत्रत्वगक्षिरसनाघ्राणाख्यानि ज्ञानेन्द्रियाणि यथाक्रमम् शब्दस्पर्शरूपरसगन्धविषयाणि दिग्वायुसूर्य्यवरुणाश्विदैवतानि वेदितव्यानि। वाक्पाणिपादपायूपस्थाभिधानानि कर्मेन्द्रियाणि यथाक्रमम् वचनादानगमनविसर्गानन्दवृत्तीनि वह्नीन्द्रोपेन्द्रमृत्युप्रजापतिदैवतानि वेदितव्यानि। अन्तःकरणम्मनोबुद्धिभेदात् द्विविधम् मनोविमर्शात्मकम् चन्द्रदैवतम्बुद्धिरध्यवसायात्मिका ब्रह्मदैवतेति वेदितव्यम्। अन्तःकरणम्मनोबुद्धिचित्ताहङ्कारभेदात् चतुर्विधमपि स्वीकृतम्। तत्र अहङ्कारोऽभिमानात्मको रुद्रदैवतः चित्तञ्चेतःस्वरूपम् क्षेत्रज्ञदैवतमिति वेदितव्यम्। प्राणः प्राणापानसमानोदानव्यानभेदात् पञ्चविधः प्राणादिस्थितिप्रदेशास्तद्व्यापाराश्च यथाक्रमं स्मर्य्यन्ते वक्ष्यमाणस्मृतिभ्याम् "हृदिप्राणो गुदेऽपानः समानो नाभिमण्डले। उदानः कण्ठदेशे स्यात् व्यानः सर्व्वशरीरगः" "अन्नप्रवेशनम्मूत्राद्युत्सर्गोऽन्नादिपाचनम्। भाषणादिनिमेषाश्च तद्व्यापाराः क्रमादमी" इति आमुक्तेः कारणम् आमुक्तेः मुक्तिपर्य्यन्तम् कारणम् कारण शरीरम् अविद्यारूपं तिष्ठतीति योजनीयम्। यावत्सृष्टि प्रलयप्रवाहरूपपंचम् तिष्ठति तदूर्ध्वं सति पुण्यपुञ्जोदये मोह रात्रिव्यतीतौ बुद्धिप्रबोधचन्द्रान्शावुदिते निरवधिसुखनीरधिस्वात्मसम्पत्तौ सत्याम् सत्यांच मुक्तिनिष्पत्तौ नश्यतीत्यर्थः। अत्र

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

शंकनीयम्भवति सुषुप्तावपि सूक्ष्मशरीरवृत्त्युपरतिदर्शनात् "तद्यत्रैत-त्सुप्तःसमस्तःसम्प्रसन्नः स्वप्नन्न विजानाति तदा आसु नाड़ीषु सुप्तो भवति प्राज्ञेनात्मना सम्परिष्वक्तो न बाह्यं किंचन वेद नान्तरम्" इत्यादिश्रवणाच्च सुक्ष्मस्तु प्रलयावधिरित्यत्रसूक्ष्मस्तुसुषुप्त्यवधिरित्येव कथन्न स्यात्। तत्रोच्यते सुषुप्तिदशायाम् सूक्ष्मशरीरवृत्त्युपरतिरेव दृश्यते न च तस्य विनाशः सम्भवति सुषुप्तिस्थानात् आत्मनः पुनस्तस्य च सूक्ष्मशरीरस्य उत्थानश्रवणात्। तथा च श्रूयते "कुत एतदागात्" एतत्प्रतिवचनावसरे "यथाग्नेः क्षुद्राविस्फुलिङ्गा व्युच्चरन्त्येवमेवैतस्मादात्मनः सर्व्वे प्राणाः" इत्यादि "सत आगम्य न विदुः सत आगच्छामहे" इति च। यथा भूपतेः स्वावेक्षणीयकार्य्यावेक्षणसमये सर्व्वाः प्रकृतयः कृतसन्निधानाः स्वस्वकार्य्यसम्पादिका भवन्ति तस्य च अन्तःपुरि शयनावसरे निवृ त्तिकास्तिष्ठन्ति काचित्प्रधानाप्रकृतिः भूपतिसन्निहिता तिष्ठति पुनरपि जाग्रत्यस्मिन् सर्व्वास्तास्तथाभूताः भवन्ति एवमप्यात्मनि द्रष्टरि दृश्यकार्यसम्पृक्ते सति सूक्ष्मशरीरीभूताः देहेन्द्रियादयः सवृत्तिकाः भवन्ति अस्मिन् सुषुप्ते सति निवृ त्तिका भवन्ति प्रकृतिश्च प्रधानभूता तत्सन्निहिता तिष्ठति इति वेदितव्यम्। तस्मादुपपन्नम् सूक्ष्मशरीरस्य प्रलयावधित्वम् न सुषुप्त्यवधित्वमिति। उक्तमपि वाचस्पतिमिश्रैः लयङ्गच्छतीति लिङ्गम् हेतुत्वेन चास्यलिङ्गत्वमिति भावः। सूक्ष्मशब्दस्यैव लिङ्गशब्दःपर्याय इति वेदितव्यम्। तस्मादपि सूक्ष्मस्य प्रलयावधित्वमुपपन्नमिति वेदितव्यम्। भवति च पुनः शंकोत्थानम् जीवस्य स्वप्नजागरितयोस्तु उपाधिसम्पर्कवशात् पररूपापत्तिमिवापेक्ष्य तदुपशमात् "सता सौम्य तदा सम्पन्नो भवति" इतिश्रुतेः सुषुप्तौ स्वरूपापत्तिर्विवक्ष्यते ततश्च सुषुप्तिमुक्त्योः सादृश्यात् आमुक्तेः कारणमित्यत्र आसुषुप्तेः कारणमिति कथन्न। तत्रोच्यते यद्यपि सुषुप्तौ जीवस्य स्वरूपसम्पत्तिर्दृश्यते तथापि "सर्व्वे पाप्मानोतो निवर्त्तन्ते अपहतपाप्मा ह्येष ब्रह्मलोकः" इत्यादिश्रुत्या ब्रह्मसम्पत्तिः पाप्मस्पर्शाभावे हेतुः समधिगतः उपपद्यते च सुषुप्तौ पाप्मस्पर्शः पुनः संसृतौ प्रत्यावर्त्तनदर्शनात् सोहमस्मि इति सौषुप्त्यचैतन्यस्य आत्माद्यस्मरणमात्मोत्थानमन्तरा नावकल्पते शब्देभ्यश्चापि तस्योत्थानमवगम्यते तथाहि "पुनः प्रतिन्यायम्प्रतियोन्या द्रवति बुद्धान्तायैव इमाः सर्व्वाः प्रजाः अहरहर्गच्छन्त्य एतम्ब्रह्मलोकन्न विदन्ति त इह व्याघ्रोवासिंहो वा वृको

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

वा वराहो वा कीटो वा पतङ्गो दंशो वा मशको वा यद्यद्भवन्ति तत्त-दा भवति" इत्यादि श्रुतिभ्यः सुषुप्तौ च नितराङ्कारणासत्त्वम् नावकल्पते यतः सुषुप्तकालीनोपाधिरेव कारणशब्देनाधिगम्यते 'साकारणशरीरं स्यात् प्राज्ञस्तत्राभिमानवान्' इत्याद्युक्तेः सुषुप्तौ स्वरूपसम्पत्तिकालीनमज्ञानरूपमेवकारणसत्त्वम् श्रूयते "सुखमहमस्वाप्सन्न किञ्चिदवेदिषम्" इत्यादिश्रुत्या यथाग्नेर्दहनप्रकाशनसम्पन्नस्याप्यरणिगतस्य दहनप्रकाशने तिरोभवतः यथा वा भस्मनाछन्नस्य तस्य। एवम् स्वरूपसम्पन्नस्यापि सच्चिदानन्दस्यात्मनःतत्र कारणरूपाविद्याग्रस्तत्वात् सत्यपि स्वस्मिन् निरवधिसुखनीरधौ निमग्ने ज्ञानैश्वर्यतिरोभाव उपपन्न इति वेदितव्यम्। तथा चोपपन्नमेवामुक्तेः कारणमिति अनुपपन्नञ्चासुषुप्तेः कारणमिति वेदितव्यम्। १।२।२

प्रथमाध्यायस्थ प्रथमपादस्थचतुर्थ सूत्रीयकर्म्मशब्दमनुसन्दधानः श्रीमान्सूत्रकारः संख्याविशेषणेन तद्विशिनष्टि।

प्रारब्धसञ्चितक्रियमाणभेदात्
त्रिविधं कर्म्म १।२।३

प्राणिजन्माव्यवहिताद्यक्षणे ईश्वरानुमत्या संचितकर्म्मणः कश्चिदंशः कालवेगवृतः आभोगायतनस्थूलशरीरस्थायी अवश्यम्भावि भोगः प्रारभ्यते स एव प्रारब्धं कर्म्म व्यपदिश्यत इति वेदितव्यम्। अनादिजगत्प्रवाहप्रवाह्यमाणस्य प्राणिनः अशेषजन्मक्रियमाणकर्म्मनिष्पन्नम् पौनःपुन्येन भोगप्रदम् प्रारब्धजनकम् ज्ञानाग्निदाह्यम् कर्म्म संचितव्यपदिश्यते। जन्मारभ्य मरणपर्य्यन्तम् सम्पद्यमानमैहिकामुष्मिकभोगप्रदम् संचितप्रारब्धजनकम् ज्ञानाग्निदाह्यम् कर्म्म क्रियमाणव्यपदिश्यते अस्मात् प्रारब्धसंचितक्रियमाणाख्यकर्म्मत्रितयरूपभेदात् त्रिविधम् तिस्रो विधाः प्रकारा यस्येति त्रिविधङ्कर्म्म पुण्यपापरूपाकृतिरिति वेदितव्यम्।१।२।३॥

एवं सूत्रकारः कर्म्मत्रैविध्यम्प्रतिपाद्य प्रत्येकम्विशिनष्टि।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

पूर्व्वशरीरसम्पादितम्विद्यमानशरीरो-पभोग्यम्प्रारब्धम् १।२।४॥

पूर्व्वशरीरैः प्राक्तनदेहैः सम्पादितं समर्जितं यत् तत्तथा-रूपम् विद्यमानशरीरासमर्ज्जितमिति योजनीयम् । विद्यमानशरीरेण वर्त्तमानदेहेन उपभोग्यमुपभोगयोग्यमिति वेदितव्यम् । अत्राविद्यमान-शरीरानुपभोग्यमिति योजनीयम् । कुलालचक्रवत्प्रवृत्तवेगम् अप्रतिवद्धम् प्रतिपालनीयवेगक्षयम् अवश्यभोक्तव्यम् ज्ञानाक्षय्यम् कर्म्म प्रारब्ध-व्यपदिश्यते । ननुप्रारब्धकर्म्मणः अवश्यभोक्तव्यतायां सत्याम् "क्षीयन्ते चास्य कर्म्माणि तस्मिन् दृष्टे परावरे" इत्यादिश्रुतेः 'ज्ञानाग्निः सर्व्वकर्म्माणि भस्मकात्कुरुतेऽर्जुन" इत्यादिस्मृतेश्च अप्रामाण्यङ्कथन्न स्यात् । तत्रोच्यते ज्ञाननिमित्तःसुकृतदुःकृतरूपकर्म्मक्ष-योऽवधारितः तत्राप्रवृत्तफले एव जन्मान्तरसञ्चिते अस्मिन् जन्मनि च प्राज्ज्ञानोत्पत्तेः क्रियमाणे सुकृतदुःकृते ज्ञानात् क्षीयेते न त्वार-ब्धकर्म्मणी सुकृतदुःकृते अर्धभुक्तफले याभ्यामेतद्भोगायतनम् शरीरन्निर्म्मितम् कुतस्त्वेष निश्चयः । "तस्य तावदेवचिरं यावन्न विमोक्ष्येऽथ सम्पत्स्ये" इतिश्रुतेः शरीरभङ्गावधित्वात् मुक्तिप्राप्तेः प्रारब्धाद्यावन्न विमुच्यते तावानेव विलम्बः । तन्मुक्तौ स्वरूपसम्पत्ति-र्ब्रह्मप्राप्तिर्भवतीत्यर्थः अन्यथा हि ज्ञानात् सप्रारब्धसञ्चितक्रियमाण-क्षये सति स्थितिकारणासत्वात् ज्ञानाधिगमाव्यवहितक्षण एव मुक्तिमश्नुवीत तदा शरीरभङ्गप्रतीक्षाम् नाचक्षीत । ननु वस्तुना यथा स्वसामर्थ्यम्भवितव्यम् कर्म्मक्षपयता ज्ञानेन न किंचित् सञ्चितक्रिय-माणरूपम् कर्म्माच्छेद्यं स्यात् किंचित्प्रारब्धरूपं चानुच्छेद्यमिति नहि अविशेषाग्निवीजसंयोगे केषाञ्चिद्द वीजशक्तिर्दह्यते केषाञ्चिन्न-दह्यत इति शक्यमभ्युपगन्तुम् । तत्रोच्यते न तावदुपेक्ष्यारब्धकर्म्म-ज्ञानोत्पत्तियु ज्यते । अपेक्षिते च तस्मिन् धनुर्विमुक्तवाणस्येव प्रयुक्त-रंहसो मध्ये निरोधाभावात् । भवति रंहसः क्षयः प्रतिपालनीयः प्रतीक्ष-णीय इति यावत् ज्ञानमपि मिथ्याज्ञानवाधनेनन प्रारब्धकर्म्मक्षपयति वाधितमपि मिथ्या ज्ञानम् द्विचन्द्रादिज्ञानमिव संस्काररूपेण कञ्चि-त्कालमनुवर्त्तत एव अपि च नैवात्र विवदितव्यम् । "जीवन्मुक्तश्च तद्विद्वान् पूर्व्वोपाधिगुणाँस्त्यजेत्" इत्यादिस्मृत्या जीवत एव मुक्तिश्र-

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

वणात् अत्र जीवनहेतोः प्रारब्धसत्त्वस्य मुक्तिहेतोः ज्ञानसत्त्वस्य च समानकालीनत्वव्यञ्जनात् सिद्धा प्रारब्धकर्म्मणोऽवश्यभोक्तव्यतेति वेदितव्यम्। श्रूयतेपि सञ्चितक्रियमाणयोर्ज्ञानप्रणाश्यत्वम्। "यथा-पुष्करपलाश आपो न श्लिष्यन्ति एवम्विदि पापं कर्म्म न श्लिष्यते" इत्यादिश्रुत्या। क्रियमाणकर्म्मणः अस्पर्शभावात् भोगाजनकत्वात् प्रणाशो व्यज्यते "तद्यथेषीकातूलमग्नौ प्रोतम्प्रदूयेतैवम् हास्य सर्व्वे-पाप्मानः प्रदूयन्ते" इत्यादिश्रुत्या सञ्चितकर्म्मणः प्रणाशोऽव्यज्यते "अवश्यमेव हि भोक्तव्यं कृतङ्कर्म्मशुभाशुभम्। नाभुक्तं क्षीयते कर्म्म कल्पकोटिशतैरपि" इत्यादिस्मृत्या प्रारब्धकर्म्मणोऽवश्यभोक्तव्यता प्र-तिपाद्यते। ननु प्रारब्धकर्म्मणः "तस्य तावदेवचिरम् यावन्न विमोक्ष्ये-ऽथ सम्पत्स्ये" इत्यादिश्रुतिभिः शरीरपातावधिकरणात् उक्तस्मृतौ कल्पकोटिशतैरपि इति वाक्यात् अतिबृहत्परिमाणस्थूलकालव्यञ्ज-नात् कथन्नासमञ्जस्यम् इति प्रष्टव्ये प्रतिवचनम् "यावदधिकारमव-स्थितिराधिकारिणा मू" इति ब्रह्मसूत्रात् अधिकारिणाम् लोकस्थिति-हेतुष्वधिकारेषु नियुक्तानाम् अधिकारतन्त्रत्वात् प्रारब्धस्थितेः अतिम-हापरिमाणस्थूलकालव्याप्यप्युपपद्यते इति वेदितव्यम्। यथाचोपलभ्यते पुराणादावुपाख्यानम् अपान्तरतमानामवे दाचार्य्यः पुराणर्षिर्विष्णुनि-योगात् कलिद्वापरसन्धौ कृष्णद्वैपायनो व्यासनामाऽभवदिति ब्रह्ममा-नसपुत्रोवशिष्ठश्च निमेः शापात् विगतपूर्व्वदेहः पुनः पितुराज्ञया मैत्रावरुणिर्बभूवेति एवम्भृगुसनत्कुमारदक्षनारदप्रमुखानामपिभूयसी देहान्तरोत्पत्तिकथा तेन तेन निमित्तेन स्मृतावुपलभ्यते मन्त्रार्थवादश्रु-तावपि प्रायोपलब्धिर्भवति तत्तत्कथानकस्येति तेष्वधिकारिकेषु केचि-त्पूर्व्वदेहपातानन्तरमपरदेहमाददते। केचित्तु विद्यमान एवपूर्व्वदेहे योगै-श्वर्य्यानुभावात् अनेकदेहादानन्यायेन अपरदेहमाददते। भवति च श्रुतिः। यथायम्भगवानादित्यः सहस्रयुगपर्य्यन्तम् कालनियमनादि-रूपजगतोधिकारं चरित्वा प्रारब्धोपरमे कैवल्यमनुभवति इति प्रक्रम्य "अथ तत ऊर्ध्वम् उदेत्यनैवोदेता नास्तमेतैकल एव मध्ये स्थाता" इत्यादि एवमेते अपान्तरतमादयः ईश्वरानुमत्या तत्राधिकारनियुक्ताः सन्तः सत्यपि ब्रह्मज्ञानाधिगमे कैवल्यहेतावक्षीयमाणप्रारब्धकर्म्मणो यावदधिकारमवतिष्ठन्ते अधिकारोपरमे क्षीणप्रारब्धकर्म्माणःकेवलिनो भवन्ति एतेऽधिकारिणः सकृत्प्रवृत्तवेगमेव प्रारब्धकर्म्मातिवाहयन्तः स्वेच्छयैव गेहादिव गेहान्तरम् देहाद्देहान्तरङ्कुर्वन्तःस्वाधिकारनि-

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

र्व्वाहायालुप्तस्मृतय एव स्वायत्तेन्द्रियप्रकृतित्वात् उत्पाद्य देहान् युगपत्क्रमेण वा प्रविशन्ति अधितिष्ठन्ति च न चैते जातिस्मराः स्वीक्रियन्ते किन्तु त एव त एवैते इतिस्मृतिप्रसिद्धेः जातिस्मराः पूर्व्वनामप्रत्यभिज्ञानहीनाः परतन्त्राः साभिमाना भवन्ति। अधिकारिकास्तु पूर्व्वनामानः पूर्व्वप्रत्यभिज्ञानसम्पन्नाः स्वतन्त्रा निरभिमाना भवन्ति। अनयोरितिवैषम्यमिति वेदितव्यम्। अधिकारिकाणाम् सकृत्प्रवृत्तकर्म्मैव देहान्तरारम्भकारणम् न कर्म्मान्तरमिति वेदितव्यम्। प्रसिद्ध एव स्मृतौ प्रारब्धानवसान एव सुलभाया ब्रह्मवादिन्या जनकेन विवदितुकामायाः स्वदेहस्व्युदस्य जनकदेहप्रवेशः व्युद्यतेन साधर्म् एवमन्त्राख्यानप्रपञ्चेन उपपन्नम् प्रारब्धकर्म्मणः अवश्यभोक्तव्यत्वम् चिरकालव्यापकत्वञ्च अथवा "कल्पकोटिशतैरपि" इतिवाक्यात् कल्पशब्दः न्यायशब्दपर्य्यायः "अभ्रेषन्यायकल्पास्तु देशरूपं समंजसम्" इत्यादिकोशात् ततो निरत्ययस्थानाध्यसनादिन्यायकोटिशतैरपि इत्यर्थो वेदितव्यः। असंख्यैः निरुपद्रवदेशसेवनादिनीतिरूपैः प्रतीकारैः प्रारब्धकर्म्माप्रतीकार्य्यम्। अप्रतीहार्य्यम्भोगमन्तरेति वेदितव्यम्। यद्वा अज्ञानि...म् सञ्चितक्रियमाणान्यपि कर्म्माणि भोगमन्तरा चिरकालैरपि जगत्प्रवाहपतितासंख्यजन्मभिर्न क्षीयन्त इत्याभिप्रायो वेदितव्यः स्मृतेरस्याः। ननु ज्ञानिनामज्ञानिनामपि तुल्यम्प्रारब्धसत्त्वमभ्युपगम्यते तदानयोःकिम्वैषम्यम् तत्रोच्यते यावत्प्रारब्धम् ज्ञानिनाम् जीवन्मुक्तत्वेन शरीरधारणम्। अज्ञानिनान्तु वद्धत्वेन तद्धारणमिति तयोर्वैषम्यम्वेदितव्यम्। "ज्ञानिनोऽज्ञानिनश्चात्र समे प्रारब्धकर्म्मणी न क्लेशो ज्ञानिनो धैर्य्यान्मूढाः क्लिश्यन्त्यधैर्यतः" इत्याद्युक्तिरपि तद्वैषम्यप्रतिपादिकेति वेदितव्यम् "किमिच्छन् कस्य कामाय शरीरमनुसंज्वरेत्" इत्यादिवाक्यात् ज्ञानिनाम्भोग्ये भोगे च मिथ्यात्वनिश्चयात् काम्यत्वकामुकत्वे निरस्ते भवतः। तयोरभावे निस्नेहदीपवत् सुखदुःखभोगजौ हर्षविषादौ शान्तौ भवत इति वेदितव्यम्। यथा गन्धर्वनगरे ऐन्द्रजालिकनिर्मितम् किञ्चिद्वस्तु जानन्न कामयते किन्तु हसन्निदम् जिहासति तथा आपातरमणीयेषु स्रक्चन्दनवनितादिषु प्रतीतिमात्ररम्येषु विवेकी वासनाजन्मादिदोषदृष्ट्यानानुरज्यति किन्तु विरज्यति जिहासति च यथा पीयूषपानविनिवृत्तपिपासः न कालकूटं पातुमिच्छति तथा ज्ञानामृतसुखास्वादनतृप्तः विषयविषम्भोक्तुन्नेच्छति प्रारब्धकर्म्मप्राबल्यादवश्यम्भाविनी भोगेच्छा भोगं सम्पादयि-

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

श्यत्येवेति सम्पादयतु नाम ।।तथापि विवेकी क्लिश्यन्नेव चिष्टिगृहीतवद्भुंक्ते भुञ्जानोपि विवेकी नाद्यापि किञ्चिदात्मनः छिन्नमिति विद्वान् प्रारब्धप्रवृत्तः क्लिश्यति परन्तु अयं क्लेशो न संसारतापरूपः किन्तु वैराग्यरूप एवेति वेद्यम् । संसारतापस्तु अज्ञाननिमित्तोधिगतःलोके शास्त्रे च ज्ञानिनो भोगकालिकक्लेशस्तु तद्विपरीतः विवेकनिमित्त इति वेद्यम् । यतो विवेकी विवेकेन परिक्लिश्यन्नल्पेनैव भोगेन तृप्यति विवेकाभावे तु अविवेकी अनन्तभोगेपि कदाचिदपि कथञ्चिदपि केनचिदपि कुत्रचिदपि न तृप्यतीति वेदितव्यम् । यथा स्मर्यते "न जातु कामःकामानामुपभोगेन शाम्यति । हविषा कृष्णवर्त्मेव भूय एवाभिवर्धते"इत्यादि। ननु दोषदर्शनलक्षणे विवेके सत्यपिजाग्रति आरब्धकर्म्मज्ञानिनां भोगेच्छाजनकङ्कथंस्यादिति प्रश्ने प्रतिवचनम् इच्छानिच्छापरेच्छाभेदात् त्रिविधम् प्रारब्धम् वेदितव्यम् । "इच्छानिच्छापरेच्छा च प्रारब्धं त्रिविधं स्मृतम्" इत्युक्तेः । तत्रेच्छा प्रारब्धं यथा अपथ्यभोक्तारः तस्कराः राजपत्नीगामिनश्च स्वानर्थं जानन्त एव प्रारब्धकर्म्मणो भोगस्य अपरिहार्यत्वात् तत्तद्भोगजनानुकूलेच्छया तत्तत्कर्म्मसु नियुज्यन्त इति वेदितव्यम । तथा भगवद्वाक्यम् "सदृशं चेष्टते स्वस्याः प्रकृतेर्ज्ञानवानपि । प्रकृतिं यान्ति भूतानि निग्रहः किङ्करिष्यति" इति । अनिच्छाप्रारब्धं यथा अर्जुनकृष्णप्रश्नोत्तराभ्यां स्मर्य्यते "अथकेनप्रयुक्तोयम्पापंचरति पूरुषः । अनिच्छन्नपि वार्ष्णेय बलादिवनियोजितः । कामएष क्रोध एष रजोगुणसमुद्भवः । महाशनो महापाप्मा विद्ध्येनमिह वैरिणम् । स्वभावजेन कौन्तेयनिबद्धः स्वेन कर्म्मणा । कर्त्तुनेच्छसि यन्मोहात्करिष्यस्यवशोपि तत्" इतिपरेच्छाप्रारब्धं यथा वृद्धो मनुष्यः स्वयं कन्दुकक्रीड़ां इच्छन्नपि अनिच्छन्नपि नाचरति किन्तु कुमारनिर्बन्धानुरोधात् तस्येच्छयातत्प्रीत्यर्थम् क्रीड़ते ततश्च द्रुततरपतनोत्पतनप्रपतनादिनिबन्धनश्रमजन्यहस्तपादादिवेदनारूपप्रारब्धभोगमनुभवति यथा च कामुकः कामिनीच्छया तत्प्रीत्यर्थम् नानानिषिद्धकर्म्माचरन् क्रीड़ामृगायते काष्ठपुत्तलिकायते च । ननु ज्ञानिनामपि प्रारब्धवशादीच्छाङ्गीकारे किमिच्छन्निति श्रुतिविरोधः कथन्न स्यात् यतःकिमिच्छन्नितिश्रुत्या ज्ञानिनामिच्छा निषिध्यते । तत्रोच्यते नानया श्रुत्या वस्तुतः इच्छाया अभावोभिधीयते किन्तु सत्या अपि तस्याः वासनाजननकर्म्मसमर्ज्जनभोगानुभवनवासनाजननकर्म्मसमर्ज्जनभोगानुभवनादिरूपचक्रकहेतुसमर्थप्रवृत्ति-

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

जनकत्वम् नास्तीति बोध्यत इति वेदितव्यम् । यथा भर्ज्जितानि बीजानि स्वयंस्वरूपेण विद्यमानान्यपि नाङ्कुरादिकार्यजनकानि भवन्ति तथा विद्वदिच्छा स्वयं रूपेण विद्यमानापि इष्यमाणपदार्थस्यासत्यत्वज्ञानेन बाध्यमाना न पूर्व्वोक्तप्रवृत्तिजननी वासनादिकार्यक्षमा भवतीत्यर्थः । ज्ञानिनां प्रारब्धम् दग्धरज्जूपमस्वेदितव्यम् । यथा दग्धा रज्जुः रज्वाकारेण स्थितापि न बन्धनकार्य्यसमर्था भवति तथैतत्प्रारब्धं स्वरूपप्रतिष्ठम् भोगं जनयदपि न ज्ञानिनां हर्षविषादप्रदम्भवति । "जीवन्नेवेह विद्वान् हर्षशोकाभ्याम्विमुच्यते" इत्यादिश्रुतिरपि ज्ञानिनां सत्यपि प्रारब्धे तद्भोगे च तज्जनितसुखदुःखानुभवम् निषेधयति । तथा च स्मर्य्यते "दुःखेष्वनुद्विग्नमना सुखेषु विगतस्पृहः । वीतरागभयक्रोधःस्थितधीर्मुनिरुच्यते" इति ननु प्रारब्धस्य अवश्यभोक्तव्यत्वस्वीकृतौ लोकशास्त्रसम्मतायाः शान्त्याः वैयर्थ्यं कथन्न स्यादिति प्रष्टव्येप्रतिवचनम् यद्यपि "प्रारब्धकर्म्मणाम् भोगादेव क्षयः" इत्यादिशास्त्रीयसमयात् प्रारब्धमवश्यम्भाविभोगम् तथापि शान्तिसामर्थ्यात् तदुत्कटं सत् भवत्यनुत्कटम् प्रबलं सत् दुर्व्वलम् तत्तद्भोगप्रदं सदपि अधिकवेदनमूनवेदनम्भवतीत्यर्थः । इतरथाहि शान्त्या प्रारब्धकर्मणि सर्वथा क्षीणे सति देहनाशः प्रसज्येत । अपि च उपस्थितशरीराविरोधेन सकलारिष्टझटितिप्रशमनपूर्वकेत्यादिसङ्कल्पप्रसिद्धेः शान्तिर्न शरीरविरोधिनी व्यज्यते । किन्तु तदविरोधिन्येव । अतश्च उपपद्यत एव न शान्तिः प्रारब्धक्षयकरी किन्तु तदौत्कट्यनिवारिणी तन्न्यूनत्वकारिणीति भावः शान्त्याः शरीरस्थितिहेतुप्रारब्धक्षयहेतुत्वे स्वीकृते शरीरविरोधित्वम· व्याहतं स्यात् ततश्च सकलसम्प्रदायविरोधापत्तिः प्रसज्येत । तस्माच्छान्तिः प्रारब्धभोगन्यूनत्वकरीत्युपपन्नं वेदितव्यम् । अपि च "शमथस्तु शमः शान्तिः" इति कोशात् शान्तिशब्दः शमशब्दपर्य्यायः प्रसिद्धः शमस्तु चित्तोपशमे प्रसिद्धः तत्र शमस्तु न चित्तक्षयकरो दृश्यते । किन्तु तत्प्राबल्यनिवारक एव तथा च शान्तिरपि प्रारब्धप्राबल्यनिवारिणी तन्न्यूनत्वहेतुरेवोपपद्यते न तत्क्षयहेतुरिति वेदितव्यम् । भवति च किम्वदन्ती लोकप्रसिद्धा वक्ष्यमाणा द्वौ ब्राह्मणक्षत्रियौ प्राचीनौ सखायौ प्राणदण्डप्रदराज्यपदप्रदप्रारब्धभागिनौ अभवताम् यदृच्छया तत्प्रारब्धभोगदिने चतुर्द्दशीतिथौ तावुभौ क्रमात् शिवाराधनम्वेश्यासङ्गसुखास्वादनञ्च स्वीकृतवन्तौ तत्र प्रथमो नक्तव्रती यावद्दिनं

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

निराहारः श्रीफलदलानि शिवायार्पयितुम् आचिन्वन् कण्टकविद्धचरणःप्राणदण्डप्रतिनिधिन्तच्छेदनामन्वभवत् । द्वितीयःराज्यपदप्रतिनिधिम्पथिगतश्चतुश्शतमिता मुद्रा अलभत् । तदनन्तरं प्रथमो दध्यौ अहो धर्मसेविनोपि ममदुस्सहवेदना इति । द्वितीयो मुमुदे अहोममाधर्म्मसेविनोपि धनप्राप्तिरिति । तदनन्तरम् तयोस्तत्तत्प्रारब्धसूचिका धर्म्माधर्मनिबन्धनतत्तन्न्यूनत्वज्ञापिका तयोर्विषादहर्षहारिका क्रमशोधर्माधर्म्मप्रवृत्तिनिवृत्तिकारिका नभोवाणी बभूवेति इयङ्किम्वदन्ती समभिहितदुरितारब्धप्राबल्यप्रशमनशान्तिस्वरूपनिर्णयघोषिणी । तथाच सुकृतारब्धप्राबल्यप्रशमनदुःकृतिरूपसमुद्घोषिणीति वेदितव्यम् । शीतगूष्णगूशैत्यौष्ण्यप्राबल्यहरौ प्रत्यक्षौ तथा शान्तिपापकृती दुःकृतसुकृतप्राबल्यप्रशमिन्याविति वेदितव्यम् । एतावता ग्रन्थसन्दर्भेण व्याख्यातानि प्रारब्धविशेषणानि कुलालचक्रवत् प्रवृत्तिवेगमप्रतिबद्धमित्यादीनि समुपपन्नानि जातानीति वेदितव्यम् ॥

कर्म्म प्रसंख्यानगतक्रमलब्धसञ्चितकर्म्म परिचाययति श्रीमान् सूत्रकारोऽग्रिमसूत्रेण ।

तथाविधम्विद्यमान शरीरानुपभोग्यं संचितम् १ । २ । ५

तथाविधन्तथा तादृशी विधा प्रकारो यस्येति तथाविधम् तथाशब्दो यथाशब्देन सम्बन्ध्यते हि ततःयथा प्रारब्धस्य पूर्व्वार्जितत्वरूपप्रकारः तथा पूर्व्वार्जितत्वरूपप्रकारोयस्येति तथाविधम् पूर्व्वार्जितमित्यर्थः । प्रारब्धस्य विद्यमानशरीरोपभोग्यत्वरूपप्रकारस्य सञ्चितस्य विद्यमानशरीरानुपभोग्यत्वरूपप्रकारात् वैपरीत्यात् न तथाविधं शब्दः विद्यमानशरीरोपभोग्यशब्दम्परामृशतीति वेदितव्यम् । विद्यमानशरीरानुपभोग्यम् विद्यमानशरीरेण वर्त्तमानदेहेन अनुपभोग्यम् उपभोगायोग्यमिति तथाभूतम् अविद्यमानशरीरोपभोग्यमिति वेदितव्यम् । "चिञ् चयने" इतिसकर्मकधात्वनुगतम् निष्ठाख्यक्तप्रत्ययान्तम् पदम् सञ्चितङ्कर्म्मवाच्यम् । सञ्चयक्रियाविषयीभूतमनादिकालपारम्पर्य्येण राशिरूपेण सम्पादितमित्यर्थः । सञ्चितकर्म्मणो न स्वरूपेण स्थितस्य भोगदातृत्वम् । किन्तु एकदेशेन केनचिदंशेनेति यावत् प्रारब्धरूपेण तस्य भोगजनकत्वमित्यभ्युपगमनात् शास्त्रकारैः प्रार-

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

ब्धसम्बन्धीनि व्याख्येयानि स्थानानि प्रारब्धपरिचायकसूत्रीयव्याख्याने व्याख्यातान्येवातः संक्षेपेणैव सञ्चितमात्रम् परिचितमत्रेति वेदितव्यम् । ननु सञ्चितकर्म्मणः प्रारब्धजनकत्वे पौनःपुन्येन स्वांशेन सञ्चितम् प्रारब्धञ्जनयत् स्वयञ्चिरकालेन सर्व्वान्शव्ययवत् कथन्नक्षीयते। सति च क्षयाङ्गीकारे विनापि ज्ञानम् सञ्चितकर्म्मक्षयोपपत्तौ ततश्च मोक्षोपपत्तौ "ज्ञात्वा तम्मृत्युमत्येति नान्यः पन्थाविद्यते यनाय" इत्यादिश्रुतिर्व्याकुप्येत " ज्ञानादेवामृतत्वं नहि शशकवधूः सिंहपोतम्प्रसूते " इत्यादिस्मृतिश्च व्याहन्येत । तत्रोच्यते यद्यपि संचितम् स्वांशव्ययवच्चिरकालेन नाशभागित्वमर्हति तथापि क्रियमाणकर्म्मणा पौनःपुन्येन प्रपूर्य्यमाणम् यावत् स्वात्माधिगमम् निरत्ययमेवावतिष्ठति इतिवेदितव्यम् । यथा पर्ज्जन्यजनकत्वेन गभस्तिहस्तहस्ताकृष्यमाणोदकोप्युदधिः वृष्टिपूरितनदनदीपूरसम्प्लुतोदकः अचलप्रतिष्ठः अनत्ययरूपो दृश्यते इति वेदितव्यम् । श्रूयतेपि संचितकर्म्मणो ज्ञानविनाश्यत्वम् "तद्यथेषीकातूलमग्नौ प्रदूयेतैवम् हास्य सर्व्वे पाप्मानः प्रदूयन्ते" इत्यादि श्रुतिभिः यद्यपिभोगेन कर्म्मक्षयोभ्युपगम्यते परन्तु भोगः प्रारब्धमत्यन्तमपनयति निःशेषयतीत्यर्थः प्रारब्धरूपेण परिणतम् संचितम् अपनयन्नपि क्रियमाणप्रपूर्य्यमाणम् स्वरूपस्थितम् न क्षपयितुं शक्यम् सर्व्वांशेन किन्तु प्रारब्धरूपाशेनैव इति वेदितव्यम् । तथा व्यज्यतेपि "नाभुक्तं क्षीयते कर्म्म कल्पकोटिशतैरपि " अत्र आसमन्तात् प्रारब्धरूपेण भुक्तमपि कर्म्म संञ्चितमित्यर्थः । कल्पकोटिशतैरपि पौनः पुन्येन क्रियमाणप्रपूर्य्यमाणत्वात् ज्ञानमन्तरा न क्षीयते तदेव प्रारब्धरूपेण परिणतम् सुकृतदुःकृतरूपमिति यावत् । अवश्यभोक्तव्यम् भोगनाश्यमेव भवति न ज्ञानानलदाह्यमिति भावो व्यज्यते एतत्स्मृतिपूर्व्वार्धेन "अवश्यमेव भोक्तव्यंकृतङ्कर्म्मशुभाशुभम्" इत्यनेनेति वेदितव्यम् । यद्यप्यस्याः स्मृतेः उत्तरार्धः अपरांशवान् पूर्व्वम्व्याख्यातः अधुना तु विलक्षणाशयवान् । परन्तु शब्दस्य कामधेनुरूपत्वस्वीकारात् न काचिद्धानिर्वेदितव्या यक्षानुरूपोवलिरिति न्यायात् प्रक्रमानुसारिणा प्रमाणवलिताशयेन भवितव्यमित्यर्थः ॥

एवं सञ्चितस्वरूपम्प्रदर्श्यावशिष्टम् क्रियमाणङ्कर्म्म परिचाययति सूत्रकारः

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

विद्यमानशरीरसम्पादितमुभयविधम् क्रियमाणम् १।२।६।

विद्यमानशरीरेण वर्त्तमानदेहेन सम्पादितम निःपादितम् समर्ज्जितमिति भावः क्रियमाणम् कृधातुनिर्गतम् कर्म्मवाच्यम् यज्ञादिरूपम् हिंसादिरूपञ्च शानच् प्रत्ययस्य नीयमानप्रत्ययान्तस्वर्त्तमानकालिकम् सुकृतदुःकृतक्रियाविषयीभूतमाचर्य्यमाणम्वेदितव्यम्।अत्र अविद्यमानशरीरासम्पादितमिति योजनीयम्। उभयविधम् उभयविधौ द्वे विधे प्रकारौ यस्येति उभयविधम् प्रारब्धकर्म्मणोविद्यमानशरीरोपभोग्यत्वरूपः सञ्चितकर्म्मणो विद्यमानशरीरानुपभोग्यत्वरूपश्च प्रकारो यस्येति तथाभूतम्। विद्यमानशरीरोपभोग्यविद्यमानशरीरानुपभोग्यमित्यर्थः। सुकृतदुःकृतरूपे द्वे विधे प्रकारौ यस्येति वा तथाभूतम्। यद्वा ऐहिकफलप्रदमामुष्मिकफलप्रदञ्चेत्युभयविधम्। ननु एकस्यैव क्रियमाणस्य फलभोगसाधारणकारणस्य किन्निबन्धनमेतद्द्वैविध्यमिति प्रष्टव्ये प्रतिवचनम्। कामनाविशेषनिबन्धनम् अपूर्व्वोत्पत्तितारतम्यनिबन्धनञ्चेति वेदितव्यम्। तथाहि स्वर्गकामो यजेत। अत्र कामनायाः स्वर्गविषयत्वात् यज्ञरूपक्रियमाणस्य विद्यमानशरीरानुपभोग्यत्वमुपपन्नम्। पुत्रकामो यजेत। अत्र कामनायाः पुत्रविषयत्वात् पुत्रेष्टिरूपक्रियमाणस्य विद्यमानशरीरोपभोग्यत्वमुपपन्नमिति वेदितव्यम्। तथाहि एकस्य ऐहिकफलप्रदत्वम् अपरस्य आमुष्मिकफलप्रदत्वञ्चेति वेदितव्यम्। एवंकामनाविशेषनिबन्धनद्वैविध्यम्प्रतिपाद्य अपूर्व्वोत्पत्तितारतम्यनिबन्धनं द्वैविध्यम् प्रतिपाद्यते। "अत्युत्कटैः पापपुण्यैरिहैव फलमश्नुते। त्रिभिर्वर्षैस्त्रिभिर्मासैस्त्रिभिःपक्षैस्त्रिभिर्दिनैः" इतिस्मृतिः। अत्युत्कटपुण्यपापयोरिहैव अत्र विद्यमानशरीर एव। यद्वा अत्र मर्त्यलोक एव अत्यौत्कट्यतारतम्येन तावता तावता कर्म्मणा अत्युत्कटापूर्व्वोत्पत्तितारतम्येन चिरेण अचिरेण च कालेन फलप्राप्तिमवगमयति।तत उपपद्यते तादृशस्य क्रियमाणस्य विद्यमानशरीरोपभोग्यत्वम् ऐहिकफलप्रदत्वम् च अत्रैव च स्मृतौ इहैव शब्दः अविद्यमानशरीरलोकान्तरव्यावर्त्तकः अनीदृशयोरनत्युत्कटापूर्व्वोत्पत्तितारतम्येन कियता अनभिहितेन कालेन तत्र तत्र फलप्राप्तिं द्योतयतीति वेदितव्यम्। तत उपपद्यते तादृशस्य क्रियमाणस्य विद्यमानशरीरानुप-

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

भोग्यत्वम् आमुष्मिकफलप्रदत्वञ्चेतिवेदितव्यम्। "क्षिप्रं हि मानुषे लोके सिद्धिर्भवति कर्म्मजा" इतिभगवद्वाक्यमपि पोषयत्युक्तद्वैविध्यस्मृतिमितिवेदितव्यम्। प्रारब्धस्य अवश्यभोक्तव्यत्वस्वीकारानुसन्धानात् भवति विशयोऽत्रत्यः किंक्रियमाणमवश्यभोक्तव्यमुतानवश्यभोक्तव्यमाहोस्विदुभयविधमिति। तत्रोच्यते नाद्यः "धर्म्मेण पापमपनुदति" इत्याद्युक्तिवैयर्थ्यप्रसङ्गात्। न द्वितीयःशास्त्रसम्मतकृतहानिदोषप्रसङ्गात्। न तृतीयः एकाधिकरणक तदुभयरूपत्वासम्भवात्। परन्तु कल्पत्रयदोषो न युज्यते कर्म्ममात्रम् अवश्यभोक्तव्यमनवश्यभोक्तव्यस्वा भवितुमर्हति। यथा लोके प्रत्यक्षसिद्धङ्कृषिवाणिज्यादिरूपङ्कर्म्म शस्यनिष्पत्तिमूलवृद्धिसाफल्यात् अवश्यभोक्तव्यम् तत्तन्नैष्फल्यादनवश्यभोक्तव्यम्। तत्र "ब्रह्महत्यां योऽश्वमेधेन यजते" इत्यादिप्रायश्चित्तप्रतिपादनश्रवणात् भवितव्यम् कर्मणाक्रियमाणेनअनवश्यभोक्तव्यमितिवेदितव्यम्। अयमपरःक्रियमाणस्य अनवश्यभोक्तव्यप्रतिपादकव्यपदेशो भवति "यथापुष्करपलाश आपो न श्लिष्यन्ते एवमेवम्विदि पापङ्कर्म्म न श्लिष्यते" इतिश्रवणात् "कृष्ण कृष्णेति कृष्णेति यो मां स्मरति नित्यशः। जलम्भित्वा यथा पद्मं नरकादुद्धराम्यहम्" इतिस्मरणाच्च। अत्र नरकशब्देन नरकसाधनम् पापं लक्षणीयम् वेदितव्यम्। जीवनसाधनभूम्यादौ जीवशब्दप्रयोगवत्। भवत्यपि नाम्नाम्पापध्वंसनिमित्ताभिधायिनी श्रुतिः "नास्ति पातकमहो कलिकाले नामकीर्त्तनपरस्य" इति "अवशेनापि यन्नाम्नि कीर्त्तिते सर्व्वपातकैः। पुमान् विमुच्यते सद्यः सिंहत्रस्तैर्मृगैरिव" इत्यादिभिः पुराणे तावत् सहस्रशोनाम्नःपापरूपक्रियमाणेन्धनदहनसामर्थ्यमवगम्यते। अवशेनापीत्यादिस्मृतौ पुमान् शब्दप्रयोगेन नामकीर्त्तनेन वर्णाश्रमाद्यनियमउक्तइतिवेदितव्यम्भवति। इति न चैतानि नाममाहात्म्यबोधकानि वाक्यानि अर्थवादरूपाणि शङ्कनीयानि "विरोधे गुणवादः स्यादनुवादोऽवधारिते। भूतार्थवादस्तद्धानादर्थवादस्त्रिधा मतः" इतित्रिविधस्मृतार्थवादस्य "विधिना त्वेकवाक्यत्वात् स्तुत्यर्थेन विधीनां स्युः" इति मीमांसावाक्यात् विधिशेषत्यमवकल्पते। विधिस्थले "डुकृञ् करणे" भू "सत्तायाम्" "अस भुवि" इति त्रीनेव धातून् भावनासामान्यवाचिनः सर्व्वव्याप्त्यर्थमुदाहरति लिङाद्यर्थान् विधिधातूनामनेकत्वेपि उच्यते शास्त्रकारैः। "कुर्य्यात् क्रियते कर्त्तव्यम् भवेत् स्यादिति पञ्चमम्। एतत्स्यात्सर्व्ववेदेषु नियतम्विधिलक्षणम्" इति। अत्र तु एषां नाममाहात्म्यबोधकवाक्यानाम्

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

विधिशेषत्वाभावात् नार्थवादत्वं शङ्कनीयं स्यात्। न च विध्यश्रवणात् अन्यशेषता कल्पनीया यदाग्नेयोऽष्टाकपालो भवतीत्यादिवदप्राप्तार्थत्वेन विधिकल्पनोपपत्तेः। उच्यतेपि "विधिरत्यन्तमप्राप्तौ नियमः पाक्षिके सति। तत्र चान्यत्र च प्राप्तौ परिसंख्येति गीयते" अत्र आत्यन्तिकाप्राप्तिरेव विधित्वघटिकेति उपपद्यते। यथा "अहरहस्सन्ध्यामुपासीत" अत्र अत्यन्ताप्राप्तस्य सन्ध्योपासनस्य विधित्वम्भवति। प्रसङ्गप्राप्ते नियमपरिसंख्ये व्याख्यायेते। तथाहि नियमः पाक्षिके सति तथा व्रीहिभिर्यजेत अत्र व्रीहियजने व्रीहिरूपात् तण्डुलरूपनिःपादाय व्रीहीनवहन्ति इतिवाक्येन तण्डुलनिःपादनोलूखलमुशलाभ्यामेव व्रीह्यवहननेन तण्डुलनिःपत्तिः स्वीक्रियते। अत्र तण्डुलनिष्पादनस्य नखविदलनादिनापि पक्षान्तरेण सम्भाव्यमानत्वेपि तत्पक्षपरित्यागेन अवहननरूपपक्षस्यैव स्वीकारो नियमः अवहननिःपन्नतण्डुलस्यैव अपूर्व्वजनकत्वमित्यर्थो वेदितव्यः। अनेकपक्षसाध्यत्वात् तण्डुलरूपनिःपादनस्य पाक्षिकत्वम्वेदितव्यम्। "तत्र चान्यत्र च प्राप्तौ परिसंख्येति गीयते" यथा "इमामगृभ्णन्। रसनामृतस्य" इति वाक्यात् अश्वे गर्दभे च रसनादानम्प्राप्यते। तत्र अश्वाधानीमादत्ते इति वाक्यात्। अश्वरसनाग्रहणम्परिसंख्यायते गण्यते। अश्वरसनाग्रहणविधानेनैव गर्दभादिरसनाग्रहणं अपरिसंख्यायते अगण्यत इत्यर्थः। यद्यपि कोटिद्वयपातित्वसादृश्यात् नियमपरिसंख्याने अभिन्ने एकरूपे प्रतीयेते। तथापि नियमितान्यतरपक्षस्य न विधिर्वाक्ये प्राप्तिर्दृश्यते। किन्तु विध्यप्राप्तस्यापि तत्तत्कार्य्यजनकत्वसामर्थ्यात् प्राप्तिर्भवति। स च नियमेन निषिध्यते। परिसंख्यातान्यतरपक्षस्य सामान्यतो विधिवाक्यस्वीकृतत्वेपि विशेषविधिवाक्येन तयोर्वैषम्यम्वेदितव्यम्। वस्तुतः अयोगव्यवच्छेदो नियमः, अन्ययोगव्यवच्छेदः परिसंख्या वेदितव्या। एवम्प्रसंगप्राप्ते नियमपरिसंख्ये प्रतिपाद्य प्रकृतम् नामकीर्त्तनम्प्रतिपाद्यते। मन्त्रवाक्येषु "मर्त्ता अमर्त्तस्य ते भूरि नामा मनामहे विप्रासो जातवेदसः आ एवं जानन्तो नाम चिद्विवक्तनो" इत्यादिषु नाम्नः तपोदानादिसर्व्वधर्म्माधिक्येन पापापहत्वमवगम्यते। उपपादितञ्च मन्त्रार्थवादानामपि स्वार्थे प्रामाण्यम् देवताधिकरणे। तस्मात् सर्व्वथा नामकीर्त्तनेन दुःकृतरूपक्रियमाणस्य अनवश्यभोक्तव्यता प्रतिपादितेति वेदितव्यम्। ज्ञानस्य पुण्यपापरूपोभयविधक्रियमाणस्य दहनत्वम्प्रसिद्धम् "ज्ञानाग्निः सर्व्वकर्म्माणि भस्मसात्कुरुतेऽर्ज्जुन"

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

इति । अविशेषेण सर्व्वकर्म्मप्रणाशः स्मरणात् । प्रायश्चित्तस्य पापरूपस्यैव क्रियमाणस्य क्षपणत्वम्वेदितम् "धर्म्मेण पापमपनुदति" इत्यादिश्रवणात् । नामकीर्त्तनस्य तु पापापहत्वम् धर्म्मोत्पादकत्वम् चित्तसंशोधनानुकूलज्ञाननिःपादनपूर्व्वकं धर्म्मरूपस्यापि क्रियमाणस्य क्षपणत्वमिति वेदितव्यम् । "कृष्णेति मङ्गलं नाम यस्य वाचि प्रवर्त्तते भस्मीभवन्ति तस्याशु महापातककोटयः । गोकोटिदानं ग्रहणेषु काशी गङ्गाप्रयागायुतकल्पवासः । यज्ञायुतम्मेरुसुवर्णदानम् गोविन्दनाम्ना न कदापि तुल्यम् । तत्कर्मनिर्हारमभीप्सताम् हरेर्गुणानुवादः खलुः सत्वभावनः । भक्तिर्ज्ञानाय कल्पते" इत्यादिस्मरणात् ग्रन्थविस्तार भिया नामकीर्त्तनस्य भक्तिरूपत्वम् "श्रवणङ्कीर्त्तनम्विष्णोः" इत्यादिस्मरणात् सगुणब्रह्माधिगमकत्वम् "अक्षरं हि परब्रह्म गोविन्देत्यक्षर त्रयम् । तस्मादुच्चरितं येन ब्रह्मभूयाय कल्पते" इत्यादिस्मरणाच्च न प्रतिपादितम् । तच्च वैष्णववादीनाम् साम्प्रदायिकग्रन्थेष्वन्वेष्टव्यम् । क्रियमाणम्पंचविधम् नित्यनैमित्तिक प्रायश्चित्तकाम्यनिषिद्धभेदात् "अकुर्वन् विहितङ्कर्म्म" इत्यादिस्मरणप्रसिद्धं यदकरणेप्रत्यवायः इति लक्षणलक्षितम् अहरहः यावज्जीवम् नित्यम् सदा इत्यादिपदघटितम् नित्यम्वेदितव्यम् ।तत्रोदाहरणानि" "अहरहःसन्ध्यामुपासीत" "यावज्जीवमग्निहोत्रञ्जुहोति" "नित्यं च स्वाध्यायप्रवचने सदोपासीत नीचवत्" इत्यादीनि वेदितव्यानि।अकरणे प्रत्यवायजनकम् करणे पुण्यफल जनकम् "श्राद्धकृत्स विमुच्यते" इत्यादिस्मरणात् । पितृदेवादयो निमित्तम् प्रवृत्तिनिमित्तम् यस्य तन्नैमित्तिकम् । पितृदेवाद्युद्देशेन विधीयमानमितियावत् । श्राद्धबलिवैश्वदैवतपार्व्वणादीनि उदाहरणानि वेदितव्यानि । तच्च नैमित्तिकम् द्विविधम् स्वीक्रियते मीमांसकैः नित्यनैमित्तकम् काम्यनैमित्तकञ्चेति । नित्यनैमित्तकम् मृतश्राद्धम् नित्यश्राद्धं वार्षिकश्राद्धं नवोदकनवान्नादिश्राद्धं आपरपक्षीयपार्व्वणश्राद्धं पुत्रीविवाहपुत्रोपनयनादिसंस्कारकालिकमातृका पूजाभ्युदयिकश्राद्धञ्च काम्यनैमित्तिकम् तीर्थप्राप्तिहेतुकश्राद्धपुत्रविवाहकालिकमातृकापूजाभ्युदयिकश्राद्धादिकम् अकरणे प्रत्यवायजनकम् करणे फलजनकञ्चेति वेदितव्यम् । यद्यपि सामान्यतःकाम्यनैमित्तिकाकरणे प्रत्यवायो न श्रूयते तथापि "श्रुतिः स्मृतिः सदाचारः" इत्यादिरूपेण धर्म्मलक्षणस्मरणात् शिष्टपरिगृहीतत्वात् देवपितृनिमित्तत्वात् काम्यत्वेपि सदाचारविरोधनिन्दानुरोधा-

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

भ्याम् प्रत्यवायजनकत्वं स्वीक्रियते । पार्व्वणादीनां नैमित्तकत्वं न व्याहन्यते काम्यत्वं न प्रसज्यत इति वेदितव्यम् । प्रायश्चित्तम् दोषसंयोगेन विधीयमानं दषक्षपणार्थताघटितम् पापापनोदनमिति यावत् । अश्वमेधादिद्वादशाब्दादिकृच्छ्रचान्द्रायणादिगायत्रीजपादि मन्वाद्युक्तम् वेदितव्यम् । यद्वा भगवदाराधनमपि भागवतानां सम्मतम्प्रायश्चित्तम् वेदितव्यम् "न तथा ह्यघवान्राजन् पूयेत तप आदिभिः । यथा कृष्णार्पितप्राणस्तत्पूरुषनिषेवया । प्रायश्चित्तानि चीर्णानि नारायणपराङ्मुखम् । न निःपुनन्ति राजेन्द्र सुराकुम्भमिवापगाः" इत्यादिस्मरणात् । यद्यपि ज्ञानस्यापि पापनिवर्त्तकत्वमस्त्येव तथापि तस्य कर्म्मरूपत्वास्वीकारात् अविशेषेण पुण्यपापोभयापहत्वरूपवत्त्वात् पापमात्रक्षपणप्रायश्चित्तवैलक्षण्यात् नात्र स्वीकार इति वेदितव्यम् । काम्यम् कामादनपेतम् "स्वर्गकामो यजेत" इत्यादिवाक्यघटितम् इष्टापूर्त्तदानव्रततपस्तीर्थस्नानादिरूपम् इहामुत्र कामितकामप्रदम् अकरणे अप्रत्यवायजनकम् वेदितव्यम् । काम्यत्वेपि पार्थिव शिवलिङ्गपूजनादौ एकादशीव्रतादौ "शिरसो वापि कर्त्तनम् अन्नमाश्रित्य तिष्ठन्ति पापानि हरिवासरे" इत्यादिस्मृत्या तत्तदकरणाननुमतिसत्त्वात् व्यज्यते नित्यत्वविशिष्टकाम्यत्वमितिवेदितव्यम् । निषिद्धम् करणे प्रत्यवाय जनकम् "ब्राह्मणो सुरां न पिवेत् ब्राह्मणो मांसं न भुञ्जीत माहिंस्यात्सर्व्वाभूतानि" इत्यादिवाक्यघटितम् महापातकोपपातकाद्यभक्ष्यभक्षणागम्यागमनादिरूपम् नरकयातनागर्भादिवेदनाराजदण्डनादिप्रदम्वेदितव्यम् । केचित्तु प्रायश्चित्तकाम्यकर्म्मणी पापापनोदकामविनोदप्रवृत्तिनिमित्तत्वात् नैमित्तिककर्म्मणि अन्तर्भावयन्ति । निषिद्धञ्च तदकरणरूपविधानस्य विहितस्य नित्यम्विधीयमानत्वात् "न वदेज्जामिनीम्भाषाम्प्राणैः कण्ठगतैरपि" इत्यादिस्मृतेः नित्ये कर्म्मण्यन्तर्भावयन्ति । तत्र नित्यादिरूपविहितङ्कर्म्म सामान्यविशेषभेदाद्द्विविधम्वेदितव्यम् । सामान्यम् "सत्यं दया तपः शौचन्तितिक्षेच्छा शमो दमः । अहिंसा ब्रह्मचर्य्यञ्च त्यागः स्वाध्याय आर्ज्जवम् । सन्तोषः समदृक् सेवा ग्राम्येहोपरमः शनैः । नृणाम्विपर्य्ययेहेक्षा मौनमात्मविमर्शनम् । अन्नाद्यादेः सम्विभागो भूतेभ्यश्च यथार्हतः । तेष्वात्मदेवताबुद्धिः सुतरान्नृषु पाण्डव । श्रवणङ्कीर्त्तनञ्चास्य स्मरणम्महताङ्गतेः । सेवेज्यावनतिर्दास्यं सख्यमात्मसमर्पणम् । नृणामयम्परोधर्म्मः सर्व्वेषां समुदाहृतः । त्रिंशल्लक्षणवान् राजन् सर्व्वात्मा येन तुष्यति" इति-

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

स्मृतिप्रसिद्धम् । अत्र स्मृतौ ब्रह्मचर्य्यस्वाध्याययोः सर्व्ववर्णाश्रमसाधारणत्वम् कथन्न विरुद्धम् इति प्रश्ने प्रतिवचनम् "कर्म्मणामनसा वाचा सर्व्वावस्थासु सर्व्वदा। सर्व्वत्र मैथुनत्यागोब्रह्मचर्य्यन्तदुच्यते" इति स्मृतिस्मृतम् ब्रह्मचर्य्यम् त्रैवर्णिकानुष्ठेयवेदाध्ययनादिव्रतातिरिक्तम् न विरुद्धम् इतिवेद्यम् । ननु "ऋतौ भार्य्यामुपेयात्" इतिश्रवणात् कथन्न धर्म्मपत्नीस्वीकरणानुकूलगार्हस्थ्याश्रमविरुद्धमिति प्रश्ने प्रतिवचनम् "लोके व्यवायामिषमद्यसेवा नित्यास्तु जन्तोर्नहि तत्र चोदना। व्यवस्थितिस्तेषु विवाहयज्ञसुराग्रहैरासु निवृत्तिरिष्टा" इति स्मरणात् ऋतौ भार्य्यागमनम् रागत एव नित्यम्प्राप्तम् न च अपूर्वविधिप्राप्तमिति वेदितव्यम्। तथाहि व्याख्यायते उक्तस्मृतिः। ननु व्यवायादीनामपि "ऋतौ भार्य्यामुपेयात्" "हुतशेषम्भक्षयेत्" इत्यादिना विहितत्वात् सामान्यतस्तन्निषेधो न युक्तस्तत्रोच्यते 'लोक' इति। व्यवायः मैथुनम्। आमिषम्मांसादि। मद्यं सुरा। नित्या रागत एव नित्यम्प्राप्ता। तु अव्ययम् अपूर्व्वविधिप्राप्तनित्यत्वव्यावर्त्तकम्। जन्तोः सर्व्वसाधारणप्राणिनः। अतस्तत्र व्यवायामिषमद्यसेवासु चोदना विधिर्नास्ति ननु "ऋतौ भार्यामुपेयात्" इत्यादिना विधिर्दर्शितः इति सत्यम्। परन्तु न त्वयमपूर्व्वविधिः रागतः प्राप्तत्वात्। किन्तु नियमविधिरूपेण रागिणामनुज्ञामात्रङ्कुरुते। विरागिणान्तद् करणर्ञ्चवर्य्यते। तदुच्यते व्यवस्थितिरिति। तेषु व्यवायादिषु कैर्विवाहयज्ञसुराग्रहैः रागे सति विवाहविषय एव व्यवायः कार्य्यः। यज्ञ एवामिषसेवनम्। "सौत्रामण्यां सुराग्रहान् गृह्णन्ति" इति श्रुतेः। तत्रैव मद्यसेवनमितिनियमः। अन्यत्र तत्तदनभ्युपगमनमिति। ननु च नियमपक्षेप्यावश्यकत्वात् न निषेधो युक्त इत्यत्रोच्यते आसु निवृत्तिरिति। आसु व्यवायामिषमद्यसेवासु निवृत्तिरिष्टा, सति वैराग्ये इति योजनीयम्। अत्रायम्भावः नायं नियमविधिरपि वस्तुतोनियमविधिः तासाम्व्यवायामिषमद्यसेवानाम् रागतो नित्यप्राप्तत्वात् अतस्तासां निवृत्तिः। वस्तुतः परिसंख्यैवेति वेदितव्यम्। कथन्तर्हि व्यवस्थितिरित्युक्तम् तदुच्यते न तावत् परिसंख्याविधिना श्रुतिर्निवृत्तिम्वक्ति। तथा सति स्वार्थत्यागः परार्थकल्पनाप्राप्तबाधश्चेति दोषत्रयं स्यात्। अतः क्वचित् प्राप्स्यतोप्यर्थस्य प्रापणमनर्थकमित्यपूर्व्वविधिद्वारा अन्यनिवृत्तिः फलतो भवति। तद्यथा "इमामगृभ्णन् रसनामृतस्येति अश्वाभिधानीमादत्ते" इत्यत्र रसनालिङ्गितो गर्दभाश्वाभिधानीर-

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

सनाद्वये प्राप्स्यतो मन्त्रस्य अपूर्व्वविधिद्वारा परिसंख्योच्यते। यथोक्तम् तन्त्रवार्त्तिके "अप्राप्तविधिरेवायमतोमन्त्रस्य निश्चितः। परिसंख्या फलेनोक्ता न विशेषः पुनः श्रुतेः" इति क्वचित्तु रागतो नित्यप्राप्तस्य अप्राप्तांशपूरणलक्षणस्य नियमफलस्यापि अभावान्नियमविधिना फलतः परिसंख्या भवति। यथा "पञ्च पञ्चनखा भक्ष्याः" इति तथा रागतो नित्यवत्प्राप्तस्य व्यवाया-देर्विवाहादिनियमेनाभ्यनुज्ञाद्वारा परिसंख्यैवेति। ननु यद्यनुज्ञामात्र-मेतद्भवेत्तर्हि "ऋतुस्नातान्तु यो भार्य्यां सन्निधिन्नोपगच्छति। घोरायाम्भ्रूणहत्यायाम्पच्यते नात्र संशयः" इत्यादिदोषस्मरणं न स्यात्। नैष दोषः मनसि कामे सत्यपि तस्यामरुच्या द्वेषादिना वा तामनुपगच्छतो दोषः तत्स्मरणोपपत्तिरिति सर्व्वमनवद्यस्व्या-ख्यानम्वेदितव्यम्। स्वाध्यायश्च वेदाध्ययनरूपः त्रैवर्णिकस्यैव विधेयः कथन्तदितरवर्णविधेयः स्यादिति पष्टव्ये प्रतिवचनम्। इतरवर्णस्य तु वेदाध्ययनातिरिक्तपुराणाद्यध्ययनरूपः स्वाध्यायो विधेय इति। "ब्राह्मणक्षत्रियविशां स्त्रीशूद्राणाञ्च पावनम्" इति स्मरणात्। इतरवर्णस्य योगाधिकारदर्शनात्। "स्वाध्यायाद्योगमासीत योगात् स्वाध्यायमामनेत्। स्वाध्याययोगसम्पत्त्या परमात्मा प्रकाशते" इति स्मृतेः स्वाध्यायस्य योगाङ्गत्वस्वीकारात् इति वर्णाश्रमभेदात् विविधकर्म्मविशेषपदघटितम्वेदितव्यम्। "ब्राह्मणोस्य मुखमासीद् बाहू राजन्यःकृतः। उरूतदस्य यद्वैश्यः पद्भ्याँ शूद्रोऽजायत" इति श्रवणात् "विप्रक्षत्रियविट्शूद्रा मुखबाहूरुपादजाः" इति स्मरणाच्च ब्राह्मणक्षत्रियवैश्यशूद्रभेदाच्चातुर्वर्ण्यम्वेदितव्यम्। तत्र जन्म-भूम्यनुसार्य्युत्कृष्टत्वापकृष्टत्वे वेदितव्ये। तत्र "संस्काराद् द्विज उच्यते" इति स्मरणात् ब्राह्मणक्षत्रियवैश्या द्विजा उच्यन्ते "इज्याध्ययनदा-नानि विहितानि द्विजन्मनाम्। जन्मकर्म्मावदातानाङ् क्रियाश्चाश्रम-चोदिताः" इति स्मरणात् द्विजत्वविशिष्टत्रैवर्णिकस्य ब्राह्मणक्षत्रिय-वैश्यरूपस्य यजनमध्ययनं दानञ्च सामान्येन विहितम्वेदितव्यम्। "विप्रस्याध्ययनादीनि षडन्यस्याप्रतिग्रहः" इत्यादिस्मरणात् याजनम-ध्यापनम्प्रतिग्रहश्च ब्राह्मणस्यैवविधीयते; नान्ययोरिति वेदितव्यम्। ततःयजनमारभ्य प्रतिग्रहपर्य्यन्तम् षट्कर्म्माणि ब्राह्मणस्येति वेदितव्यम्। तत्र "षण्णान्तु कर्मणामस्य त्रीणि कर्म्माणि जीविका। याजना-ध्यापनेचैव विशुद्धाच्च प्रतिग्रहः" इतिस्मरणात् याजनाध्या

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

पनप्रतिग्रहरूपत्रीणि कर्म्माणि ब्राह्मणस्य वृत्तिकारूपाणि वेदितव्यानि। "अन्यस्याप्रतिग्रहः" इतिस्मरणात् । क्षत्रियवैश्ययोः परिग्रहोपलक्षितयाजनाध्यापनेऽपि निषिद्धे इतिवेदितव्यम्।यद्वा याजनाध्यापने आपत्सु तयोर्विधीयते परिग्रहस्तु तत्राप्यविधेय इतिवेद्यम् । "प्रतिग्रहम्मन्यमानस्तपस्तेजोयशोनुदन् । अन्याभ्यामेव जीवेत शिलैर्वा दोषदृक्तयोः" इतिस्मृतेः । प्राजापालनेधिकृतस्य क्षत्रियस्य वृत्यन्तरं स्मर्य्यते "राज्ञो वृत्तिः प्रजागोप्तुरविप्राद्वा करादिभिः" इति। अत्र आदिशब्देन दण्डशुल्कादि ज्ञातव्यम् । वैश्यशूद्रयोर्वृत्ती स्मर्य्येते । "वैश्यस्तु वार्त्ता वृत्तिश्च नित्यम् ब्रह्मकुलानुगः । शूद्रस्य द्विजशुश्रूषा वृत्तिश्च स्वामिनो भवेत्" इति । अत्र वार्त्ताशब्दः कृषिगोरक्षणम् वाणिज्यम् लक्षयतीति वेदितव्यम् । ब्राह्मणस्य मुख्यानुकल्पभेदेन वृत्त्यन्तराण्युच्यन्ते कृष्यादिरूपा अयाचितरूपा प्रत्यहं धान्ययाञ्चारूपा शालिक्षेत्रस्वामित्यक्तकणिशोपादनरूपशिलरूपा आपणादिपतितकणोपादनरूपोञ्छनरूपा इति। तत्र शिलोञ्छनयोरेकीकृतत्वात् शिलोञ्छनरूपा एवं वृत्तिचतुष्टम् वेदितव्यम्। आसु वृत्तिषु उत्तरोत्तरा उत्तमा वेदितव्या। यथा स्मर्य्यते "वार्त्ता विचित्रा शालीनयायावरशिलोञ्छनम् । विप्रवृत्तिश्चतुर्धेयम् श्रेयसी चोत्तरोत्तरा" आसामेव वृत्तीनाम् नामान्तराणि स्मर्य्यन्ते "ऋतमुञ्छशिलम्प्रोक्तममृतं स्यादयाचितम्। मृतन्तु नित्ययाच्ञा स्यात् प्रमृतं कर्षणं स्मृतम् । सत्यानृतन्तु वाणिज्यम् श्ववृत्तिर्नीचसेवनम्" इति चतुर्विधा विप्रवृत्तिरेषामप्यापदि अनुज्ञाप्यते। श्ववृत्तिश्च निषिद्ध्यते "ऋतामृताभ्यांजीवेत मृतेन प्रमृतेन वा । सत्यानृताभ्याञ्जीवेत न श्ववृत्तास्याकदाचन" इत्यादिस्मृत्या नीचस्य अनापदि उत्तमवृत्तिर्न स्वीकर्त्तव्या "जघन्योनोत्तमां वृत्तिमनापदि भजेन्नरः" इतिस्मृतेः। अतः आपदि स्वीकर्त्तव्येति व्यक्तम्। अपि च उत्तमस्य आपदि नीचवृत्तिः स्वीकर्त्तव्या "सीदन् विप्रो वणिक्वृत्यापण्यैरेवापदन्तरेत् । खड्गेन वापदाक्रान्तो न श्ववृत्त्याकथञ्चन । वैश्यवृत्या तु राजन्यो जीवेन्मृगययापदि । चरेद्वा विप्ररूपेण न श्ववृत्या कथञ्चन । शूद्रवृत्तिम्भजेद्वैश्यः शूद्रः कारुकटक्रियाम्" इतिस्मृतेः। यद्यपि गौतमोऽनन्तराम्पापीयसीम्वृत्तिमातिष्ठेदित्युवाच खड्गधारणम् पण्यविक्रयाच्छ्रेष्ठम्मन्यते तथापि हिंसारूपत्वात् खड्गधारणस्य तस्माद्वणिक्वृत्तिरेव श्रेष्ठेति तात्पर्य्यवती सीदन्नित्यादिस्मृतिः प्रथमं वणिक्वृत्तिमुवाच । ततः पण्यम् अनयोरसम्भवे अनन्तरामपि खड्गधारणवृत्ति-

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

म्पश्चादुवाचेति वेद्यम्। अत्र पण्यशब्दोपादानात् पण्यविक्रयार्हन्द्रव्यम् स्वीकृत्य अपण्यम्विक्रयानर्हं सुरालवणादिनिषेधयतीति वेदितव्यम्। आपदुत्तीर्णस्तु नीचवृत्तिन्नाचरेत् "नानुकल्पेन वर्त्तेत कृच्छ्रान्मुक्तः" "नगर्हेण वृत्तिं लिप्सेत कर्म्मणा" इत्यादिस्मृतेः। गार्हस्थ्यब्रह्मचर्य्य वाणप्रस्थ्यसन्यासभेदादाश्रमचतुष्टयम्वेदितव्यम् "त्रय एते पुण्यलोकभाजः एकोऽमृतत्वभाक्" इत्यादिश्रुतेः "गृहाश्रमोजघनतो ब्रह्मचर्य्यं हृदोमम वक्षः स्थानाद्वनेवासो न्यासःशीर्षणि संस्थितः" इत्यादिस्मृतेश्च। अत्रापि जन्मभूम्यनुसारिणी उत्कृष्टापकृष्टत्वे वेदितव्ये। तत्र गुरुशुश्रूषणाद्यनुकूलम् अष्टाङ्गमैथुनादिभोगराहित्यम्। वेदव्रतचारित्वम् ब्रह्मचर्य्यम्। तच्च नैष्ठिकोपकुर्व्वाणभेदेन द्विविधम्। यावज्जीवम्नैष्ठिकम्। यावदध्ययनम् गृहाश्रमावासितम् उपकुर्व्वाणम्। व्रताचारिणः ऋतौभार्य्यागमिनः गृहस्थस्यापि ब्रह्मचर्य्यं स्वीकृतम् "गृहस्थस्याप्यृतौ गन्तुः" इत्यादिस्मृतेः। ततः गार्हस्थ्यब्रह्मचर्य्यमपि तृतीयकल्पप्रविष्टम् मन्तव्यम्। धर्म्मपत्नीस्वीकरणम् पञ्चयज्ञसमाचरणं वंशरक्षणम् गार्हस्थ्यम्। वनगमनानुकूलम् वनवासित्वम् श्रद्धातपश्चरणम् वन्यवृत्ति वाणप्रस्थ्यम्। "येचेमेरण्येश्रद्धातप इत्युपासते" इतिश्रुतेः। दृढवैराग्यसम्पन्नः सर्व्वकर्म्मोपरमः मोक्षभूमिः भिक्षावृत्तिः सन्यासः। अथ परिव्राट् विवर्णवासा मुण्डोऽपरिग्रहः शुचिरद्रोही भैक्ष्याणो ब्रह्मभूयाय भवति। स च विद्वद्विविदिषाभेदेन द्विविधः। ब्रह्मज्ञानसम्पन्नः विद्वत्पदवाच्यः। ब्रह्मजिज्ञासासम्पन्नः विविदिषापदवाच्यो वेदितव्यः। क्रमाद्ब्रह्मचर्य्याद्याश्रमचतुष्टये चातुर्विध्यं स्मर्य्यते "सावित्रं प्राजापत्यञ्च ब्राह्मञ्चाथ बृहत्तथा" इतिस्मरणाच्चतुर्विधम् ब्रह्मचर्य्यम्वेद्यम्। तत्र सावित्रम् ब्रह्मचर्य्यमुपनयनादारभ्य गायत्रीमधीयानस्य त्रिरात्रम्। प्राजापात्यम्। व्रतान्याचरतः साम्वत्सरम्। ब्राह्मम्वेदग्रहणान्तम्। बृहन्नैष्ठिकम् "वार्त्तासञ्चयशालीनशिलोञ्छ इति वैगृहे" इतिस्मरणात् गार्हस्थ्यम् चतुर्विधम्वेद्यम्। तत्र वार्त्ता अनिषिद्धकृष्यादिवृत्तिः। सञ्चयो याजनादिवृत्तिः। शालीनमयाचितवृत्तिः। शिलोञ्छः पतितकणिशकणवृत्तिः। एकवचनमार्षम्। यद्वा द्वन्द्वैक्ये सप्तमी। एवम्वृत्तिभेदे सति गृहे स्थिता भवन्ति "वैखानसा वालखिल्योदुम्बराफेनपा वने" इतिस्मृतेः वाणप्रस्थञ्चतुर्विधम्। तत्र वैखानसाः अकृष्टपच्यवृत्तयः। बालखिल्याः नवेन्ने लब्धे पूर्व्वसञ्चितान्नत्यागिनः। औदुम्बराः प्रातरुत्थाय यां दिशम्प्रथमम्पश्यन्ति

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

तत आहृतैः फलादिभिर्जीवन्तः । फेनपाः स्वयम्पतितैः फलादिभिर्जीवन्तः "न्यासे कुटीचकः पूर्व्वम् वह्वोदो हंसनिःक्रियौ" इतिस्मृतेः सन्यासश्चतुर्विधो वेद्यः । कुटीचकः स्वाश्रमकर्म्म प्रधानः । वह्वोदः कर्म्मोपसर्ज्जनीकृत्यज्ञानप्रधानः । हंसो ज्ञानाभ्यासनिष्ठः । निःक्रियः परमहंसः प्राप्ततत्व इतिभावः । एते च सर्व्वे चतुराश्रमिणः यथोत्तरम् श्रेष्ठा वेदितव्याः । "भिक्षोर्धर्म्मः शमो हिंसा तप ईक्षावनौकसाम् । गृहिणो भूतरक्षेज्या द्विजस्याचार्य्यसेवनम्" इतिस्मृतेः । क्रमेण संक्षेपात् शमादिरूपाः संन्यासादिचतुराश्रमिणाम् धर्म्मा वेदितव्याः । तत्र ऋणत्रयापकरणादिरूपाधिकारादसति वैराग्यदार्ढ्ये क्रमादाश्रमस्वीकारः । सति तु तद्दार्ढ्ये अक्रमेणे वेति वेदितव्यम् । तथा च श्रूयते "ब्रह्मचर्य्यं समाप्यगृहीभवेत् गृही भूत्वा वनी भवेत् वनी भूत्वा प्रव्रजेत् यदि वेतरथा ब्रह्मचर्य्यादेव प्रव्रजेत् यदि वेतरथा ब्रह्मचर्य्या देव प्रव्रजेत् गृहाद्वा वनाद्वा" इति वैराग्यदार्ढ्ये न क्रमाधिकारः किन्तुसद्योधिकार एवेति वेदितव्यम् । तथा च श्रुतिः "यदहरेव विरजास्तदहरेव प्रव्रजेत्" इति । न चेयम् गृहीभूत्वेत्युपक्रम्य वनाद्वेत्युपसंहृता अविशेषश्रुतिः अनधिकृतानुरक्तविषया वक्तुं शक्या अविशेषश्रवणात् पृथग्विधानाच्चानधिकृतानाम् । तथा च श्रूयते "अथ पुनरेव व्रती वाऽव्रती वा स्नातको वाऽस्नातको वोत्सन्नाग्निरनग्निको वा" इति । अत्र श्रुतौ व्रती गोदानादिवेदव्रतवान् । अव्रती तद्विपरीतः । स्नातको गुरुकुलनिवृतिरूपस्नानकृत् । स्नानान्तरकृदपि । गुरुशुश्रूषापरः अस्नातकःतद्विपरीतः । उत्सन्नाग्निर्मृतभार्य्यः । पूर्व्वमेवाग्निपरिग्रहरहितोऽनग्निः तद्विपरीतः परिव्रजेदिति क्रमाधिकारप्रतिपत्तिहीनानामपि सन्न्यासस्य पृथगुक्तेः न वाक्यमनधिकृतविषयमित्यर्थः । क्रमाधिकाररहित्येपि विरक्तिः सन्न्यासाकारम् प्रापयति । ततः नानुरक्तानान्तत्राधिकार इत्यवधेयम् ब्रह्मज्ञानपरिपाकाङ्गत्वाच्च पारिव्राज्यकस्य नानधिकृतविषयत्वम् । श्रवणादिद्वारासन्न्यासस्य ब्रह्मज्ञानदार्ढ्यार्थत्वम् प्रकरणादिसिद्धम् तेन समर्थस्यैवाधिकारस्तस्मिन्नित्यर्थो वेदितव्यः । ग्रन्थविस्तारभिया नातः परमधिकमाश्रमप्रकरणव्याख्यातुमुत्सहे । अतएतावतैवाधिकारिणोहापोहसमर्थनेन प्रकरणार्थो वेदितव्यः । एतावता क्रियमाणम् सामान्यविशेषभदात् द्विविधम्प्रतिपादितम्व्याख्यातञ्च यथाशास्त्रं यथाक्रमम् । क्रियमाणस्यैव शरीरकर्त्तव्याकर्त्तव्यताविषयरूपत्वात् सुखं-

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

दुःखसाधनत्वात् विधिनिषेधभूमित्वाच्च यथामतिश्रीमद्गुरुवरसूत्रकारस्वरसानुसारम् प्रतिपादितमिति वेदितव्यम्। १। २। ६।

इति परमपूज्यपादश्रीमद्योगदत्तशर्म्मकृतामृतोपदेशे पूज्यपादश्रीमद्योगदत्तशर्म्मशिष्यश्रीमत्सत्यनारायणशर्म्मकृतभाष्ये प्रथमाध्यायस्य द्वितीयः पादः समाप्तः॥

एवं सूत्रकारः शरीरकर्म्मणी परिचाय्य प्रथमाध्यायस्य तृतीयपादमारभते। तत्र प्रथमाध्यायस्थप्रथमपादस्यद्वितीयसूत्रस्थसंसृतिशब्दमनुसन्दधानः तत्सम्बन्धिनम् जीवम्परिचाययति–

जीवः संसारी १।३।१

जीवः "जीवप्राणधारणे" इति धातोरर्थानुगमात् प्राणधारी अविद्याप्रतिविम्बितश्चित्प्रतिबिम्बः अनादिवासनावासितः आवृतस्वरूपः तत्त्वमसिवाक्यगतत्वम्पदार्थः देहमभिमन्यमानः देहीति यावत्। संसारीशब्दः इन्प्रत्ययान्तः संसारोऽस्यास्तीति संसारी पूर्व्वम् संसृतिस्वरूपप्रदर्शनावसरे जीवस्वरूपमपि प्रतिपादितमतः पिष्टपेषणवत् तत्प्रतिपादनमनपेक्षितमिति वेदितव्यम्। आवृतस्वरूपो जीवोऽभिधीयते। तदावरणप्रकारः प्रदर्श्यते। आत्मनः अखण्डत्वम् सच्चिदानन्दत्वम् स्वरूपम्प्रसिद्धम्। तत्र सत्तांशस्तु कल्पितेन जगत्पदार्थेनाविद्धो जगद्व्याप्नोतीतिभावः। कल्पितेन तुल्यरूपा सती स्फुरति यथा शुक्तीदन्ताशुक्तिगतेदमंशः रजतेन व्याप्ता रजतरूपा सती इदं रजतमिति स्फुरति चित्त्वमानन्दत्वञ्च अविद्यावृतत्वात् न भातः। यथा अज्ञानावृतत्वात् शुक्तित्वम् त्रिकोणत्वादिकम् न भाति। तत्र स्मर्य्यते "शुक्तीदन्तेव सत्ता स्फुरति समरसा कल्पितेनानुविद्धा। शुक्तित्वादीव माया वरणपरिभवाच्चित्सुखत्वेन भातः" इति। ननु आत्मनः सत्यत्वे किम्प्रमाणमिति प्रष्टव्ये प्रतिवचनम् "सत्यं ज्ञानमनन्तम्ब्रह्म" इति शब्दः सूक्ष्मत्वात् कारणत्ववत् सूक्ष्मत्वस्य तत्रैव विश्रान्तेः। पुनश्च यथा नभः मिथ्यानीलत्वाधारत्वात् सत्यम् तथायमपि जगद्भानाधिष्ठानत्वात्। पुनः परस्परव्यावृत्तसर्व्वेषु तदव्यावृतत्वात्। पुनः परस्पराश्रितसर्व्वेषु तस्य अनाश्रितत्वात् आधेयताराहित्यात्। पुनः सर्व्ववस्तुबोधतया पुनः अनवस्थाभिया यत्सर्व्वाविधिस्तदेवात्मेति तत्वात् निःसङ्गत्वाविरोधात्। पुनः सर्व्वगतत्वात्

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

नानित्यं सर्व्वगतम्भवतीति । पुनः कालादेः आत्मत्वात् साक्षित्वाच्च ब्रह्मान्यद्रष्टृनिषेधात् द्रष्टुरभावे जगदान्ध्यप्रसङ्गात् तत्वविदनुभवाच्च तस्य सत्यत्वम् सर्व्वथासिद्धमित्यर्थो वेदितव्यः । ननु आत्मनः चित्त्वे किम्प्रमाणमिति प्रष्टव्ये प्रतिवचनम् "चैतन्यमात्मनो रुपम्" इति शब्दः । क्वचित्स्त्रष्टव्यरुपकामविषयकजननसङ्कल्परूपध्यानोपदेशात् ईक्षितृत्वरूपत्वात् "तदैक्षतवहुस्याम्" इत्यादिश्रुतेः सर्व्वस्य स्वाधीनीकरणशीलत्वात् "एतस्यैवाक्षरस्य शासने" इत्यादिश्रुतेः चन्द्रसूर्य्यप्रधानकानामग्न्यादीनाम्प्रकाशनस्वभावकप्रकाशरुपत्वकथनात् । पुनः अन्यानपेक्षप्रत्यक्षरूपत्वात् सर्व्वत्राहमित्यनुभूतिप्रसिद्धेः । पुनः पापपुण्ययोः प्रेरकत्वस्य साक्षाद्द्रष्टृत्वस्य चोक्तेः "एष ह्येव साधुकर्म्म कारयति" इत्यादिश्रुतेः आत्मनि सर्व्वज्ञादिशब्दप्रसिद्धेश्च तस्य चिद्रूपत्वम् सर्व्वथासिद्धमिति वेदितव्यम् । नन्वात्मनः आनन्दत्वे किम्प्रमाणमिति प्रष्टव्ये प्रतिवचनम् "एतस्यैवानन्दभूतस्य सर्व्वाणि भूतानि मात्रामुपजीवन्ति" इति शब्दः । "स एष ब्रह्मलोके" इति सौषुप्तप्रकृतानन्दब्रह्मभावोक्तिश्रुतिश्च । मुक्तैः प्राप्यत्ववादात् न ह्यनानन्दत्वे मुमुक्षा स्यात् निरतिशयानन्दरूपत्वात् अल्पसुखत्वस्य निषेधादितिभावः । परमप्रेमास्पदत्वात् "मा नभूवं हि भूयासम्" इत्यादिश्रुतेः निधिनिलयवधूसाम्यवादात् सुषुप्तोत्थितस्य सौषुप्तसुखस्मरणात् "सुखमहमस्वाप्सम्" इत्यादिश्रुतेः । समाधौ तदनुभवाच्च "आनन्दम्ब्रह्मणो विद्वान् न विभेति कुतश्चन" इत्यादिश्रवणाच्च आनन्दरूपत्वम् श्रुतिस्मृतियुक्तिसिद्धमिति वेदितव्यम् । ननु अखण्डत्वे किम्प्रमाणम् " निष्कलं निष्क्रियं शान्तम् यो वै भूमा " इत्यादिश्रुतिः "अखण्डं सच्चिदानन्दरूपत्वम् ब्रह्मणि प्रसिद्धम् । तत्कथमत्र जीवस्वरूपत्वेनाभिधीयत इतिप्रष्टव्ये प्रतिवचनम् । तत्त्वमस्यादिवाक्यैर्जीवस्य ब्रह्मरूपत्वमुपपन्नमितिवेदितव्यम् । ननु तत्त्वमस्यादिवाक्यैः ब्रह्मजीवयोः सामानाधिकरण्यम् ऐक्यमितिभावः किम्विधम् तस्य वाधाध्यासविशेषणैक्यविषयरूपचातुर्विध्योपलब्धेः तत्रवाधा नाममिथ्याज्ञानस्य तात्त्विकज्ञानेन निवृत्तिः । यथा अन्धकारेण स्थाणौ पुरुषोयमिति मिथ्याज्ञानस्य पुरुषोयं स्थाणुरिति निश्चितज्ञानेन निवृत्तिः एतदेव बाधविषयम् स्थाणुपुरुषयोःसामानाधिकरण्यम् । शुक्ताविदम् रजतमिति अध्यासविषयकम् द्वितीयम् ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

दण्डीपुरुष इत्यादिविशेषणविषयम् तृतीयम्। प्रकृष्टप्रकाशश्चन्द्रः सोयन्देवदत्त इत्याद्यैकविषयञ्चतुर्थम्। सामानाधिकारण्यम् वेदितव्यम्। इह आद्यम् वाधविषयम् न सम्भवति यतः मोक्षोपायोद्यमा श्रुतिः। ब्रह्मणोबाधे मोक्षस्यैव वाधात् जीववाधे मुमुक्षुभावेनापि मोक्ष बाधात् निरर्थकोद्यमा स्यात्। न पुनः द्वितीयम् अध्यासविषयम् सम्भवति मनोब्रह्मेत्युपासीतवत् ब्रह्मत्वध्यानादिविधेरश्रवणात् सत्यपि क्वचिच्छवणे अनित्यफलतादोषापत्तेर्न सम्भवति। ध्यानञ्च मानसीक्रिया सा चानित्यफलकेति। पुनः तृतीयम् विशेषणविषयम् न सम्भवति। तयोस्तत्त्वम्पदार्थयोर्विरुद्धयोर्विशेष्यविशेषणभावायोगात्। अतः परिशेषात् एकवस्तुविषयकसामानाधिकरण्यपक्षस्यात्र स्थितिरूपपन्नेतिवेदितव्यम्। ननु तत्त्वम्पदयोर्वाच्योऽर्थः ऐक्यरूपः असङ्गतः तत्त्वम्पदार्थयोः परोक्षापरोक्षादिरूपविरुद्धधर्म्मयुजोरैक्यायोगात्। तत्रोच्यते भवति सङ्गतिरैक्यस्य लक्षणाया अत्र यष्टिपदस्य यष्टिधर इव जहत्स्वार्थलक्षणा न सम्भवति। ब्रह्मजीवयोः यष्टियष्टिधरयोरिव परस्परार्थयुक्तत्वायोगात्। तथाहि जगत्कारणत्वरूपतत्पदार्थविशिष्टे जीवे जगत्कारणत्ववाँस्त्वमिति वाक्यार्थः स्यात्। एवं त्वम्पदार्थविशिष्टतत्पदार्थब्रह्मण्यपि वेदितव्यम्। न चैवं सम्भवति एतादृशोपदेशस्य मोक्षे उपयोगायोगात्। तत्र तत्र श्रुतौ उपक्रमसङ्गत्यादेश्चायोगात्। नच गङ्गायाङ्घोष इतिवाक्येन अन्वययोग्यम् गङ्गार्थप्रवाहयोगितृतीयपदार्थतीरमिवेह महावाक्ये अन्वययोग्यमन्यतरपदार्थसङ्गितृतीयम्वस्तु किमपि प्रसिद्धन्ततोन सम्भवत्यत्र अजहत्स्वार्थलक्षणेतिवेदितव्यम्। न च तत्त्वम्पदयोर्मध्ये कस्यचिदेकपदस्य जहदजहत्स्वार्थरूपनिश्चयविनिगमकम् किञ्चिल्लिङ्गम्विद्यते नवा उपपद्यतेपि लक्षणद्वयम् निर्विशेषाखण्डवाक्यार्थतात्पर्य्यस्य निर्णितस्य विरोधप्रसङ्गात्। नन्वस्तुतत्पदम् गौण्या वृत्त्या तत्सदृशपरम् तथा च ब्रह्मसदृशोऽसि त्वमितिवाक्यार्थः सङ्गच्छताम् तदपि न सम्भवति अस्यजीवस्य परोपमम् प्रसिद्धरूपं स्यादित्यपि न सम्भवति यतः भविष्यत्कालं स्पृशन्ती अस्तिता वर्त्तमानता न सम्भवति अत्र तत्त्वमसीतिवाक्ये वर्त्तमानत्वार्थकासिपदस्य विद्यमानत्वात् अप्रमाणवलिता च वर्त्तमानत्यागपूर्व्वकभविष्यत्स्वीकृतिर्नोपपद्यते ततोऽत्र जीवब्रह्मणेरैक्यप्रतिपादनाय भागलक्षणायुक्तेतिवेदितव्यम्। सोयं देवदत्त इतिवाक्ये तदिदम्पदार्थयोः भेदे प्रतीते विरुद्धम् तत्

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

देशकालादिविशेषणमुपेक्ष्य देवदत्तव्यक्तिमात्रम्पदाभ्यां संलक्ष्य तद्रूपवाक्यार्थेऽभिन्ने वाक्यात्मकतदिदम्पदद्वयम् बोधकतया नीयते तथा तत्त्वम्पदार्थयोर्निश्चिताभेदविरोधिनम् मायाऽविद्याकृतसर्व्वज्ञत्वाल्पज्ञत्वादिधर्म्मसमूहमपहाय शरीरबुद्धिसाक्षिचिन्मात्रम्भागं त्वम्पदेन सदपरिच्छिन्नचिन्मात्रभागं तत्पदेन उपलक्ष्य अनन्तरम् लक्षितैकचिन्मात्राखण्डवाक्यार्थविषये वाक्यात्मकतत्त्वम्पदद्वयम् घटयेत्। तथा च स्मर्य्यते "एकात्मकत्वाज्जहती न सम्भवेत्तथा जहल्लक्षणता विरोधतः। सोयम्पदार्थाविभागलक्षणा युज्येत तत्त्वम्पदयोरदोषतः" इति। ननु तत्त्वम्पदार्थयोरेकार्थत्वे तत्त्वम्पदयोरन्यतरस्य वैयर्थ्यं कथन्न स्यादत्रोच्यते तत्पदलक्ष्ये श्रोतुरुपस्थिताम् परोक्षत्वालब्धत्वबुद्धिन्निहन्तुं त्वम्पदमपेक्ष्यते। त्वम्पदलक्ष्यन्त्वात्मरूपत्वात्। सदैवापरोक्षम् लब्धञ्च। एवं त्वम्पदलक्ष्ये प्रतीतमपूर्णत्वदुःखित्वरूपभ्रमन्निहन्तुन्तत्पदमपेक्ष्यते। तत्पदलक्ष्यञ्च पूर्णमदुःखम् सुखरूपमित्यर्थः प्रसिद्धएव। "योवै भूमा तत्सुखम्" इत्यादिश्रुतेः। तथाच परस्परलक्ष्याभेदनिगमनाय अत एवालौकिकस्वात्मतत्त्वञ्चावगमयितुन्तत्त्वम्पदे परस्परं सापेक्ष्ये वेदितव्ये। अतस्तयोरन्यतरस्य न वैयर्थ्यमितिभावः। ननु सच्चिदानन्दरूपविशेषणत्रयवैशिष्ट्यादात्मनः असदचिदनानन्दत्वरूपत्रैविध्यप्रतियोगित्वादखण्डत्वं न सम्भवति। तत्रोच्यते अत्र पदानामखण्डार्थकत्वं सर्व्वथान्यसंसर्गशून्यनित्यवस्त्वर्थकत्वम्। अथवा जातिगुणाद्यन्याघटितवस्त्वर्थकत्वञ्चापि वेदितव्यम्। यतः उक्तविधाखण्डार्थता प्रकृष्टः प्रकाशः चन्द्रः इत्यादिवाक्ये प्रश्नप्रतिवचनानुरोधेन चन्द्रमात्रप्रबोधात् प्रसिद्धा उक्तवाक्यस्य चन्द्रमात्रबोधकत्वम् प्रतिपाद्यते। प्रकृष्टः प्रकाशः चन्द्रः इतिवाक्यस्य पदत्रयप्रवृत्तिनिमित्तानाम्प्रकर्षकत्वप्रकाशत्वचन्द्रत्वानाञ्चन्द्रे योगः उक्तधर्म्मान्यधर्म्माणाम्व्यवच्छेदश्च तथा चन्द्रनिष्ठोन्यभेदश्च न पृष्टःअपृष्टार्थे शाब्दबोधो न युज्यते तस्मादुक्तवाक्याच्चन्द्रमात्रस्यैव बोध इतिवेदितव्यम्। प्रकृष्टनिकृष्टादिज्योतिस्समूहमालोक्यात्र कश्चन्द्र इति प्रश्ने चन्द्रव्यक्तिमात्रम् ज्ञातुमिष्टम्भाति। अतस्तदेव प्रश्नविषयः इतिप्रश्नविषयमाकलय्य जिज्ञासानिवृत्तये जिज्ञास्यमात्रबोधनतात्पर्य्येण प्रवृत्तोत्तरयितृवाक्येनापि प्रश्नविषयविषयकेनैव भाव्यमितिभावः। सच्चिदानन्दानामनेकत्वेऽपि "सच्चिदानन्दात्मानमद्वितीयम्ब्रह्म भावयेत्" इत्यादिवाक्येन बोध्यबोधनरूपव्यवहारविषये सत्त्वचित्त्वानन्दत्त्वरूपकल्पना आत्मनो मिथ्याजड़-

१०

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

महादुःखरूपमोहादन्यस्वभावत्वद्योतनार्थं नतु मिथ्यात्वादिप्रतियोगित्वदर्शनायैव केवलमितिभावः। अपिच सच्चिदानन्देतिनिरूक्तवाक्ये अद्वितीयमितिशब्दः ब्रह्मण अद्वयत्वम् नामाखण्डत्वम्बोधयतितीवेदितव्यम्।१।३।१।

प्रथमाध्यायस्थप्रथमपादस्थपञ्चमसूत्रस्थेश्वरशब्दमनुसन्दधानः श्रीमान्सूत्रकारः ईश्वरम्विशिनष्टि विशेषणद्वयेन वक्ष्यमाणसूत्रस्थेन॥

सर्व्वशक्तिमदनादिरीश्वरः।१।३।२।

ईश्वरः मायाप्रतिबिम्बितश्चित्प्रविबिम्बः अनावृतस्वरूपः अणिमाद्यैश्वर्य्यसम्पन्नः षड्विधैश्वर्य्यसम्मपन्नो वा सृष्टिस्थित्यन्तकारिमायाशबलितम्ब्रह्मेतिशास्त्रप्रसिद्धः। प्रतिपादितञ्च ईश्वरस्वरूपम् संसृतिस्वरूपप्रदर्शनावसरे पूर्व्वमेवातः तत्स्वरूपप्रदर्शनमत्रपिष्टपेषणवदनपेक्षितमिति न व्याख्यातङ्केवलम् सूत्रकारसूत्रितमीश्वरपरिचायकम् विशेषणद्वयम् व्यख्यायते। ईश्वरः कथम्भूतः सर्व्वशक्तिमत् विभक्त्यभावोसमासात् सर्व्वशक्तिमानित्यर्थः सकलसामर्थ्यशालीति यावत्। मतुप्प्रत्ययान्तोयं शब्दः "परास्य शक्तिर्विविधैव श्रूयते स्वाभाविकी ज्ञानबलक्रिया च" "सर्व्वज्ञं सर्व्वशक्ति महामायञ्च ब्रह्म" इत्यादिश्रुतेः। यद्वा सर्व्वेषाम्प्राणिनाम् याः शक्तयस्तद्वान्। तथाहि श्रावयति श्रुतिः सर्व्वशक्तियोगमीश्वरस्य "सर्वकर्म्मा सर्व्वकामः सर्वगन्धः सर्व्वरसः सर्व्वमिदमभ्यात्तोवाक्यनादरः सत्यकामः सत्यसङ्कल्पः सर्व्वविदेतस्य वा अक्षरस्य प्रशासने सूर्य्याचन्द्रमसौ विधृतौ तिष्ठतः" इत्यंवञ्जातीयका। तथा च स्मर्य्यतेऽपि "बुद्धिर्ज्ञानमसम्मोह" इत्युपक्रम्य "भवन्ति भावा भूतानामत्त एव पृथग्विधाः" इत्यन्तम्। न स्यादेतत् विकरणम् परमेश्वरम् शास्ति शास्त्रम् "अचक्षुष्कमश्रोत्रमवाङ्मनाः" इत्येवञ्जातीयकम्। कथं स सर्व्वशक्तिमानपि सन्कार्य्याय प्रभवेन्निरिन्द्रियः देवादयोहि शक्तिमन्त इन्द्रियादिसम्पन्ना एव स्वस्वकार्य्यसम्पादनाय प्रभवन्तो विज्ञायन्ते। कथञ्च नेतिनेतीतिप्रितिषिद्धसर्व्वविशेषस्य ईश्वरस्य सर्व्वशक्तिमत्ता सम्भवेदिति। अत्राच्यते श्रुत्यवगाह्य एवायमतिगम्भीर ईश्वरः न कपोलकल्पनावगाह्यः। न च यथैकस्य शक्तिर्दृष्टा तथेतरस्याऽपि शक्त्या भवितव्यमिति नियम उपलभ्यते। प्रतिषिद्धसर्व्वविशेषस्यापीश्वरस्य सर्व्वशक्तिमत्ता

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

सम्भवति। अविद्याकल्पितम् जैवम् सर्व्वसामर्थ्यम् वस्तुत ईश्वरसामर्थ्यमेवेतिवेदितव्यम्। तथा च श्रुतिः "अपाणिपादोजवनोग्रहीता पश्यत्यचक्षुः स शृणोत्यकर्णः" इत्येवञ्जातीयका। तथा च स्मृतिः "न चास्य कश्चिन्निपुणेन धातोरवैति जन्तुः कुमनीष ऊतीः" इत्येवञ्जातीयका। अकरणस्यापीश्वरस्य सर्व्वशक्तिमत्तां दर्शयति। ननु नहि प्रयोजनमनुद्दिश्य मन्दोऽपि प्रवर्त्तत इति शास्त्रकाराभ्युपगमात् तथा लोके व्यवहाराच्च। लोके प्रवर्त्तमानः पुरुषः न मन्दोऽपि कामपि तावत्प्रवृत्तिमात्मप्रयोजनाऽनुपयोग्यामारभमाणोदृष्टः किमुत गुरुतरसंरम्भाम्। भवति च तथा लौकिकव्यवहारयोषिणी श्रुतिः "न वारे सर्व्वस्य कामाय सर्व्वम्प्रियम्भवति आत्मनस्तु कामाय सर्वं प्रियम्भवति" इति गुरुतरसंरम्भा चेयमीश्वर-प्रवृत्तिः उच्चावचप्रपञ्चम्ब्रह्माण्डम् विरचयितव्यम् स्थापयितव्यम् क्षपयितव्यञ्च यदीयमपि प्रवृत्तिरीश्वरस्य आत्मप्रयोजनपयोग्या परिकल्पेत नित्यतृप्तत्वमीश्वरस्य "नित्यतृप्तोनिराश्रयः" इत्याद्यागमप्रसिद्धम् वाध्येत। या लोकप्रवृत्तिः सा स्वफलार्था इतिप्रसिद्धिः। न च दयालुप्रवृत्तावतिव्याप्तिः तत्रापि परदुःखासहनजन्यस्वात्मवैकल्यनिवृत्त्यर्थित्वात् प्रयोजनाभावे प्रवृत्त्यभावोऽपि सम्भति। अथ बुद्ध्यपराधादुन्मत्तवत् आत्मप्रयोजनमन्तरापि प्रवर्त्तेत। तथासति श्रूयमाणं स्मर्य्यमाणञ्च सर्व्वज्ञत्वमीश्वरस्य व्याहन्येत। तस्मादसम्बद्धा जगज्जन्मस्थितिभङ्गानुकुला प्रवृत्तिरीश्वरस्येति। तत्रोच्यते यथा लोके कस्यचिन्निवृत्ततर्षस्य प्राप्तैषणस्य राजपरिवृढस्य तत्सचिवस्य वा प्रयोजनमन्तरेणैव कामनानभिसन्धौ लीलारूपाः प्रवृत्तयः खेलविहारेषु भवन्ति। कदाचिद्राजादीनाम् लोलाया अपि किञ्चिप्रयोजनम् सुखोल्लासादिकम् सम्भाव्येत। ततोदृष्टान्तान्तरन्दीयते। यथाच उच्छ्वासप्रश्वसयोः प्रयोजनमन्तरैव स्वभावादेव प्रवृत्तिरेवमीश्वरस्याप्यनपेक्ष्य किञ्चित्प्रयोजनम् स्वभावादेव लीलारूपा प्रवृत्तिरुपपद्यत इतिवेदितव्यम्। यथा प्राणस्य स्वभावश्चलनम्। प्रारब्धम् उच्छ्वासादिनिमित्तं स्यादेवमीश्वरस्यापि कालकर्म्मसहिता माया प्रकृतिपदवाच्या स्वाभावोऽस्त्येव। एवम्व्याख्यानमनवद्यम् वेदितव्यम्। ननु "प्रकृतिं यान्ति भूतानि निग्रहः किङ्करिष्यति" इति स्मरणात् प्रकृतिमतः प्रकृत्यधीनत्वोपपत्तावीश्वरस्यापि प्रकृतिमत्वे स्वभाववत्त्वम् इतियावत् प्रकृत्यधीनत्वम् मायापारवश्यम्प्रसज्येत। ततः अनैश्वर्य्यमापद्येत इति। तत्रोच्यते आविद्यकस्य जीवस्यैव तत्पारतन्त्र्यम्प्रकृतिपराधीनत्वमि-

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

स्यर्थः। न तु ईश्वरस्य मायिकत्वेऽपि मायारूपस्वभावत्वेऽपीतियावत्। तत्पारतन्त्र्यमितिवेदितव्यम्। तथाचोक्तिः "अविद्यावशगोजीवस्तद्वै चित्र्यादनेकधा। मायाविम्बोवशीकृत्य तां स्यात्सर्वज्ञ ईश्वरः" अत्र-वाक्ये वशीकृत्यतामितिशब्देन मायाया एव ईश्वरपारवश्यम् माया ईश्वरपराधीनेतियावत् प्रतिपाद्यते। तथा सति कैमुतन्यायेन नेश्वरो-मायापराधीन इतिवेदितव्यम्। एवमीश्वरस्य जगत्कारणत्वसिद्धौ निमित्तत्वोपादानत्वभेदात् कारणद्वैविध्यप्रसिद्धौ किमीश्वरोनिमित्तका-रणमुतोपादानकारणमाहोस्विदुभयविधकारणमिति। नाद्यः वक्ष्यमा-णप्रकारेण तदनुपपत्तेः निमित्तकारणमात्रेश्वरकल्पना वेदान्तिकसमय-प्रतिपक्षिणी वेदितव्या। केचित्सेश्वराः प्रधानपुरुषयोरधिष्ठातारम् केव-लम् निमित्तकारणमीश्वरङ्कल्पयन्ति। इतरेतरविलक्षणान् प्रधानपुरुषे श्वरांश्चाभ्युपगच्छन्ति। माहेश्वरास्तु शैवपाशुपतकारुणिकसिद्धान्ति कापालिकभेदाच्चतुर्विधाः। कार्य्यकारणयोगविधिदुःखान्तान् पशुपति-नेश्वरेण पशुपाशविमोक्षणाय जीवबन्धनाशयंतियावदुपदिष्टान् महदा-दिकप्रधानसमाधित्रिषवणम्नानादि मोक्षस्वरूपान् पञ्चपदार्थान् मन्यन्ते। पशुपतिमीश्वरंनिमित्तकारणम्वर्णयन्ति। सकर्तृकम् कार्य्यत्वात् घटादि वत् घटनिमित्तकारणकुलालवज्जगन्निमित्तकारणेश्वरेण भवतिव्यञ्चेति वैशेषिका मन्यन्ते। कर्म्मफलम् सपरिकराभिज्ञदातृकङ्कालान्तरभावि फलत्वात् सेवाफलवदितिगौतमा दिगम्बराश्च मन्यन्ते। कर्त्तारमीश्वरं निमित्तकारणम्प्रसाधयन्ति। तत्र तार्किकोक्तिर्नसम्भवति "अधिष्ठाना नुपपत्तेश्च" इतिब्रह्मसूत्रात् तार्किकपरिकल्पितनिमित्तकारणरूपेश्वरो नोपपद्यते। साधिष्ठान एवलोके शरीरी राजा भूमीश्वरो दृश्यते। न निरधि ष्ठानोऽशरीरा अतश्च दार्ष्टान्तिकस्य दृष्टान्तराजसदृशस्यादृष्टस्येश्वर-स्यापि किञ्चिच्छरीरं तार्किकैर्वर्णयितव्यं स्यात्। नच तद्वर्णनमुपपद्यते शरीरस्य जगदुत्पत्त्युत्तरकालावस्थायित्वात् प्राक् जगदुत्पत्तेस्तदसम्भ-वात् निरधिष्ठानत्वेऽशरीरत्व इति यावत्। ईश्वरस्य निमित्तकारण-रूपस्य प्रवर्त्तकत्वं न सम्भवति। लोक एवं दृष्टत्वादथलौकिकदृष्टान्ता नुसारादीश्वरस्य शरीरकल्पनायां सत्यामीश्वरस्यापि शरीरित्वे सिद्धे संसारिवद्भागः प्रसज्येत। ततश्च भोगस्य वासनायोनित्वात् वासना-याश्च कर्म्मयोनित्वात् कर्म्मणश्च भोगहेतुत्वात् तस्य सवासनत्व-कर्तृत्वभोक्तृत्वरूपचक्रप्रवाहपातित्वादनैश्वर्य्यमुपपद्येत। एवमन्या-स्वपि वेदान्तसमयप्रतिपक्षिणीष्वीश्वरकल्पनासु अवैदिकत्वाल्लौकिकदृ-

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

दृष्टान्तपारवश्यसामन्यादियमनुपपत्तिर्योजयितव्येतिवेदितव्यम्।नद्वितीयः तथा सति घटाद्युपादानीभूतमृत्तिकादिवदीश्वरस्यापि जगदुपादानीभूतस्य परिणामविकारः प्रसज्येत। श्रूयमाणं स्मर्य्यमाणञ्च तस्य निर्विकारित्वम्बाध्येत। न तृतीयस्तदनुपपत्तेः अनुपपत्तिश्च प्रदर्श्यते निमित्तोपादानकारणरूपमीश्वरम्भागवता पाञ्चरात्रा मन्यन्ते। तेषामयं समयः भगवानेवैकोवासुदेवः शुद्धचित्स्वरूपः परमार्थतत्वम् स स्वात्मानञ्चतुर्धा विभज्य वासुदेवव्यूहरुपेण सङ्कर्षणव्यूहरूपेण प्रद्युम्नव्यूहरूपेणानिरुद्धव्यूहरूपेण च प्रतितिष्ठति। तत्र वासुदेवः परमात्मा। सङ्कर्षणोजीवः। प्रद्युम्नोमनः। अनिरुद्धोऽहंकारः। तेषाम्वासुदेवः पराप्रकृतिः। तदन्ये सङ्कर्षणादयः कार्य्यम्। तमेवं रूपमीश्वरमभिगमनोपादानेज्यास्वाध्याययोगैः देवताभिगमनपूजाद्रव्योपार्ज्जनाष्टाक्षरजपध्यानैर्वर्षशतमिष्ट्वा क्षीणक्लेशो भगवन्तमेव प्रतिपद्यत इति। तत्र भगवतोऽनेकधा स्वात्मव्यूहनानुकूलावस्थितिर्न विरूध्यते "स एकधा भवति त्रिधा भवति" इत्यादिश्रुतेः भगवतोऽभिगमनादिरूपमाराधनमपि न निषिध्यते "श्रद्धाचित्त्वोभूत्वा" तं यथा यथोपासते" इत्यादिश्रुतेः "मत्कर्म्मकृत्मत्परमः" इत्यादिस्मृतेश्च ईश्वरप्रणिधानस्य प्रसिद्धत्वात्। यच्चोच्यते वासुदेवात्सङ्कर्षणोजायते सङ्कर्षणाच्च प्रद्युम्नः प्रद्युम्नाच्चानिरुद्ध इति। तन्निराकरणीयम् वासदेवाख्यपरमात्मनःसङ्कर्षणाख्यजीवोत्पत्त्यनुपपत्तेः। जीवोत्पत्तिस्वीकारे जीवस्यानित्यत्वादिदोषप्रसङ्गात् निर्मोक्षप्रसङ्गाच्च तस्मादसङ्गतैषा एकस्यैवेश्वरस्य जनकजन्यत्वस्वीकारात् निमित्तोपदानकारणरूपेश्वरकल्पनेतिवेदितव्यम्। लोके कर्त्तुर्देवदत्तादेः करणस्य परश्वादेः अनुत्पत्तिदर्शनात् वैष्णवसमये जीवरूपसङ्कर्षणात् करणात्मकमनोरूपप्रद्युम्नसृष्टिरनुपपन्नेति ज्ञानैश्वर्य्यादिसाम्यस्वीकारात्। वासुदेवादीनास्परस्परानतिशयवत्वे कार्य्यकारणभावोनोपपन्नः। मृद्घटादिकारणकार्य्ययोः परस्परातिशयित्वदर्शनात्। इत्यादिदोषावली ग्रन्थविस्तारभिया नोद्घाटितेतिवेदितव्यम्। एवम् कोटित्रयनिरासाच्चतुर्थकाट्यभावाच्चेश्वरस्य कारणत्वमेव निरस्तं स्यात्तच्च न सम्भवति जगत्कार्य्यम्प्रति कारणत्वेनेश्वरस्य स्वीकारादास्तिकसमयैः। "यतोवा इमानि भूतानि जायन्ते" इत्यादिश्रुतेः "मम योनिर्महद्ब्रह्म तस्मिन् गर्भं दधाम्यहम्" इत्यादिस्मृतेश्च तस्माद्भवितव्यमेव जगत्कारणरूपेणेश्वरेणेतिसिद्धम्। कारणत्वञ्च वेदान्तसामयिकमभ्युपगन्तव्यम्। निमित्तोपादानरूपमुभयवि-

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

धर्म्वेदितव्यम्। तन्तुवागुरासृष्टौ यथोर्णनाभेर्निमित्तत्वमुपादानत्वञ्च लोकप्रत्यक्षसिद्धम् तद्वत्। नन्वीश्वरत्वेन प्रसिद्धानां भूमिपाललोकःपालादीनां निमित्तत्वमेव परम्प्रतीयते। तद्वत् परमेश्वरस्यापि निमित्तकारणत्वमेव प्रतिपत्तव्यम्भवत्यपिच कार्य्यं जगदिदम् सावयवमचेतनमशुद्धम् दृश्यते। तथा सतीश्वरस्योपादानत्वस्वीकृतावीश्वरेणाऽपि जगत्सदृशेनैव भवितव्यम्। घटमृदादिकार्य्यकारणयोः सादृश्यदर्शनात्। ईश्वरस्य जगत्सादृश्यस्वीकृतौ "निष्कलम् निष्क्रियम् शान्तमनिरवद्यन्निरञ्जनम्"इत्यादीश्वररूपाभिधायिनी श्रुतिर्विरुध्येत। निरुक्तश्रुत्यनुरोधादीश्वरस्य निमित्तमात्रत्वं स्वीकृतं स्यादुपादानन्तु ईश्वरादन्यदचेतनत्वादिगुणकम् स्मृतिप्रसिद्धम् किञ्चित्प्रधानादि स्वीकर्त्तव्यमितिचेन्न। उपादानकारणगोचरस्यैव दृष्टान्तस्य श्रुतावुपलब्धेः। यथा "सौम्यैकेन मृत्पिण्डेन विज्ञातेन सर्व्वम्मृण्मयम्विज्ञातं स्यात् वाचारम्भणम्विकारानामधेयम् मृत्तिकेत्येवसत्यम्" इत्यादि। अपिच एवम्भूताया एव प्रतिज्ञायाःश्रुतौ दर्शनात्। "उततमादेशमप्राक्षो येनाश्रुतं श्रुतम्भवत्यमतम्मतमविज्ञातम् विज्ञातम्"इत्यादि तत्र एक विज्ञाने नसर्वान्यविज्ञानम् ब्रह्मविज्ञानेन जगद्विज्ञानमिति यावत् प्रतीयते। तचोपादानत्व एवोपपद्यते। कार्य्यस्योपादानकारणाव्यतिरेकात् निमित्तत्वे तु कार्य्यकारणाव्यतिरेकः कुम्भव्यतिरेकिकुलालदर्शनान्नोपपद्यते इति "यतो वा इमानि भूतानि जायन्ते" इत्यत्र श्रुतौ जनिकर्त्तुः प्रकृतिरितिपाणिनेः प्रकृतिलक्षणैवोपादानलक्षणेतियावत् पञ्चमी द्रष्टव्या निमित्तत्वन्त्वधिष्ठात्रन्तराभावात् प्राक् सृष्टेः "सदेवसौम्येदमग्रआसित्" "एकमेवाद्वितीयम्"श्रुतावित्याद्यवधारणाच्च वेदितव्यम्। यथा लौकिकम् कुलालादिनिमित्तकारणम् स्वातिरिक्तम्मृदाद्युपादानमादाय प्रवर्त्तते नैवमीश्वरः स्यातिरिक्तङ्किञ्चिदन्यमादत्ते यद्यप्यविद्याग्रहणम् "मायामादाय तामसीम्" इत्यादिवाक्यात् स्वीक्रियते। तथापि चन्द्रचन्द्रिकयोरिव शक्तिशक्तिमतोरभेदान्मायाया ईश्वरादभिन्नत्वस्वीकारात् ईश्वरसत्तयैव तस्याः सत्त्वात्। स्वयमसत्त्वाच्च अविद्यायाः नेश्वरादन्यद्वस्तु सत्त्वमुपपाद्यमिति वेदितव्यम्। ततश्च न प्रतिज्ञाव्याहतिरिति वेदितव्यम्। अधिष्ठातरि निमित्त इतियावत्। उपादानादन्यस्मिन् स्वीकृते एकविज्ञानेन सर्वविज्ञानं न सम्भवति। तथा सति श्रौतदृष्टान्तस्य श्रौत प्रतिज्ञायाश्च उपरोधः प्रसज्येत। तस्माद्युक्तमीश्वरस्यनिमित्तत्वमुपादानत्वञ्च। स्वानति

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

रिक्तमायास्वीकारात्‌ईश्वरस्य वेदान्तसम्मतविवर्त्तोपादानत्वमव्यक्तम्। निराकृतञ्चपरिणाम्युपादानत्वमित्यवधेयम् । अत्र विवर्त्तोपादानत्वमेवोपादानस्थानीयम्वेदितव्यम्।तथा न कश्चिद्विरोधइतिवेदितव्यम्. पुनः स ईश्वरः किंलक्षणविशिष्टः अनादिः आ।प्रथमम् दीयते गृह्यते इति आदिः"पुंस्यादिः पूर्व्वपौरस्त्यप्रथमाद्या अथा स्त्रियाम्" इतिकोशात्। न आदिर्यस्येत्यनादिः अजन्मा इत्यर्थः। नथा च श्रूयते "स वा एष महानज आत्माऽजड़ोऽमरोऽमृतोऽभयोब्रह्म"इत्यादि। स्मर्य्यते च "अजोनित्यः साश्वतोयम्पुराणः"इत्यादि।"ऊर्ध्वमूलमधःशाखमश्वत्थम्प्राहुरव्ययम्" इतिभगवद्वाक्यात्।प्रवाहरूपेण संसारस्य।व्ययत्वसिद्धावनादित्वसिद्धिः "न रूपमस्येह तथोपलभ्यते नान्तोन चादिर्न च सम्प्रतिष्ठा" इत्यादिस्मृत्या च जगदनादित्वम् साक्षादभिधीयते। ततश्च तद्धतोरीश्वरस्याप्यनादित्वमुपपन्नमेवेतिसिद्धम्। ईश्वरस्यादिमत्त्वे जन्यत्वसिद्धौ "न तस्य कश्चिज्जनिता न चाधिपः"इत्यादिश्रुतिर्वाध्येत। तस्मात्सिद्धमीश्वरोनादिरिति "योमामजमनादिञ्च वेत्ति लोकमहेश्वरम्। असम्मूढः स मर्त्येषु सर्व्वपापैः प्रमुच्यते" इतिभगवद्वाक्यमपि ईश्वरस्यानादित्वमुद्घोषयतीतिवेद्यम्। अत एव भगवत्युपात्तपूर्व्वोक्तजगत्सादृश्यप्रसङ्गोपि निरस्त इति वेदितव्यम्॥ १। ३। २॥

श्रीमान् सूत्रकारः प्रथमाध्यायस्थप्रथमपादस्थषष्ठसूत्रस्थब्रह्मशब्दमनुसन्दधानोऽग्रिमसूत्रमारभमाणो ब्रह्म विशिनष्टि॥

शुद्धचैतन्यं नित्यं ब्रह्म १।३।३॥

ब्रह्मस्वरूपं प्रथमाध्यायस्थप्रथमपादस्थतृतीयसूत्रस्थस्वरूपशब्दव्युत्पादनावसरे व्युत्पादितमेवातोऽत्र न पुनर्व्युत्पाद्यते। पिष्टपेषणन्यायादनपेक्षितत्वात्।केवलम् सूत्रकारसूत्रितम् तद्विशेषणद्वयमेव व्याख्यायते। ब्रह्म बृहतेर्धातोरर्थानुगमात्।बृंहणस्वभावम् व्यापकमितियावत्। किंलक्षणविशिष्टं शुद्धचैतन्यम् निर्गुणचेतनभावः। यद्वा तत्त्वमसीतिवाक्ये तत्त्वम्पदार्थयोः परोक्षापरोक्षत्वादिविरुद्धधर्म्मांशत्यागेन भागलक्षणया परिशोधितमविरुद्धधर्म्मांशरूपचैतन्यम् श्रावयति च श्रुतिः।ब्रह्मणश्चैतन्यरूपत्वम्"विज्ञानमानन्दम्ब्रह्म""सत्यं ज्ञानमनन्तम्ब्रह्म" "अनन्तरोऽवाह्यःकृत्स्नः प्रज्ञानघनः" इत्येवं जातीयका जीवस्य आविद्यकत्वात् ईश्वरस्य च मायिकत्वात् तयोर्यथाक्रममविद्यायाम्मायायाञ्च प्रतिबिम्बितत्वादित्यर्थः। जीवस्यावृतिशक्तिमत्वात् ईश्वरविक्षे-

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

पशक्तिमत्वादशुद्धत्वम् व्यक्तम् । ब्रह्मणश्चासङ्गत्वात् ताभ्याम्विलक्षणो धर्म्मः शुद्धत्वमित्यर्थः। तथाच स्मर्य्यते "ईक्षणादिप्रवेशान्ता सृष्टिरीशेन कल्पिता। जाग्रदादिविमोक्षान्तः संसारोजीवकल्पितः। अद्वितीयम्ब्रह्मतत्वमसङ्गन्तन्नजानते । जीवेशयोर्मायिकयोर्वृथैव कलहं ययुः" इत्यादि तथा ब्रह्मणः शुद्धिं श्रुतिरपि श्रावयति "शुद्धोऽबाध्यःस्वरूपो बुद्धःसुखस्वरूपः" इत्येवं जातीयका अत्र श्रुतावबाध्यस्वरूप इतिशब्दाद्ब्रह्मणोऽनध्यस्तत्वम् शुद्धस्य बिम्बरूपस्य हेतुगर्भ विशेषणत्वम् वेदितव्यम्। ततश्चजीवेश्वरयोरध्यस्तत्वम् व्यज्यते । ततोऽशुद्धत्वञ्चोपपद्यत इतिवेदितव्यम्। पुनस्तद्ब्रह्म किं लक्षणविशिष्टम् नित्यम् कालत्रयानपायि सर्व्वदास्थितिशील मित्यर्थः।इदन्नित्यशब्दरूपविशेषणम् ब्रह्मणः काणभुजानामिवागन्तुकचैतन्यरूपत्वम्व्यावर्त्तयति।साङ्ख्यानामिव नित्यचैतन्यस्वरूपत्वमनुवर्त्तयतीतिवेदितव्यम् । वेदान्तिनां साङ्ख्यानाञ्च चैतन्यनित्यत्वाभ्युपगमे न काचिद्विप्रतिपत्तिर्वेदितव्या। आत्ममनःसंयोगजमग्निघटसंयोगजलोहितादिगुणवत् आगन्तुकचैतन्यं वेदितव्यम् । काणादानाम् तैरभिधीयते दृश्यते सुप्तिमूर्छितग्रहाविष्टानान्तासु सुप्त्याद्यवस्थासु चैतन्याभावस्ते च परिपृष्टा न वयम् किञ्चिच्चेतयामहे इतिजल्पन्ति । स्वस्थाश्च चेतयमाना दृश्यन्तेऽतश्चैत्न्यस्य कादाचित्कत्वदर्शनात् भवितव्यम्ब्रह्मणाऽऽगन्तुकचैतत्येनेतिप्राप्ते काणभुजि समये निर्णीयते।ब्रह्म नित्यचैतन्यमेवोपाधिसम्पृक्तञ्जीवभावेनावतिष्ठते "तत्सृष्ट्वा तदेवानुप्राविशत्" इत्यादिश्रुतेः । स च जीवोनित्यचैतन्योभवितुमर्हति "असुप्तः सुप्तानभिचाकसीति" "अयम्पुरुषः स्वयञ्ज्योतिर्भवति" "नहि विज्ञातुर्विज्ञप्तेर्विपरिलोपोविद्यते" इत्यादिश्रुतेः । यत्तु सुप्तमूर्च्छितग्रहाविष्टा न चेतयन्त इत्यभिहित आगन्तुकचैतन्यरूपत्वे हेतुः सच श्रुत्यैव परिह्रियते । सुषुप्तम्प्रकृत्य "यद्वैतन्न पश्यति पश्यन्वै तन्न पश्यति नहि द्रष्टुर्दृष्टेर्विपरिलोपोविद्यतेऽविनाशित्वान्नतु तद्द्वितीयमस्ति ततोन्यद्विभक्तम् यत्पश्येत्" इत्येवं जातीयकया एवम् श्रुतिबलादुपपद्यते । विषयाभावादिदमचेतयमानत्वम् न चैतन्याभावादिति यथा चान्द्रप्रातिबिम्ब्यानुकूलजलाभावे शैवालादिव्यवधानात् । प्रतिबिम्बाभावः। नच चन्द्रस्वरूपबिम्बाभावात् तद्वदेवम् काणभुजी सम्मतिः श्रुतिविरोधिन्यसम्मता भवति । उपपद्यते च नित्यचैतन्य स्वरूपत्वम्ब्रह्मणः। एवम् क्षणिकविज्ञानादिमतमपि निरस्तम्वेदितव्यम् । अत्र चैतन्यशब्दप्रयोगः चेतनशब्दं गुणित्वद्योतकमन्तरा ब्रह्मणोभावमा

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

अरूपज्ञापकः पुंस्त्वादिव्यावर्त्तकश्च वेदितव्यः। यथा स्मर्य्यते च "सत्ता मात्रम् केवलविज्ञानमजम् सन्नित्यन्तत्त्वम्" "नासन्नसन्न सदसन्न महन्न चाणु नस्त्री पुमान्न च नपुंसकमेकबीजम्" इत्यादि ॥

इतिपरमपूज्यपादश्रीमद्योगदत्तशर्म्मकृतामृतोपदेशे पूज्यपाद श्रीमद्योगदत्तशर्म्मशिष्यश्रीमत्सत्यनारायणशर्म्मकृतभाष्ये प्रथमाध्यायस्य तृतीयः पादः समाप्तः।१।३।३।

एवं जीवेश्वरब्रह्मरूपत्रिविधचैतन्यस्प्रतिपाद्य श्रीमान् सूत्रकारः प्रथमाध्यायस्य तृतीयपादं समाप्य चतुर्थपादमारभते। प्रथमाध्यायस्थ प्रथमपादस्थतृतीयसत्रस्थस्वरूपशब्दमनुसंदधानः स्वरूपभूतम्ब्रह्म निर्दिशतीतिवेदितव्यम्—

तद्ध्यात्मनोरूपम् १।४।१

तच्छब्दः प्रथमाध्यायस्थतृतीयपादस्थतृतीयसूत्रस्थमव्यवहितम्ब्रह्मशब्दस्परामृशति। यद्वा तच्छब्द एव स्वयम् ब्रह्मवाचकः "ॐतत्सदितिनिर्द्देशोब्रह्मणस्त्रिविधःस्मृतः" इतिस्मरणात्। हि इत्यवधारणार्थे अव्ययम्। आत्मनः स्वस्य जीवस्येतियावत्। रूपम् स्वरूपम्। तथा जीवस्य ब्रह्मरूपत्वम् "एष ब्रह्मैष इन्द्" इत्युपक्रम्य "प्रज्ञाप्रतिष्ठा" इत्युपसंहृता ऋक्श्रुतिर्दर्शयति। तथा ऐतरेयारण्यकोपनिषदि महावाक्यमुपलभ्यते"प्रज्ञानम्ब्रह्म" इति। अत्र प्रज्ञानशब्देन प्राज्ञपदवाच्योजीवोऽभिधीयते येन वा पश्यतीत्यादि सर्व्वाण्येवैतानि प्रज्ञानस्य नामधेयानीत्यन्तम् श्रवणानुरूपस्य जीवस्यैव ईक्षणादिक्रियाकर्त्तृत्वस्य दर्शनात्। यजुर्वेदीयबृहदारण्योपनिषदि "अहम्ब्रह्मास्मि" इतिमहावाक्यञ्च तथैव जीवस्य ब्रह्मरूपत्वं दर्शयति। तथाच छान्दोग्य–श्रुतिगतम् "तत्त्वमसि"इतिमहावाक्यमपि दर्शयति। तथैव क्रमप्राप्ताथर्व्वणवेदगतम् "अयमात्मा ब्रह्म" इतिमहावाक्यञ्च दर्शयति। ननु "आत्मानं रथिनम्विद्धि शरीरं रथमेव तु"इत्यादिग्रन्थेनरथिरथादिरूपकविन्यासेन जीवं रथिनम् संसारमोक्षयोगन्तारम् कल्पयति "सोऽध्वनः पारमाप्नोति तद्विष्णोः परमम्पदम्" इतिग्रन्थेन विष्णुस्व्यापकम् ब्रह्मेति यावत् गन्तव्यङ्कल्पयति। अत्र विष्णोः परमम्पदम् इतिशब्देन विष्णोरन्यत् पदम्प्रतीयते। तथाच सद्वितीयत्वम् सावयवत्वञ्च आपततः। तत्रोच्यते राहोःशिरोवत् विष्णुपदयोरैक्यम्वेदितव्यम्। तथा सति सद्वितीयत्वञ्च निरस्तम्वेदितव्यम्। पद्यते गम्यते इतिव्युत्पत्या पदं गन्तव्यं

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

स्वरूपम्वेदितव्यम्। ततोऽङ्घ्रिरूपावयवत्वनिराकृतिर्वेदितव्या। "तंदुर्दर्शं गूढमनुप्रविष्टम् गुहाहितं गह्वरेष्ठं पुराणम् अध्यात्मयोगाधिगमेन देवम् मत्वा धीरो हर्षशोकौ जहाति" अत्राऽपि ग्रन्थे मन्त्रिमन्तव्यत्वेन जीवब्रह्मणी परस्परं भेदेन विशेषिते "द्वा सुपर्णा सयुजा सखाया समानं वृक्षम् परिषस्वजाते तयोरेकः पिप्पलं स्वाद्वत्त्यनश्नन्नन्योऽभिचाकशीति" इतिश्रवणात्। अदनत्वेन जीवोऽभिधीयते अनशनचेतनत्वाभ्याम् ब्रह्म अनयोर्वाक्ययोः गुहाहितं गह्वरेष्ठम्पुराणम् इति समानवृक्षं परिषस्वजाते इतिच। सर्व्वगतस्यापि ब्रह्मणः उपलब्ध्यर्थोदेशविशेषोपदेशो न विरुध्यते। सर्व्वगतसूर्यकिरणस्य वातायनरन्ध्रदेशोपलब्धिवत् इतिवेदितव्यम्। एवमुक्तप्रकारेण जीवब्रह्मणोर्वैरूप्यमुक्तम्भवति। अत्र च महावाक्येषु एकरूपत्वं श्रूयते। तदनुसारिणा सूत्रकारेण सूत्रितमुभयोरेकरूपत्वम्। तस्मादुपस्थितमपरिहार्य्यमासमञ्जस्यम्। तत्रोच्यते जैवभावः संसारित्वमितियावत्। आविद्यकः अवास्तविक इत्यर्थः। ब्राह्मभावस्तु असंसारित्वमितियावत्। पारमार्थिकः तस्मात् संसारदशायाम् औपाधिकमवास्तविकम् वैरूप्यम् वेदितव्यम्। मुक्तिदशायान्तु निरुपाधिकम् पारमार्थिकमेकरूपत्वम् वेदितव्यम्। नहि व्यर्थम्विवदितव्यम्। वादिप्रतिवादिभ्यामिति। दर्शयति च श्रुतिः आत्मनः जीवस्येत्यर्थः मुक्तिदशायां गन्तव्यमन्तव्यत्वादिवैरूप्यसञ्चिवव्यवहारनिवृत्तिम्। "यत्र त्वस्य सर्व्वमात्मैवाभूत् तत्केन कं पश्येत्" इत्येवंजातीयका अत्र श्रुतौ सर्व्वमितिशब्देन जगल्लक्ष्यते। जगता ब्रह्म लक्ष्यते। "सर्व्वं खल्विदम्ब्रह्म" इत्यादिश्रुतेः जगतः ब्रह्मरूपत्वश्रवणात्। पुनरत्र च श्रुतौ अस्य शब्देन जीवस्येति अर्थोवेदितव्यः। आत्मैवाभूदितिशब्देन तस्य ब्रह्मरूपत्वम्व्यज्यते। पुनरपि श्रुतिः जीवस्य ब्रह्मरुपत्वमुद्घोषयति "तमेवैकञ्जानथ आत्मानम्" इत्युपदिशन्ती। एतदुक्तम्भवति न संसारदशापन्नः देवमनुष्यादिरूपो विविधरूप आत्मा विज्ञेयः। किन्तु आविद्यकं संसारित्वम् विद्यया प्रविलाप्य तमेव परमात्मानमेकमद्वितीयम्ब्रह्मेतियावत्। आत्मानम् स्वञ्जानीत अत्र एवशब्दः जीवस्य ब्रह्मरूपत्वमवधारयति। ततोऽन्यरूपत्वम् निवारयतीतिवेदितव्यम्। ननु अत्र आत्मनः इतिशब्दस्य जीवस्येत्येवार्थः कथम् "आत्मा वै जायते पुत्रः" "एष आत्मनोऽर्धः पत्नी" "एष आत्मा अन्नमयः प्राणमयो मनोमयोविज्ञानमयः" इत्यादि श्रुतिभ्यः। तत्रोच्यते जीवस्य आत्मरूपत्वम् तत्त्वमस्यादिवाक्यसिद्धम् पारमार्थिकम्भवति। पुत्रादीनामात्मत्वञ्च अविद्यानि-

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

बन्धनम्वेदितव्यम्। तथा सूत्रितञ्च श्रीमता पतञ्जलिना "अनित्याशुचिदुःखानात्मसु नित्यशुचिसुखात्मख्यातिरविद्या" इति। अत एव पुत्रादीनाम् वस्तुतः अनात्मत्वमेव वेदितव्यम् । यत्र यत्र काचिदात्मप्रतीतिः सा सा ब्रह्मांशमात्रावलम्बिनीतिवेदितव्यम्। आत्मशब्दस्य अनन्यभूतब्रह्मरूपत्वाऽन्यवारकत्वप्रसिद्धेः। सिद्धः स्वयंशब्दोऽन्यवारकोब्रह्मवाचकः "कृष्णस्तुभगवान्स्वयम्" इत्यादिस्मृतेः। ननु घटादिष्वप्यचेतनेषु घटः स्वयं न जानात्येवमादि स्वयं शब्दस्य प्रयोगदर्शनात्। स्वयम्भावब्रह्मभावयोरेकत्वन्न सम्भवतीतिचेन्न। घटादिष्वपि स्फुरणरूपसत्तांशेन ब्रह्मण उपलम्भात् तेष्वपि स्वयंशब्दप्रयोगो न विरुद्ध इतिसिद्धम् । तथा स्मर्य्यते च "चेतनाचेतनभिदा कूटस्थात्मकृता नहि । किन्तुबुद्धिकृताभासकृतैवेत्यवगम्यताम्। यथा चेतन आभासः कूटस्थे भ्रान्तिकल्पितः। अचेतनो घटादिश्च तथा तत्रैव कल्पितः" इति। ननु त्वमहमादिषु सर्व्वत्रानुगतस्य स्वत्वस्येव सर्व्वत्रानुगतयोस्तत्तेदन्तयोरपि आत्मत्वम् । ततः ब्रह्मत्वं किन्न स्यादितिप्रष्टव्ये प्रतिवचनम् । तत्तेदन्तयोरुत्तममध्यमाधमरूपाहन्त्वमिदमादिष्वनुगतत्वेऽपि आत्मत्वाधिकवृत्तित्वासम्भवात् अहमात्मत्वन्त्वमात्मत्वमिदमात्मत्वमित्यादिव्यवहारसम्भवात् आत्मत्वन्न सम्भवति। अतएव ब्रह्मत्वमप्यनुपपन्नमिति वेदितव्यम् । जीवस्य आत्मनः ब्रह्मसाधर्म्यात् ब्रह्मत्वमुपपन्नमितरेषाम् पुत्रादीनान्तदसाधर्म्यात् तदनुपपन्नम् "नजीवाम्रियते" इत्यादि "स वा एष महानज आत्माऽजरोऽमरोऽमृतोऽभयोब्रह्म" इत्यादिजीवब्रह्मसारूप्यश्रवणम् "ततोन्यदार्त्तम्" इत्यादि । तदितरस्य प्रपञ्चस्य ब्रह्मवैरूप्यश्रवणमिति वेद्यम् । सूत्रकारश्च स्वरूपविस्मृतिम् संसृतिमवादीत्। संसारिणञ्च जीवमवादीत् । तस्मादुपपन्नमत्र आत्मनः शब्दस्य जीवस्येतिव्याख्यानमितिवेदितव्यम् । ननु जीव इतिब्रह्मेतिच प्रविभक्तत्वात् "यथा सुदीप्तात्पावकात् विस्फुलिंगाः सहस्रशः प्रभवन्तः स्वरूपास्तथाऽक्षराद्विविधाः सौम्यभावाः प्रजायन्ते तत्र चैवापियन्ति" इतिजीवानामुत्पत्तिप्रलयश्रवणाच्च जोवस्य विकारोपपत्तिः "अशब्दमस्पर्शमरूपमव्ययम्" इत्यादिश्रवणात् । ब्रह्मणश्च अविकारोपपत्तिः ततोऽनुपपन्नन्तयोः सारूप्यमितिचेन्न "अन्तवन्त इमे देहा नित्यस्योक्ताः शरीरिणः। अनाशिनोऽप्रमेयस्य तस्माद्युद्ध्यस्व भारत" इत्यादिस्मरणात् जन्ममरणादिविकारित्वम् न जीवस्य वास्तविकम् । किन्त्वौपाधिकम् देहगतन्तत्रोपचरितमितिभावः । न चास्य प्रविभागः स्वतोऽत्र-

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

कल्पते "एकोदेवःसर्व्वभूतेषु गूढ़ः सर्व्वव्यापी सर्व्वभूतान्तरात्मा" इतिश्रुतेः। बुद्ध्याद्युपाधिनिमित्तास्य प्रविभागप्रतीतिः सूर्य्यस्येव जलपात्रोपाधिनिमित्ता "यथैकमाकाशगमर्कबिम्बं शुद्धेषु पात्रेषु जलान्वितेषु। भजत्यनेकप्रतिबिम्बभागन्तथात्वमन्तः करणेषु देव" इत्यादिस्मृतेः। यथा वृक्ष इत्येकत्वम् शाखा इत्यनेकत्वम् यथाच समुद्र इत्येकत्वम् फेनबुद्बुदतरंगा इत्यनेकत्वम् एवं ब्रह्म इत्येकत्वम् देवगन्धर्व्वमनुष्यादिजीवा इत्यनेकत्वम् तस्मात् वस्तुतः शाखानाम्वृक्षरूपत्ववत् फेनबुद्बुदतरङ्गाणां समुद्ररूपत्ववच्च देवादिजीवानाम्ब्रह्मत्वमितिवेद्यम्। ततोऽनुपपन्नम्प्रविभागनिमित्तम्वैरूप्यम् जीवब्रह्मणोरितिवेदितव्यम्। एवमेकरूपत्वज्ञानेन मोक्षव्यवहारः सेत्स्यति। नानात्वज्ञानेन कर्मकाण्डीयौ लौकिकवैदिकव्यवहारौ सेत्स्येते। इत्यपि वेदितव्यम्। वास्तविकवैरूप्यस्वीकारे मुक्तिर्न संत्स्यति। ततोमोक्षशास्त्रवैयर्थ्योपत्तिर्भविष्यति।तस्मात्स्वीकार्य्यमेवावास्तविकम्वैरूप्यमिति। अवास्तविकवैरूप्ये तु बन्धः सेत्स्यति बन्धस्य मिथ्यात्वात् ज्ञानबाध्यत्वादिति तस्करदृष्टान्तेन अनृताभिसन्धस्य बन्धनं सत्याभिसन्धस्य मोक्ष इति वेदितव्यम्।सकलव्यवहाराणां लौकिकवैदिकानाम्प्राग्ब्रह्मजीवैकरूपत्वज्ञानात् सत्यतोपपत्तेः स्वप्नव्यवहारस्येव प्राग्वोधात् अवास्तविकवैरूप्यनिमित्तम् बन्धनमुपपन्नमितिवेद्यम्। यावद्धि न एकरूपत्वप्रतिपत्तिस्तावत् कर्तृत्वभोक्तृत्वादिमिथ्यावस्तुषु मिथ्याबुद्धिर्न कस्यचिदुत्पद्यते।अहम्ममेतिभ्रान्त्या आत्माऽऽत्मीयभावेन सर्व्वोजनः संश्लिष्यते विस्मृत्य स्वरूपम्। तस्मात्प्रागात्मैक्यबोधात् सकललोकवेदव्यवहाररूपबन्धनमुपपन्नम्वेद्यम। नहि स्वप्नदृक् स्वाप्नम्विषयमनृतं जानाति तथा अविद्यादृक् आविद्यकं संसारबन्धनमितिवेद्यम्। अत्र भवति शंकोत्थानम् यदि वैदिकव्यवहारोऽप्यनृतोऽभ्युपगतः तर्हि कारणगुणः कार्य्यमनुगच्छति इतिस्वीकारात् अनृतमहावाक्येन यातः मोक्षोऽप्यनृतः स्यात्। यथा अनृतस्य नटमायाकल्पितस्य आम्रस्य मुद्राद्रव्यस्य च फलादनं दैन्यमार्ज्जनं च न दृश्यते। तद्वत्। तत्रोच्यते अनृतकारणेनापि रज्जुसर्प्पेण अज्ञानास्थितेन शङ्काविषादादिनिमित्ताभीतिकम्पादिसत्कार्य्यमुपपद्यते। तद्वत् स्वप्नस्त्रीसङ्गेन वीर्य्यच्युतिश्च दृश्यते। तद्वत् तथाशास्त्रम् असत्येन स्वप्नदर्शनेन सत्यम्फलं समृद्धिरूपं मरणरूपञ्च दर्शयति। तद्यथा "यदा कर्म्मसु काम्येषु स्त्रियं स्वप्नेषु पश्यति। समृद्धि तत्र जानीयात् तस्मिन् स्वप्ननिदर्शने" "अथ यः स्वप्ने पुरुषङ्कृष्णं

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

कृष्णदन्तम्पश्यति स एनं हन्ति" इत्यादि लोकेऽपि सुस्वप्नदुःस्वप्नप्रसिद्धेःसाध्वसाधुफलहेतुत्वात्। यद्वा वस्तुतःमोक्षापि ब्रह्मरूपस्य जीवस्य दिग्भ्रान्तिवत् अनृतानर्थस्थानकर्त्तृत्वाद्यवृत्तिरूपः विस्मृतकण्ठस्थचामीकरस्य स्मरणात् प्राप्तिरिव नित्यप्राप्तस्यात्मनः अविद्यया विस्मृतस्य विद्यया प्राप्तिः अतोऽयम् अनृत इत्युपपन्नम्। तथा स्मर्यते च "बद्धोमुक्तइतिव्याख्या गुणता मे न वस्तुतः। गुणस्य मायामूलत्वान्न मे मोक्षो न बन्धनम्" इति। अविद्यानिवृत्तिफलत्वात् सन् मोक्षोभिधेयः स्यात् अविद्याया अतात्त्विकत्वात् तन्निवृत्तेरपि अतात्त्विकत्वात् असन्नपि वाच्यः स्यादितिवेदितव्यम्। ननु तत्त्वमस्यादिवाक्येषुअविद्याशबलितस्य अल्पज्ञत्वादिविशेषविशिष्टस्य जीवस्य मायाशबलितब्रह्मणा सर्वज्ञत्वादिविशेषणविशिष्टेन ईश्वरेण सामानाधिकरण्यम्प्रतीयते तर्हि कथमत्र जीवस्य निर्म्मायम्ब्रह्मरूपमिति प्रतिजानाति श्रीमान्सूत्रकारः। अत्रोच्यते तत्त्वमादिपदार्थयोः जीवेश्वरयोः सामानाधिकरण्यम्प्रतीयमानमपि प्रकारान्तरेणाघटमानम्ब्रह्मण्येव निर्विशेषे पर्य्यवसानङ्गमयतीतिवेदितव्यम्। तथाहि न तावद्वैश्वदेव्यामिक्षेतिवदुभयोरेकार्थाभिधानेन सामानाधिकरण्यम्। यथोक्तम् "आमिक्षां देवतायुक्तांम्वदत्येवैष तद्धितः। आमिक्षापदसान्निध्यात् तस्यैव विषयार्पणम्" इति। विश्वेदेवाःदेवतायस्याः सा वैश्वदेवीति देवतार्थे विहित एव तद्धितोऽण्प्रत्ययः सामान्यतः ऋगादिवाचकत्वसम्भवेपि आमिक्षापदसान्निध्यात् आमिक्षामेव वदति। अतःतस्यैव तत्तद्धितकर्त्तृकाविषयार्पणम् आमिक्षारूपविषयबोधनमित्यर्थः। चातुर्मास्यान्तर्गतवैश्वदेवप्रकरणस्था "तप्ते पयसि दध्यानयति सावैश्वदेव्यामिक्षा वाजिभ्योवाजिनम्"इतिश्रुतेः। अस्यार्थः तप्ते दुग्धे दधिमिश्रणे कृते यत्कठिनं द्रव्यं सम्पद्यते तदामिक्षापदवाच्यम्। तेन विश्वेदेवदेवताकोयागो-विधेयः। यद्द्रवद्द्रव्यन्तद्वाजिनम् तेन च वाजिदेवदेवताको यागोविधेय इति। कुतः अपरोक्षत्वपरोक्षत्वादिसम्बन्धिभिन्नार्थत्वात्। नचाजहत्स्वार्थया निरूढलक्षणया विशेषणविशेष्यभावेन नीलमुत्पलमितिवत्। यथोक्तम् "स्वबुद्ध्या रज्यते येन विशेष्यन्तद्विशेषणम्" इत्यादिनीलमुत्पलमित्यत्र यत नीलादिना स्वबुद्ध्या स्वाकारज्ञानेन विशेष्यमुत्पलादि रज्यते भास्यते इतरस्माद्व्यावर्त्यते तद्विशेषणमित्यर्थः। कुतः विरुद्धार्थत्वेन तदयोगात्। नच जहत्स्वार्थत्वेन सम्बन्धिलक्षणया-कुसुमितद्रुमा गङ्गेतिवत्। कुतः एकार्थत्वस्य विवक्षितत्वात्

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

अतोजहदजहत्स्वार्थलक्षणया भागत्यागलक्षणयेतियावत् । सोऽयन्देवदत्तइतिवत् । विरुद्धांशत्यागेन अनुगतचिदंशेन एकार्थेन सामानाधिकरण्येन निर्विशेषे अद्वितीये ब्रह्मणि पर्य्यवसानम् । अस्थूलादिवाक्यानान्तु साक्षादुपाधिनिषेधेन तत्पदार्थशोधन उपयोगात् । निर्गुणब्रह्मण्येव पर्य्यवसानम् वेदितव्यम् । श्रुतीनाम् ब्रह्मणि पर्य्यवसानम् स्मारयति "द्युपतय एव तेन यजुरन्तमनन्ततया त्वमपि यदन्तराण्डनिचया ननु सावरणाः ख इव रजान्सि वान्ति वयसा सह यच्छ्रुतयस्त्वयि हि फलन्त्यतन्निरसनेन भवन्निधनाः" एतावता ग्रन्थसदर्भेण सिद्धम् जीवस्य ब्रह्मरूपत्वम् । सूत्रकारसूत्रितमितिविदितव्यम् । ननु "निष्कलं निष्क्रियं शान्तं निरवद्यं निरञ्जनम्" इत्यादिश्रुत्या ब्रह्मणः अकर्त्तृत्वम्व्यपदिश्यते । "एष हि द्रष्टा श्रोता मन्ता बोद्धा कर्त्ता विज्ञानात्मा पुरुषः" इत्यादिश्रुत्या जीवस्य कर्त्तृत्वञ्च । तर्हि कथं तयोर्वैरूप्यसम्भावनायामेकरूपत्वम् भवेदितिप्रश्नेऽग्रे प्रतिवचनम् । उपाधिधर्म्माध्यासेन जीवस्य कर्त्तृत्वम् व्यपदिश्यते । न स्वाभाविकम् तथा च श्रुतिः "ध्यायतीव लेलायतीव" अस्यां श्रुतौ इवशब्दः तस्य वास्तवीं ध्यानादि क्रियान्निवारयति । उपाधिधर्म्माध्यासमावेदयतीतिवेदितव्यम् । "आत्मेन्द्रियमनोयुक्तम्भोक्तेत्याहुर्मनीषिणः" इत्यादिस्मृतिरपि उपाधिसम्पन्नस्यैव शारीरस्य जीवस्य भोक्तृत्वसंसूचितकर्त्तृत्वविशेषलाभं स्मारयति । तथा च श्रुतिः "यत्र हि द्वैतमिव भवति तदितर इतरम्पश्यति" इति संसारदशायां कर्त्तृत्वं श्रावयति । "यत्र त्वस्य सर्व्वमात्मैवाभूत् तत्केन कम्पश्येत्" इत्यादिश्रुतिः मुक्तिदशायान्तु कर्त्तृत्वं निवारयत्येव । एवमुक्तप्रकारेण जलस्य शैत्यवज्जीवस्य नैसर्गिकं कर्त्तृत्वं न सम्भवति । किन्तु यथालोके कीनाशः कुद्दालादिकृषिसाधनहस्तः कर्त्ता व्यापृतोदुःखमनुभवति । स एव स्वावसथस्थः विमुक्तकुद्दालादिसाधनः विकरण इतियावत् स्वस्थोऽव्यापृतो सुखमनुभवति । एवमाविद्यकद्वैतभावापन्नोजीवः स्वप्नजागरितावस्थयोः कर्त्ता दुःखमनुभवति । स एव तच्छ्रमापनोदनाय स्वरूपं परम्ब्रह्म सम्पद्य विमुक्तशरीरेन्द्रियादिकार्य्यकरणसमुदायः सम्प्रसादावस्थायाम् सुषुप्तावितियावत् सुखमनुभवति । तथा मुक्तिदशायामपि अविद्यान्धस्तमसम्विद्याप्रदीपेन प्रविलाप्य स्वयमेव केवलो निर्व्यापारोविकरणः सुखमनुभवतीतिवेदितव्यम् । यथा कुद्दालादिकरणापेक्षः व्यापारी कीनाशः कर्त्ता भवति । स्वतः शरीरेणेतियावत्

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

अकर्त्तैव भवति। एवमयञ्जीवः मन आदिकरणापेक्षः व्यापारी कर्त्ता भवति। स्वतः स्वरूपेणेतियावत् अकर्त्तैवभवतीतिवेदितव्यम्। एवं जीवस्याविद्यककर्तृत्वस्वीकारात् यजेत् जुहुयात् दद्यादित्यादिविधिस्विधिशास्त्रं मा हिंस्यात् ब्राह्मणो मांसं न भुञ्जीत इत्यादिविविधं निषेधशास्त्रं च अर्थवद्भवति। अन्यान्यपि विहारोपदेशादीनि वाक्यानि अर्थवन्ति भवन्तीतिवेदितव्यम्। अकर्त्रात्मसाङ्ख्यमतखण्डनं च सिद्धम्। स्वाभाविकाकर्तृत्वाभ्युपगमाच्च तत्सत्यमितिमीमांसकादिपक्षनिरासः। कर्तृत्वाद्यनिर्मुक्तस्य जलस्येव शैत्यात् जीवस्य निर्मोक्षप्रसङ्गनिरासश्चेतिवेदितव्यम्। भवति च पुनः शङ्कोत्थानम् जीवोब्रह्मणः अंशोभवितुमर्हति "पादोऽस्य सर्व्वाभूतानि त्रिपादस्यामृतन्दिवि" इतिश्रुतेः। अत्र श्रुतौ भूतशब्देन जीवप्रधानानि चराचराणि व्यपदिश्यन्ते "मा हिंस्यात्सर्व्वाभूतानि" अत्र श्रुतौ तदर्थकभूतशब्दप्रयोगदर्शनात् पादशब्देन अंशोनिर्दिश्यते। अंशोपादोभाग इत्यर्थान्तरम्। तथा स्मर्य्यतेऽपि "ममैवांशोजीवलोके जीवभूतः सनातनः" इति। तथासति अग्नेर्यथा विस्फुलिङ्गेन सह भेदो दृश्यते। तथा ब्रह्मणो जीवेन सह भेद उपपद्यते न तयोरेकरूपत्वं सम्भवतीति। तत्रोच्यते जीवस्यानंशत्वमपि अभेदाभिधायिन्यः श्रुतयः प्रतिपादयन्ति "तत्सृष्ट्वा तदेवानुप्राविशत्" "मृत्योः स मृत्युमाप्नोति य इह नानेव पश्यति" "नान्योतोऽस्ति द्रष्टा" इत्येवं जातीयका एवमुभयत्र श्रुतिदर्शनादुपस्थितम्महदासमञ्जस्यम्। ननु स्यादेतद्यदि उभावपि भेदाभेदौ प्रतिपिपादयिषितौ स्याताम्। परन्त्वत्र जीवब्रह्मणोरभेद एव प्रतिपिपादयिषितः। सत्येकरूपत्वे विनिर्मुक्तिसिद्धे घटाकाशादिवत् औपाधिकभेदोंऽशित्वमितियावत् वेदितव्यः। सहस्रशः ब्रह्मणोनिरवयवत्वे श्रुतिस्मृतिभ्यां निर्दिष्टे सति न ब्रह्मणोऽंशो जीवः सम्भवति। तत एकमेव परब्रह्म सर्व्वभूतान्तरात्मरूपम जीवभावेनावस्थितमितिवेद्यम्। तथा भवति च शास्त्रम् "एकोदेवः सर्व्वभूतेषु गूढः सर्व्वव्यापी सर्व्वभूतान्तरात्मा" इति। तस्मादुपपन्नब्रह्मजीवयोरेकरूपत्वम् पारमार्थिकम् अंशांशिभावस्तु घटाकाशमठाकाशयोरिवौपाधिकः अपारमार्थिक इतिवेदितव्यम्। एवं नियम्यनियामकादिभावा अपि अविद्यानिबन्धना एव वेदितव्याः। यतः प्रत्यगात्मा श्रुतिस्मृतिप्रसिद्ध एक एव भवति। न द्वौ प्रत्यगात्मानौ सम्भवतः। एकस्यैव तस्य तु नियम्यनियामकादिभेदव्यवहारः औपाधिकोमन्तव्यः। यथा एकस्यैवाकाशस्य घटाकाशोमहाकाश इतिभेदव्यपदेशः अघटि-

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

तद्घटनापटीयस्या मायाया ऐश्वर्यवत्या अनुभावेनासम्भाव्यमपि सम्भाव्यम्भवतीतिवेदितव्यम् ।१।४।१।

ब्रह्मज्ञानादेव मोक्षप्रसिद्धेःतज्ज्ञानाय यत्नोविधेय इतिसूत्रयति श्रीमान् सूत्रकारोऽग्रिमसूत्रेण–

यतितव्यन्तद्विज्ञाने १।४।२

तद्विज्ञाने तस्य पूर्व्वनिर्द्दिष्टस्य ब्रह्मणोविज्ञाने सम्यग्बोधे यतितव्यम् यत्नोविधेयः। अत्र तेनैवामृतत्वनिष्पत्तेरितियोज्यम्। तद्विज्ञानेनैव मोक्षसिद्धेरित्यर्थः।तथाच श्रूयते"ज्ञात्वा तम्मृत्युमत्येति नान्यः पन्था विमुक्तये" "आत्मावा रे द्रष्टव्यः श्रोतव्योमन्तव्योनिदिध्यासितव्यः सोऽन्वेष्टव्यः सविजिज्ञासितव्यः" इत्यादि। स्मर्यतेच "आदौ स्ववर्णाश्रमवर्णिताःक्रियाः कृत्वासमासादितशुद्धमानसः। समाप्य तत्पूर्व्वमुपात्तसाधनः समाश्रयेत्सद्गुरुमात्मलब्धये। अज्ञानमेवास्य हि मूलकारणं तद्धानमेवात्र विधौ विधीयते। विद्यैव तन्नाशविधौ पटीयसी" "पाकस्य वह्निवज्ज्ञानम्बिना मोक्षोन सिध्यति" इत्यादि। यद्यपि भाट्टैकदेशिनः प्राभाकराश्च फलेच्छाम्बिना कृतं नित्यनैमित्तिककर्म्मैव मुक्तिसाधनं मन्यन्ते। अपरे भर्त्तृप्रपञ्चभास्करप्रभृतयः कर्म्म च प्राणाद्युपासनञ्च मिलितं मुक्तिसाधनम्प्रवदन्ति। उक्तैकदेशिनस्तु ज्ञानकर्म्मसमुच्चयञ्च मुक्तिसाधनम्वर्णयन्ति। परन्तु एते आचार्याः स्वाभिमतिभिरेव वेदार्थं कल्पयन्ते। न तु तत्त्वविद्वेदितमार्गेण "ज्ञानादेव तु कैवल्यम्"इत्यादिश्रवणात् "न कर्म्म तज्जं सविरोधमीरितम्"इत्यादि स्मरणाच्चातान् पक्षान् सहसा नानुमन्ये।किन्तु ज्ञानसाधनतया कर्म्मण उपासनायाश्च परम्परामोक्षसाधनतामभ्युपैमि विद्याकर्म्मणोऽवान्तर फलश्रवणान्न साक्षान्मोक्षहेतुत्वमितिनिश्चिनोमि च। श्रुतिश्च"कर्म्मणा पितृलोको विद्यया देवलोकः" इत्येवंजातीयका कर्म्मणा पितृलोकप्राप्तिं विद्यया उपासनयेतियावत् देवलोकप्राप्तिं श्रावयति। स्मृतयश्च "कषायपक्तिः कर्म्माणि" "तेषां सततयुक्तानां भजतांप्रीतिपूर्व्वकम्। ददामिबुद्धियोगन्तं येन मामुपयान्ति ते। तेषामेवानुकम्पार्थमहमज्ञानजं तमः। नाशयाम्यात्मभावस्थो ज्ञानदीपेन भास्वता" इत्येवंरूपास्तयोः रागद्वेषादिसंस्काररूपहृद्गतमलनाशनरूपमेव फलंव्यपदिशन्ति। अपिच यज्ञेन दानेनेत्याद्युपक्रम्य विविदिषन्ति इत्युपसंहृताश्रुतिः कर्म्मफलं विविदिषां व्यपदिशति। विविदिषालक्षितस्वेदनम् ज्ञानमि-

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

तियावत् तत्फलम्व्यञ्जयति। एवमुक्तप्रकारेण न कर्म्मणा नत्रोपासनया मुक्तिसिद्धिरितिसिद्धम्। ततोनोपासनाकर्म्मसमुच्चयेनापि मोक्षनिष्पत्तिरितिवेदितव्यम्। नक्षत्राणां सूर्यचन्द्रातिरिक्तग्रहाणाञ्च पार्थक्येन तमोनाशनाशक्तौ तेषां समुच्चयेनापि तमोनाशनाशक्तिवत् कर्म्मण उपासनायाश्च पार्थक्येन संसारनिवारणाशक्तौ तयोः समुच्चयेनापि संसारनिवारणाशक्त्युपपत्तिरितिवेदितव्यम्। यद्यपि "संहतिःकार्य्यसाधिका" इतिस्मृतेरेकतृणेन शशकवन्धनाशक्तेनापि संहतिगतेन गजवन्धनदर्शनात् कर्म्मण उपासनायाश्च पार्थक्येन संसारनिवारणाशक्तावपि तयोः समुच्चयेन संसारनिवारणाशक्तिरूपपद्यत इतिचेन्न,लोके घटादिभावपदार्थः प्रहारादिक्रियाविनाश्योदृश्यते। अतो ज्ञानं सत्यमनारोपितम् भावपदार्थं न व्यपनुदति। तथा क्रिया मिथ्याभूतमारोपितम् रज्जुसर्पादिभावम् न नाशयति। यतोलोके मिथ्याभूतम्वस्तु शुक्तिरजताद्यधिष्ठानज्ञाननाश्यं दृश्यते। अमुना प्रकारेण वस्तुस्वभावभेदे सिद्धे सति श्रुतिस्मृतिप्रसिद्धोज्ञानविनाश्योनिश्चितोऽध्याससिद्धः संसारः तदपहतये कर्म्मोपासनासमुच्चयः संहतिगतोपि न समर्थ इतिवेदितव्यम्। तस्मात् ज्ञानादेव मुक्तिसिद्धिरितिसिद्धम्। न कर्मादितस्तत्सिद्धिरिति च। नहि लोके शशकवधूः सिंहपोतप्रसवित्री दृश्यते स्वभावः कारणम्परमितिभावः। नच ज्ञानकर्म्मणोः समुच्चयेनापि मुक्तिजननयोग्यता सम्भाव्यते। उभयोर्विरुद्धाधिकारिकत्वात्। तथाच स्मर्य्यते "देहाभिमानादभिवर्द्धते क्रिया विद्यागताहंकृतितः प्रसिद्ध्यति" इति धनवान् समर्थः त्रैवर्णिकः पण्डितोहम् इत्याद्यभिमानी कर्म्माधिकारी उच्यते कर्म्मशास्त्रे। रागादिहीनः वशीकृतवाह्याभ्यन्तरेन्द्रियःसंन्यासी देहधारणातिरिक्तव्यापारनिवृत्तिशीलः ज्ञानाधिकार उच्यते ज्ञानशास्त्रे। इत्थं भेदे जाग्रति सति ज्ञानकर्म्मसमुच्चयं मुक्तिसाधनं वक्तुमिच्छन्नसौ समुच्चयवादी हेमन्तशिशिरयोः शीतभीतः सन् युगपदेव आतपम्व्यजनञ्चोभयं सहद्वयं समाश्रयेत्। सहसमाश्रयं कुर्य्यादितिभावः। तथा असम्भवसम्भावना सम्भाव्येत। एतावता उक्तम्भवति कर्म्मानपेक्षं स्वतन्त्रं ज्ञानं मुक्तिसाधनमिति तथाच स्मर्य्यते "ननु स्वतन्त्रा ध्रुवकार्य्यकारिणी विद्या न किञ्चिन्मनसाप्यपेक्षते" अत्र स्मृतौ विद्यापदवाच्यं ज्ञानम्वेदितव्यम्। किञ्चित्पदेन कर्म्मादितत्समुच्चयं च निर्दिशति। मनसापदेन मानसक्रिया प्रधानमुपासनं लक्षयतीतिवेदितव्यम्। भवति च पुनः शंकोत्थानम्।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

"सा कस्मिन् परमप्रेमरूपा" "यल्लब्ध्वा पुमान् सिद्धोभवत्यमृतोभवति तृप्तोभवति" इतिनारदसूत्रद्वयात् भगवत्परमप्रेमरूपभक्तेरेव मुक्तिसाधनत्वाभ्युपगमात् कथं ज्ञानादेवेतिश्रुतिरर्थवती स्यात् । तत्रोच्यते भजसेवायामितिधातोरर्थानुगमात् सेवापदवाच्या उपपद्यते । सा हि सकर्म्मकधातुसिद्धा कर्त्तृकर्म्मापेक्षणी भवितव्या ततोहि कर्त्तृत्वकर्म्मत्वरूपवस्तुद्वयावगाहित्वात् द्वैतभावावलम्बिनी भवति । सति द्वैतभावे भयम्भवति । "द्वैताद्धि भयम्भवति" मृत्योः स मृत्युमाप्नोति य इह नानेव पश्यति" इत्यादिश्रवणात् । ततोभक्तिर्न साक्षान्निर्वाणफलप्रदा किन्तु ज्ञानसाधनतया पारम्पर्य्येण परमपुरुषार्थप्रदायिनीतिवेदितव्यम् । तथासूत्रितं श्रीमता पतञ्जलिना "समाधिसिद्धिरीश्वरप्रणिधानात्"इति । अत्रेश्वरप्रणिधानं सर्व्वक्रियाणाम्परमगुरावर्पणम् तत्फलसन्न्यासोवा इत्येवंलक्षणेन पतञ्जलिसूत्रभाष्ये श्रीमान् वादरायणिराचार्य्य ईश्वरप्रणिधानपदवाच्याम्भक्तिं लक्षयति । लक्षयति च भक्तिं श्रीमान् देवर्षिर्नारदो निजभक्तिसूत्रग्रन्थे तृतीयानुवाके एकोनत्रिंशत्तमसूत्रेण "तदर्पिताखिलाचारता तद्विस्मरणे परमव्याकुलता" इति । अतः सिद्धमीश्वरप्रणिधानम् भक्तिपदवाच्यम् सर्व्वक्रियाणाम्परमगुरावर्पणम् इतियोगसूत्रीयभाष्योक्तेः । तदर्पिता खिलाचारता इतिनारदसूत्रोक्तेश्च ईश्वरप्रणिधानभक्त्योरेकार्थत्वप्रतिपादकलक्षणाभ्यामेकत्वसिद्धिरितिवेदितव्यम् । ईश्वरप्रणिधानभक्तिशब्दौ पर्य्यायावितियावत् । अतः सिद्धमीश्वरप्रणिधानवत ईश्वरार्पितसर्व्वभावस्य भक्तस्य समाधिसिद्धिरिति । यया सर्व्वमीप्सितमवितथञ्जानाति देशान्तरे देहान्तरे कालान्तरे च । ततोस्य प्रज्ञा यथाभूतं जानाति । एतावता भक्तेर्ज्ञानसिद्धिरित्युपपद्यते । तथाच योगसूत्रम् । "ऋतम्भरा तत्र प्रज्ञा" इति । तथैव निर्दिशति श्रीमान् भगवान् करुणापूरितहृदयः "भक्त्या मामभिजानाति यावान् यश्चास्मि तत्त्वतः । ततो मां तत्त्वतोज्ञात्वा विशते तदनन्तरम्" इति । परन्तु "यल्लब्ध्वा पुमान् सिद्धोभवत्यमृतोभवति तृप्तोभवति" अत्र "कर्म्मणैव हि संसिद्धिमास्थिता जनकादयः" अत्र च नारदसूत्रभगवद्वाक्ययोः सिद्धसंसिद्धिशब्दाभ्याम् ज्ञानप्राप्तिरभिधीयते "न कर्म्मणा न प्रजया धनेन त्यागेनैकेनामृतत्वमानशुः" इत्यादिश्रुतेः ज्ञानमात्रादेव मोक्षजनकत्वश्रावणात् । सिद्धोभवत्यनेन ज्ञानी भवतीत्यभिप्रायोवेदितव्यः । ततश्च युक्तमेव अमृतोभवति मुक्तोभवतीत्यर्थः ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

तृप्तोब्रह्मसुखस्पर्शात् स्वयमानन्दरूपोभवति । ततोविषयसुखवितृष्णो भवतीत्यर्थः । तथा च स्मर्य्यते "यं लब्ध्वा चापरं लाभं मन्यते नाधिकं ततः, "प्रशान्तमनसं ह्येनं योगिनं सुखमुत्तमम् । उपैति शान्तरजसं ब्रह्मभूतमकल्मषम्" इत्यादि । तथाश्रूयते च "रसं ह्येवायं लब्ध्वानन्दीभवति" इति । यत्तु तपस्विभ्योधिकोयोगी ज्ञानिभ्योपि मतोऽधिकः कर्म्मिभ्यश्चाधिकोयोगी तस्माद्योगी भवार्ज्जुन।योगिनामपि सर्वेषां मद्गतेनान्तरात्मना । श्रद्धावान्भजते योमां स मेयुक्ततमोमतः" अत्रभगवद्वाक्यात् भक्तेः सर्व्वोत्कृष्टत्वं गम्यते । ज्ञानिभ्यश्च योग्यधिकोमन्यते । योगिभ्यश्च भक्तोऽधिकोमन्यते ततोहि ज्ञानाच्छ्रेष्ठतरा भक्तिरित्यवगम्यते । तत्रोच्यते अत्र योगिशब्देन विराड्ढिरण्यगर्भेश्वराद्युपासकोऽभिधीयते नच शुद्धसमाधिनिष्ठ इतिवेदितव्यम् । ज्ञानिशब्देन मीमांसकादिशास्त्रविदभिगम्यते नतु ब्रह्मज्ञानीतिवेदितव्यम् । अन्यथा भगवद्वाक्यात् भगवद्विरोधापत्तिः प्रसज्येत । "नहि ज्ञानेन सदृशं पवित्रमिह विद्यते । तत्स्वयं योग संसिद्धः कालेनात्मनि विन्दति" इति । अत्र ज्ञानस्य सर्व्वसाधनापेक्षया पवित्रतमत्वद्योतनात् योगेन साधनरूपेण साध्यरूपस्य ज्ञानस्य च औत्कृष्टयव्यञ्जनाच्च पूर्व्वोक्तवाक्यस्वारस्यवैपरीत्यादित्यर्थः । अत्र भजत इति क्रियालक्षितोभक्तोब्रह्मविदेव वेदितव्यः । न तु सगुणोपासक इति विज्ञेयः । योगिनामितिश्लोकोवक्ष्यमाणप्रकारेण व्याख्येयोभवति "सर्व्वं खल्विदम्ब्रह्म" 'सर्व्वं ह्येतद्ब्रह्म' "ब्रह्मैवेदं सर्व्वम्" इत्यादिश्रुतिशतैः "सोऽहम् स च त्वम् स च सर्व्वमेतत् भूतानि विष्णुर्भुवनानि विष्णुः" "वासुदेवः सर्व्वमिति" इत्यादिस्मृतिसहस्रैश्च रज्ज्वारोपितभुजङ्गवत् ब्रह्मण्यारोपितं सकलञ्जगज्जालमेतत् रज्ज्वधिष्ठानवस्तुस्वरूपवत् ब्रह्माधिष्ठानवस्तुस्वरूपमित्यर्थेऽवधारिते सति सर्व्वस्य ब्रह्ममात्रस्य श्रद्धावान्, श्रद्धा नाम विपरीतभावनाव्युदासेन उक्तार्थानुसार्य्यद्वयब्रह्मनिष्ठचित्तवृत्तिविशेषः ब्रह्माद्वैतप्रतीतिरित्यर्थः । तद्वानेव सन्नितियावत् । योमुमुक्षुर्ब्रह्मज्ञानी मद्गतेन दृष्टं श्रुतं स्पृष्टं मतं विज्ञातं बाह्यान्तरेन्द्रियवृत्तिगोचरमितियावत् सर्व्वं वस्तुजातं ब्रह्मैवेतिविपरीतभावनाव्युदासेन श्रुतिस्मृतियुक्तिनिर्धारितेऽर्थे अद्वैतैकरसे सच्चिदानन्दात्मनि मयि ब्रह्मणि गतेन बहिरन्तस्सर्व्वत्र मत्सत्तानुवर्तिनेतिभावः । अन्तरात्मना चित्तेन यद्वा "यो वेद निहितं गुहायां परमे व्योमन्" "आत्मानमन्विच्छ गुहां प्रविष्टम्" इत्यादिश्रुतिभिःब्रह्मण

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

उपलब्ध्यर्थोऽन्तर्हृदीशोऽभिधीयते । ईश्वरस्तत्रान्तःकरणे निचाय्यः श्रूयते यथा शालग्रामशिलायां हरिः तत्रास्य बुद्धिर्विज्ञानं ग्राहकम्भवति । सर्व्वगतोपीश्वरः तत्रोपलभ्यते । ततः मद्गतेन अहम्ब्रह्मास्मि सोहम् इत्येवंरूपेण ब्रह्मनिष्ठेन अहङ्कारेण यथा स्मर्य्यते " यथा जलस्थ आभासः स्थलस्थेनावदृश्यते। स्वाभासेन तथा सूर्य्योंजलस्थेन दिविस्थितः। एवं त्रिवृदहङ्कारोभूतेन्द्रियमनोमयैः। स्वाभासैर्लक्षितो येन सदाभासेन सत्यदृक् " इत्यादि । मां ब्रह्मात्मानं भजते। सर्व्वमिदमहञ्च ब्रह्मैवेति स्वञ्च जगच्च सर्व्वं ब्रह्मैव पश्यति मामेव परमात्मानं सर्व्वात्मना योनुसन्दधाति इत्यर्थः । योगिनां सगुणोपासकानां सर्वेषामपि अत्र पञ्चम्यर्थे षष्ठो वेदितव्या योगिभ्यः सर्व्वेभ्योपीत्यर्थः । स एव युक्ततमः श्रेष्ठः यतः तेषां सगुणोपासकानां क्रममुक्तिः श्रूयते अद्वैतनिष्ठानां सद्योमुक्तिश्च "स तेजसि सूर्य्ये सम्पन्नः" "स सामभिरून्नीयते ब्रह्मलोकम्" इत्येवंजातीयका क्रममुक्तिप्रतिपादिका श्रुतिर्वेदितव्या "विमुक्तश्च विमुच्यते " इत्येवं जातीयका च सद्योमुक्तिप्रकाशिका श्रुतिरवगम्या । उपासकाश्च अविद्यापटलव्यवहित दृष्ट्या उपास्योपासकादिभेदमालम्ब्य विराडाद्युपासते अद्वैतनिष्ठास्तु श्रवणमननादिजन्यविद्याप्रदीपनिर्धूतद्वैतभ्रमपटलाः सर्व्वत्र स्वेषु परेषु च ब्रह्मैव पश्यन्ति । एतद्व्याख्यानं भगवदुक्तयुक्ततमत्वप्रतिपादकं वेद्यम् । ननु भजनक्रियावान् नैतादृशोज्ञानी भवितुमर्हति क्रियाज्ञानयोस्तमःप्रकाशयोरिव विरोधसत्त्वात् । तत्रोच्यते भक्तिर्द्विविधा द्वैतावलम्बिनी अद्वैतावलम्बिनी च । यथा स्मर्य्यते "श्रवणं कीर्त्तनं विष्णोः स्मरणम्पादसेवनम् । अर्च्चनं वन्दनं दास्यं सख्यमात्मनिवेदनम्" इति । अत्र श्रवणादारभ्य सख्यपर्य्यन्ता अष्टविधा द्वैतावलम्बिनी भक्तिः । चरमा आत्मनिवेदनरूपा अहङ्काररहिता नास्मि न मे नाहमित्येवमध्यवसायरूपा अद्वैतावलम्बिना भक्तिर्वेदितव्या । अमुमात्मनिवेदनकर्त्तारम् भक्तं ज्ञानित्वात् स्वात्मत्वेन स्वस्मादभिन्नत्वेनेतियावत् निर्दिशति "चतुर्व्विधा भजन्ते माम्" इत्युपक्रम्य "ज्ञानी त्वात्मैव मे मतम् " इत्युपसंहृतवाक्यैः अत एवम्भूतोऽद्वैतावलम्बिनीपदवाच्यभक्तिनिष्ठो ज्ञानीत्येव वेदितव्यम् । द्वैतावलम्बिन्या एव भक्तेश्चरमपरिणामरूपत्वात् अद्वैतावलम्बिनीस्थितिरपि भक्तिपदवाच्यैव भवतीत्यवधेयम् । वस्तुतः या भक्तेः परा काष्ठा सा ज्ञानसारूप्याज्ज्ञानमेवेतिवेदितव्यम् । तथा चस्मृतिः "भक्तिर्ज्ञानाय

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

कल्पते" अपिच "सर्व्वभूतस्थितं यो मां भजत्येकत्वमास्थितः। सर्व्वथा वर्त्तमानोपि स योगी मयि वर्त्तते" अत्राप्येकत्वमास्थितो मयि वर्त्तत एतच्छब्दाभ्यां भक्तस्याद्वैतावलम्बनत्वब्रह्मनिष्ठत्वे व्यज्येते। अपिच "बहूनांजन्मनामन्ते ज्ञानवान्मां प्रपद्यते। वासुदेवः सर्व्वमिति स महात्मा सुदुर्ल्लभः"। अत्र ज्ञानिशब्देन ग्रन्थस्वरसात् पूर्व्वनिरूक्तलक्षणो भक्त एवावधेयो न च वेदान्तसाधनसम्पन्नः श्रवणादिनिष्ठोज्ञानीतिवेदितव्यम्। एतावताऽक्तम्भवति या भक्तेः पराकाष्ठा सा ज्ञानमेवेति। भवत्यत्र पुनः शङ्कावसरः। श्रीमान् भगवान् वासुदेवः यतोगीताशास्त्रे स्वभजनशीलम्भक्तमुत्कृष्टतमम्व्यपदिशति। तस्मात्सगुणोपासक एव भगवदुक्त्या सर्व्वश्रेष्ट इति कथं न स्यात्। ततो द्वैतावलम्बिन्येव भक्तिर्ज्ञानाद्गरीयसी साक्षान्मुक्तिद्वारकपाटोद्घाटिनीति च कथं न स्यात्। तत्रोच्यते नात्र भगवतः स्वस्य सगुणत्वविवक्षा किन्तु नैर्गुण्यविवक्षैव यतोऽपदिश्यते स्ववाक्यैरेव तस्य निर्गुणस्वरूपत्वम् "अव्यक्तं व्यक्तिमापन्नं मन्यन्ते मामबुद्धयः" "यस्मात् क्षरमतीतोहमक्षरादपि चोत्तमः। अतोस्मि लोके वेदे च प्रथितः पुरुषोत्तमः" "त्रिभिर्गुणमयैर्भावैरेभिः सर्व्वमिदं जगत्। मोहितं नाभिजानाति मामेभ्यः "परमव्ययम्" इत्यादिभिः। एवम् "अनिच्छतोपि मे भक्तिर्गतिमग्वीम्प्रयच्छति" इयं स्मृतिरपि निष्कामभक्तस्य विषयवितृष्णस्य लब्धब्रह्मसंस्पर्शस्य ज्ञानिरूपत्वेन मुक्तिं स्वीकुर्वाणा अर्थवती भवतीतिवेदितव्यम्। यद्यप्यस्मिन् प्रकरणस्थले काशीमरणान्मुक्तिरित्यादीनि ज्ञानसाधनत्वेन व्याख्येयानि स्थलानि दृष्टिगोचराणि वर्त्तन्ते। तथापि ग्रन्थविस्तारभिया तान्यनवेक्ष्य कर्म्मादिप्रसङ्गेन। संक्षेपेणैवोक्तमितिवेदितव्यम्। अपिच "विस्मृत्या संसृतिं व्रजेत्" इत्यादिस्मृतिव्यपदेशानुसारिणा श्रीमता सूत्रकारेण स्वरूपविस्मृतिः ब्रह्मविस्मरणमितियावत् संसृतिरभिहिता। तस्मात् तद्विज्ञानेनैव सोहमस्मीतिसंस्मृतात्मस्वरूपः पुरुषो मुक्तो भवितुर्महतीति युक्तम्। विज्ञानस्यैव मुक्तिसाधनत्वम् न कर्म्मादिसाधनानामितिवेदितव्यम्। दृश्यतेऽपि कर्म्मिणाम् नहुषादीनां स्वर्गच्युतिः उपासकानां जयविजयादीनां वैकुण्ठच्युतिः भक्तस्य च भीष्मस्य शरशय्यागतस्य उत्तरायणकालप्रतीक्षणम्। ध्वन्यते च ततः अर्चिरादिमार्गेण स्वर्गगमनम् क्रममुक्तिर्वा। अत्र विज्ञानशब्दः विशेषेणज्ञानवाचकः अध्यारोपापवादनिरूपिताद्वितीयप्रत्यगभिन्नब्रह्मसाक्षात्कार

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

इति भावः शास्त्रीयज्ञानव्यावर्त्तकःआनुभविकज्ञानद्योतक इति वेदितव्यम् । यद्वा परोक्षज्ञानव्यावर्त्तकः अपरोक्षज्ञानद्योतकोवेदितव्यः । ब्रह्मास्ति इति परोक्षज्ञानम् ब्रह्मास्मि इत्यपरोक्षज्ञानम् वेदितव्यम् । तत्र परोक्षज्ञानमपरोक्षज्ञानम् विज्ञानमिति यावत् जनयतीतिवेदितव्यम्। तथास्मर्य्यते"वाक्यमप्रतिबद्धं सत् प्राक् परोक्षावभासिते। करामलकवद्बोधमपरोक्षम्प्रसूयते" इति गुरुमुखाल्लब्धम् तत्त्वमस्यादिशब्दजन्यं शाब्दमितियावत् परोक्षम्ब्रह्मविज्ञानम्बुद्धिपूर्व्वकृतम् समस्तम्पापं वह्निवद्दहति। तथा गुरुमुखाल्लब्धम् शाब्दमपरोक्षम्ब्रह्मविज्ञानम् संशयविपर्य्ययरहितम् मध्याह्नकालीनसूर्य्य इव बाह्यतमसः अज्ञानतमसोनिवर्त्तकमत एव मोक्षजनकमितिवेदितव्यम्। यथास्मर्य्यते च "परोक्षम्ब्रह्मविज्ञानं शाब्दं देशिकपूर्व्वकम् । बुद्धिपूर्व्वकृतम्पापं कृत्स्नं दहति वह्निवत्। अपरोक्षात्मविज्ञानम् शाब्दं देशिकपूर्व्वकम् । संसारकारणाज्ञानतमसश्चण्डभास्करः"इति। ननु यथा न शतसहस्रवारमपि पौनःपुन्यपुरस्सरं रविरिति रविरित्युच्चरितेन तमोहानिरूपपद्यते तथैव अहम्ब्रह्मास्मि अहम्ब्रह्मास्मीत्यसकृदभ्यसनेन शाब्दज्ञानेन नाज्ञानतमोहानिरितिचेन्न, शाब्दमपि अखण्डाकारवृत्यात्मकम् यतः स्वयम्प्रकाशमित्यपरोक्षात्मवस्तुविषयम् ततःस्वस्यापरोक्षताम् न जहाति नापरोक्षविषयज्ञानं परोक्षमितियुज्यते । सतिच अपरोक्षात्मलाभे अध्यासनिवृत्तिरूपा संसृतिनिवृत्तिरुपपन्नैव भवति। यथा दशाज्ञजनानाम् कश्चिद्गणःकान्तारमतिक्रम्य स्वातिरिक्तगणितेन दशमोकान्तारे व्यापादित इति रुदन् तत्र हेत्वभिज्ञेन अन्यपथिकेन प्रेरित एकः पूर्व्वं नवगणनानन्तरमेव दशमस्त्वमिति वचनं निपुणं निशम्य स्वं दशमं विस्मृतं साक्षात्कृतमेव कण्ठगतचामीकरवत् साक्षात्कृत्य परोक्षतामत्येत्य न रोदिति स्म । किन्तु आनन्दीभवति स्म। विचार्य्यतामत्र दशमानभिज्ञस्य या शोकनिवृत्तिः आनन्दप्राप्तिश्च सा न दशमप्राप्तिनिबन्धना किन्तु मोहविस्मृतदशमस्वात्मनः पथिकोक्तिदशमस्त्वमितिशब्दजन्यदशमस्वात्मबोधनिबन्धना । तस्मादुपपन्नमपरोक्षशाब्दबोधेन प्रपञ्चप्रशमनम् । व्याख्यानञ्चयुक्तमनवद्यम् । १।४।२।

एवं श्रीमान्सूत्रकारः ब्रह्मविज्ञानाय यत्नोविधेय इति प्रतिपाद्य तत्प्रकारम्प्रदर्शयत्यग्रिमसूत्रेण ॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

तत्साधनम् योगसाङ्ख्यम् १।४।३॥

तस्य पूर्व्वनिर्द्दिष्टस्य विज्ञानस्य साधनम्। साधयति सम्पादयतीति साधनम् निर्वर्त्तनमितिभावः "निर्वर्त्तनोपकरणानुव्रज्यासु च साधनम्" इति कोशात् अर्थनिष्पादनमितियावत् तत्साधनम् ब्रह्मविज्ञानरूपार्थनिष्पादनम् योगसाङ्ख्यं योगश्च साङ्ख्यञ्च योगसाङ्ख्यम्अत्रसमाहारद्वन्द्वम् वेदितव्यम्। तत्र योगस्य ज्ञानसाधनत्वङ्गम्यते भगवद्वाक्यात् "नहि ज्ञानेन सदृशम्पवित्रमिह विद्यते। तत्स्वयं योगसंसिद्धःकालेनात्मनि विन्दति" इति। तथाश्रीमान्पतञ्जलिरपि योगाचार्य्यःज्ञानयोगयोः साध्यसाधनभावम् दर्शयति योगानुशासनसूत्रेण "योगाङ्गानुष्ठानादशुद्धिक्षये ज्ञानदीप्तिराविवेकख्यातेः" इति योगाङ्गानुष्ठानमशुद्धेर्वियोगकारणम् यथा परशुच्छेद्यस्य यथा.यथा अशुद्धिः क्षीयते तथा तथा क्षयक्रमानुरोधिनी ज्ञानदीप्तिर्विवर्द्धते ज्ञानदीप्तिनिष्पत्तौ विवेकख्यातिराप्यत इतिभावः। अन्यत्रापि योगशास्त्रे "अथ तत्त्वदर्शनाभ्युपायोयोगः" इति वाक्यात् दर्शनाभ्युपायत्वेन ब्रह्मज्ञानसाधनत्वेनेतिभावः योगः समधिगतः एवं योगस्य ज्ञानसाधनत्वसिद्धौ साङ्ख्यस्यापि तत्साधनत्वम् सिद्धमेवेतिवेद्यम्। अनयोःसमानफलवत्त्वस्मरणात् "एकमप्यास्थितः सम्यगुभयोर्विन्दते फलम्" इत्यादि। यतः कर्म्मणश्चापि फलानपेक्षस्य निष्कामस्येतियावत् चित्तशुद्धिद्वारा ज्ञाननिमित्तीभूतत्वात् पुरुषार्थसाधनत्वं स्मर्य्यते "कर्म्मजम्बुद्धियुक्ता हि फलं त्यक्त्वा मनीषिणः। जन्मबन्धविनिर्मुक्ताः पदं गच्छन्त्यनामयम्" इति। ततस्तस्यापि विज्ञानसाधनत्वेनात्रनिर्द्देशः कथन्न स्यात्। तत्रोच्यते कर्म्मणश्चित्तशोधनद्वारा ज्ञानम्प्रति परम्परासाधनत्वम् न साक्षात्साधनत्वम्वेदितव्यम्। योगसाङ्ख्ययोस्तु तत्प्रति साक्षात्साधनत्वम् प्रसिद्धम्। तथात्र व्याख्यातमपि स्पष्टम् स्मर्य्यते पि कर्म्मणोयोगादवरत्वम् "कर्म्मिभ्यश्चाधिकोयोगी तस्माद्योगी भवाऽर्ज्जुन" इति भगवद्वाक्यात्। एवमुपासनापि योगवैरूप्येण स्वीकृता चेत् कर्म्मसादृश्येन चित्तशुद्धिद्वारा विज्ञानम्प्रतिपरम्परासाधनमितिवेदितव्यम्। योगसारूप्यस्वीकारात्त योग व्यपदेशेनैव योगपदवाच्या उपासनापि व्यपदिष्टैवेति अलमत्रसूत्रे विज्ञानसाधनत्वेन उपासनाशब्दव्यपदेशः तस्मान्नात्र उपासनाशब्दो व्यपदिष्टः श्रीमता सूत्रकारेण। व्यज्यते च उपासनायोगयोः सारूप्यम् "उदरमुपासते य ऋषिवर्त्मसु कूर्पदृशः परिसरपद्धतिं हृदयमारुणयो-

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

दहरम्। तत् उद्गादनन्त तव धामशिरःपरमम् पुनरिह यत्समेत्य न पतन्ति कृतान्तमुखे"इति स्मरणात्। अत्र स्मृतौ मूलाधारादारभ्य हृदयमवलम्ब्य आशिरसः उपासनावचनात्"हृदयेऽनाहतन्नाम चतुर्थम्पङ्कजम्भवेत्" इत्यादिशतशः योगग्रन्थे योगिना तत्र तत्र चक्रे ध्यानस्मरणात् उपासनायोगयोरेकत्वम् व्यक्तीभवति "उदरम्ब्रह्मेतिशार्कराक्षा उपासते हृदयम्ब्रह्मेत्यारुणयो ब्रह्मा हैवैता इत ऊर्ध्वं त्वेवोदसर्प्पत्तच्छिरोऽश्रयत" इत्याद्याःश्रुतयोपि प्रकृतम्पोषयन्तीतिवेदितव्यम् । एवं लोकेऽपि द्विजानाम् सन्ध्योपासकानां मूलाधारे हृदये शिरसि च विधिविष्णुरुद्राणाम् प्राणायामत्रयेण गायत्रीमन्त्रगर्भिणी उपासना विधीयते प्राणायामश्च योगाङ्गम्प्रसिद्धम् अतोपि सिद्धम् उपासनाया योगपदवाच्यत्वमिति "एवं तत्त्वाभ्यासान्नास्मि नमे नाहमित्यपरिशेषादविपर्य्ययाद्विशुद्धङ्केवलमुत्पद्यते ज्ञानम्" इत्यादिस्मृतिरपि साङ्ख्यं ज्ञानसाधनत्वेन निर्द्दिशति "तत्कारणं साङ्ख्ययोगाभिपन्नम्" "ज्ञात्वा देवं मुच्यते सर्व्वपाशैः" इत्यादिश्रुतिरपि साङ्ख्ययोगयोः ज्ञानसाधनत्वन्दर्शयति । ननु द्वैतिनोहि ते साङ्ख्या योगाश्च नानात्वदर्शिनः कथमद्वैतज्ञानसाधका इति । तत्रोच्यते यत्तूक्तम् "तत्कारणं साङ्ख्ययोगाभिपन्नमिति""साङ्ख्ययोगौ पृथक् वालाः प्रवदन्ति न पण्डिताः" इति च। तत्र ज्ञानं ध्यानञ्च साङ्ख्ययोगशब्दाभ्यामुच्यते। अत्र वैदिकमेव ज्ञानं ध्यानञ्च स्वीक्रियते इष्टमेव तयोः स्वीकरणम् सावकाशत्वमितिभावः येन येन अंशेन साङ्ख्ययोगयोर्वेदेनाविरोधः तेन तेन निर्गुणात्मसम्पादकत्वमितिपर्य्यवसितोर्थः ॥ १ । ४ । ३ ।

इति परमपूज्यपादश्रीमद्योगदत्तशर्म्मकृतामृतोपदेशे पूज्यपादश्रीमद्योगदत्तशर्म्मशिष्यश्रीमत्सत्यनारायणशर्म्मकृतभाष्ये प्रथमाध्यायस्य चतुर्थः पादः समाप्तः । प्रथमाध्यायश्च समाप्तः ॥ १ ॥

श्रीमान् सूत्रकारः नानापुराणनिगमागमार्णवमवगाह्य योगरत्नमन्विष्याऽभिगम्य च करुणापूरितहृदयः अपारपारावारनिमग्नान् समाश्रितान् मुमुक्षून् शिष्यानुद्धर्त्तुकामः साधारणजनीन् हठयोगादिप्रसिद्धपद्धतिमपहाय विरलविमलजनावगतसुदुर्ल्लभसुकरराजयोगसरणिमनुसृत्य साधनसोपानसम्वलितम् सिद्धिस्थितिसङ्कलितञ्च तमुपदिशति । तत्र राजयोग इतिनामैव योगानां राजा राजयोग इति व्युत्पत्त्या राजयोगस्य हठयोगादिभ्य औत्कृष्ट्यं गमयति "राजयोगस्य माहात्म्यं कोवाजा-

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

नाति तत्त्वतः।ज्ञानं मुक्तिः स्थितिः सिद्धिर्गुरुवाक्येन लभ्यते" इत्यादि योगशास्त्रवाक्यम् प्रकृतम्पोषयतीतिवेदितव्यम्। योगस्य सर्व्वसाधनापेक्षया श्रेष्ठत्वमुच्यते योगबीजे "नानामार्गैः सुदुष्प्रापम् कैवल्यम्परमम्पदम्। सिद्धिमार्गेण लभते नान्यथा शिवभाषितम्"इति। अत्रसिद्धि मार्गो योगोवेदितव्यः। श्रुतिस्मृतीतिहासपुराणादिषु तथाप्रसिद्धः तथाहि "अथ तद्दर्शनाभ्युपायोयोगः""अध्यात्मयोगाधिगमेन देवं मत्वा धीरोहर्षशोकौ जहाति""श्रद्धाभक्तिध्यानयोगादवेद""यदापञ्चावतिष्ठन्तं ज्ञानानि मनसा सह। बुद्धिश्च न विचेष्टेत तामाहुः परमाङ्गतिम्। तां योगमिति मन्यन्ते स्थिरामिन्द्रियधारणाम्" "अप्रमत्तस्तदा भवति" इत्याद्याः स्मृतयः"ब्रह्मणे त्वामहस ओमित्यात्मानम् युञ्जीत""त्रिरुन्नतं स्थाप्य समं शरीरम्। हृदिन्द्रियाणि मनसा सन्निवेश्य ब्रह्माह्वयेन प्रतरेत विद्वान्। श्रोतांसि सर्व्वाणि भयावहानि" "ऊमित्येवं ध्यायथ आत्मानम् " इत्याद्याः श्रुतयः। अपि च यतिधर्म्मप्रकरणे मनुः"भूतभाव्यानवेक्षेत योगेन परमात्मनः। देहद्वयस्विहायाशु मुक्तोभवति वन्धनात्" याज्ञवल्क्यस्मृतिः "इज्याचारदमोऽहिंसादानस्वाध्यकर्म्मणाम् अयं हि परमोधर्म्मोयद्योगेनात्मदर्शनम्" महर्षिमतङ्गः "अग्निष्टोमादिकान् सर्व्वान् विहाय द्विजसत्तमः। योगाभ्यासरतः शान्तः परम्ब्रह्माधिगच्छति" आदित्यपुराणे "योगात्सञ्जायतते ज्ञानम् योगो मय्येकचित्तता" स्कन्दपुराणे "आत्मज्ञानेन मुक्तिः स्यात् तच्च योगादृते नहि। स च योगश्चिरं कालमभ्यासादेव सिध्यति" कूर्म्मपुराणे "योगाग्निर्दहति क्षिप्रमशेषम्पापपञ्जरम् । प्रसन्नञ्जायते ज्ञानं ज्ञानान्निर्वाणमृच्छति" योगवाशिष्ठे "दुःसहा राम संसारविषवेगविषूचिका। योगगारूड़मन्त्रेण पावनेनोपशाम्यति" भगवद्गीतायाञ्च "जिज्ञासुरपि योगस्य शब्दब्रह्मातिवर्त्तते" इति। एतावता उक्तम्भवति योगः प्रमाणसिद्धः सर्व्वसाधनोत्कृष्टोज्ञानजनकतया मुक्तिजनकश्च इतितावद्योगम्परिचाययति द्वितीयाध्यायस्थप्रथमसूत्रेण ॥

स्वरूपपरिचयोयोगः २।१।१

"स्वरूपपरिचयः" स्वरूपस्य ब्रह्मणः परिचयः क्रमेण वोधः योगः मनः आत्मना सह युज्यते अनेनेति स योगः समाधिपदवाच्यः यथा स्मर्य्यते "सलिले सैन्धवं यद्वत्साम्यम्भजति योगतः। तथात्ममनसोरैक्यं समाधिरभिधीयते" इति। यद्वा जीवात्मा परमात्मना सह

१३

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

युज्यते अनेनेतियोगः समाधिपदवाच्यः। यथा स्मर्य्यते "तत्समञ्च द्वयोरैक्यञ्जीवात्मपरमात्मनोः। प्रणष्टसर्व्वसकल्पः समाधिरभिधीयते" यद्यपि समाधिः सार्व्वभौमश्चितधर्म्मः। चित्तभू मस्तु क्षिप्तं मूढं विक्षिप्तम् एकाग्रम् निरुद्धम् इति। तत्र क्षेपमोहविक्षेपोपसर्ज्जनीभूतः समाधिः योगपक्षे न वर्त्तते। एकाग्रे चित्ते तु योयथार्थमर्थम्प्रकाशयति क्लेशान् क्षपयति कर्म्मबन्धनानि श्लथयति निरोधयोग्य ताञ्जनयति सोऽपि समाधिर्योग इत्याख्यायते। परन्तु तत्र ज्ञातृज्ञानज्ञेयत्वरूपत्रिपुटीसद्भावात् ततः विकल्पादिसत्त्वाच्च स सम्प्रज्ञातः सविकल्पपदवाच्योभवति। सर्व्ववृत्तिनिरोधे त्वसम्प्रज्ञातसमाधिर्विकल्परहितोमुख्ययोगपक्षे वर्त्तते। तत्र निरुक्तत्रिपुटीलयात् अद्वयस्वरूपस्थितिरूपत्वात् सोऽसम्प्रज्ञातोनिर्विकल्पपदवाच्योभवतीत्यर्थः। स एवात्र स्मृतौ प्रणष्टसर्व्वसङ्कल्पनामा समाधिरभिधीयते। एतमेव श्रीमान् पतञ्जलिः "योगश्चित्तवृत्तिनिरोधः" इतिसूत्रेण लक्षयति। परन्तु श्रीमान् पूज्यपादोऽयं सूत्रकारोऽस्मिन् ग्रन्थे "स्वरूपपरिचयः" इतिसूत्रेण योगं लक्षयन् पूर्व्वोत्तरक्रमेण सम्प्रज्ञातमसम्प्रज्ञातञ्च अत्रैवान्तर्भावयतीतिवेदितव्यम्। सच पूर्व्वोत्तरक्रमः यथाशक्तिगुरूचरणारविन्दमकरन्दलिहा मयात्रविशदीक्रियते अत्र परिचयशब्दः क्रमबोधपरः यथायं देवदत्तः भारतवर्षीयइत्यवगतः ततोमैथिल इति ततोब्राह्मण इति ततः पण्डित इति ततस्तत्त्वविदिति च। यद्वा अयम्पुमान् भवदत्तपौत्रः शिवदत्तपुत्रः स्वयं देवदत्तनामेति। भवति चक्रमबोधोदाहरणम् कविमाघकृतौ "चयस्त्विषामित्यवधारितम्पुरा ततः शरीरीतिविभाविताकृतिम्। विभुर्विभक्तावयवम्पुमानिति। क्रमादमुं नारद इत्यबोधि सः" इति श्रीमान् स्वयं श्रीकृष्णचन्द्रः उत्तरगीतायाम् ब्रह्मस्वरूपम् वक्ष्यमाणश्लोकेन क्रमेण बोधयति "आत्ममन्त्रस्य हंसस्य परस्परसमन्वयात्। योगेन गतकामानाम् भावना ब्रह्म उच्यते" आत्ममन्त्रस्येत्यत्र आत्मशब्देन जीवात्माभिधीयते आत्मनः मन्त्रस्य; आत्ममन्त्रस्येतिविग्रहात् आत्मनः मन्त्रेण सह सम्बन्धदर्शनात् मन्त्रस्य तु अनन्तरोक्तहंसस्यैव दर्शनात् विसर्गान्तहंस इतिमन्त्रस्य अजपेत्यभिधानात् अजपायाश्च अजपाख्यगायत्र्या इतियावत् जीवोपस्थितिक्रियाविषयत्वात् अत्रत्यहंसस्य अजपेत्यभिधानत्वम् जीवोपस्थितिक्रियाविषयत्वञ्च "हंसौ हंसप्रकृत्याख्यौ हंपुमान् प्रकृतिस्तु सः। अजपा कथिता ताभ्यां जीवोया-

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

मुपतिष्ठते" इत्यादिस्मरणात् उपपद्यते। एतावता उक्तम्भवति जीवमन्त्रस्य हंसस्येति हंस इतिमन्त्रावयवभूतयोः पूर्व्वापरवर्णस्वरूपयोः सानुस्वारहकारसविसर्गसकारयोः परस्परसमन्वयात् "पुरूपन्त्वाश्रयं मत्वा प्रकृतिर्नित्यमात्मनः। यदा तद्भावमाप्नोति तदासोऽहमिदम्भवेत्" इतिस्मरणात् अन्योन्यस्थितिविनिमयात् सोहमित्याकारेण परिणतत्वादित्यर्थः "यदा सर्व्वे प्रमुच्यन्ते कामा येऽस्य हृदि स्थिताः अथ मर्त्योऽमृतोभवत्यत्र ब्रह्म समश्नुते" इतिश्रवणलक्षितनिष्कामानां विषयवितृष्णानामित्यर्थः। योगेन "सकारार्णं हकारार्णं लोपयित्वा प्रयत्नतः। सन्धिङ्कुर्यात्पूर्व्वरूपन्तदाऽसौ प्रणवोभवेत्" इतिस्मरणानुसारेण सन्धिकरणेन ओङ्कारस्य ओमित्यस्य च सम्मेलनेनेतियावत् परिणतप्रणवसम्बन्धिनी या भावना सा "ओमित्येकाक्षरम्ब्रह्म" इतिस्मरणात् "ओमित्येवं ध्यायथ आत्मानम्" इतिश्रवणाच्च निजविषयीभूतप्रणवात्मब्रह्माकारत्वात् ब्रह्म उच्यते "तस्य वाचकः प्रणवः" "तज्जपस्तदर्थभावनम्" इतिपातञ्जलसूत्रद्वयमपि प्रकृतम्पोषयतीतिवेदितव्यम्। एतावता उक्तम्भवति। "हम्पुमान्" इतिस्मरणात् हम्पदलक्षितोजीवात्मा पुरुषः "प्रकृतिस्तु सः" इतिस्मरणात् सःपदलक्षितास्प्रकृतिमात्मत्वेनानुसन्धत्ते। तथा च श्रुतिः "अजामेकां लोहितशुक्लकृष्णां वह्वीम्प्रजां जनयन्तीं सरूपाम्। अजोह्येकोयुषमाणोऽनुशेते जहात्येनां भुक्तभोगामजोन्यः" इत्यादि। तथास्मृतिरपि"गुणैर्विचित्ताः सृजतीम् सरूपाः! प्रकृतिम्प्रजाः विलोक्य मुमुहे सद्यःस इह ज्ञानग्रहया एवम्पराभिध्यानेन कर्त्तृत्वम्प्रकृतेः पुमान् कर्म्मसु क्रियमाणेषु गुणैरात्मनि मन्यते"इति अत्र आरम्भावस्थायां स्वरूपस्य आविद्यकावस्थितिः परिचीयत इतिवेदितव्यम्। ननु सर्व्वोपि जनः निजां सांसारिकीं दशां जानाति ततोऽलमत्र तत्परिचयेनेतिचेन्न, दृश्यते लोके सर्व्वोजनः स्वं रोगिणमवगत्य पुनः प्रतीकारेण स्वस्य रोगं निवर्त्तयति। श्रूयते वेदे "अविद्यया मृतिं तीर्त्वा" इति। असत्यां तु नाड़ीशुद्धौ अभ्यासारम्भकालिका योगाभ्यासोपक्रान्तिरूपेतिभावः। आरम्भावस्थाच वेदितव्या। न निरुक्तलक्षणेतिवेदितव्यम्। आरम्भावस्था शिवसंहितायाम् "यदा तु नाड़ीशुद्धिः स्यात् योगिनस्तत्त्वदर्शिनः। तथा विध्वस्तदोषस्य भवेदारम्भसम्भवः" इति। अभ्यासानन्तरम् सत्यान्तु नाड़ीशुद्धौ "सकारेण वहिर्याति हकारेण विशेत्पुनः। प्राणस्तत्र स एवाहम् हंस इत्यनुचिन्तयेत्" इतियोगशास्त्रव्यपदेशात् हंस इतिमन्त्राभ्यासमये

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

आरम्भघटपरिचयनिष्पत्त्यभिधानास्ववस्थासु प्रथमावस्था आरम्भाख्या निरूक्तलक्षणलक्षिता वेदितव्या। आरम्भावस्थाकालिकहंस इत्याकारसम्पत्त्यनन्तरम् सोहमित्याकारसम्पत्तौ सःपदलक्षिता प्रकृतिः हम्पदलक्षितम्पुरुषम् आत्मत्वेनानुसन्धत्ते अर्थात् बुद्धिः प्रकृतिपदवाच्या आत्मभावमाप्नोति जले सैन्धवखिल्यवत् समुद्रे सरिद्वत् नैजं रूपं सुखित्वं दुःखित्वम्मूढत्वञ्च विहाय आनन्दादिरूपेण परिणमत इत्यर्थः। तदा स्वरूपस्य "तथात्ममनसोरैक्यं समाधिरभिधीयते" इति स्मरणात् घटावस्थायां समाहितस्थितिः परिचीयत इतिवेदितव्यम्। यद्वा हंस इत्यनुचिन्तने हम्पदलक्षितोजीवात्मा पुरुषः सः पदलक्षितः प्रकृष्टा जगज्जन्मस्थितिभङ्गरूपा कृतिः कर्म्म यस्येतिप्रकृतिः "प्रकृतिश्चप्रतिज्ञादृष्टान्तानुपरोधात्" इतिव्याससूत्रव्यपदिष्टःईश्वरः तमीश्वरं आत्मत्वेनानुसन्धत्ते। स्वस्य संसारित्वं निवर्त्तयति। अत्र आरम्भावस्थायां स्वरूपस्य पारमार्थिकस्थितिः परिचीयत इतिवेदितव्यम्। तदनन्तरम् स ईश्वरः हं जीवः इत्यनुसन्धानेन पुरुषः ईश्वरस्य परोक्षत्वन्निवर्त्तयति। तदा "प्राणापानौ नादबिन्दू जीवात्मपरमात्मनोःमिलित्वा घटते यस्मात् तस्माद्वै घट उच्यते" इतियोगशास्त्रलक्षितायां घटावस्थायां समाहितस्थितिः परिचीयते। अत्र घटावस्थायां जीवात्मपरमात्ममेलनस्य घटनैव पूर्व्वसूचनामात्रमेवेतिवेदितव्यम्। अत्र स्मृतौ जीवात्मपरमात्मनोरित्यस्याग्रे ऐक्यार्थेतियोजनीयम्। अन्यथा जीवात्मपरमात्मैक्यदृढनिष्पत्तिस्वीकारे परिचयनिष्पत्त्यवस्थावैयर्थ्यं प्रसज्येत। यद्वा निरूक्तारम्भावस्थायामेव "अपाने जुह्वति प्राणं प्राणेऽपानं तथापरे" इतिभगवद्वाक्यानुसारेण पूरकरेचकयोरावर्त्तमानयोर्हंसः सोहमित्यनुलोमतः प्रत्यनुलोमतश्च अभिव्यज्यमानेन अजपामन्त्रेण तत्त्वम्पदार्थैक्यम् व्यतिहारेण साधकैर्भाव्यते। स्वरूपस्य कालान्तर्भाविनी अद्वयावस्था परिचीयत इतिवेदितव्यम्। यद्यपि अजपा विद्या नामात्ममन्त्रःसर्व्वैरेव मनुष्यै षट्शताधिकैकविंशतिसहस्रसंख्यया प्रत्यहोरात्रं जप्यते। तथापि तदभिव्यक्तिः अनुसंदधानानां साधकानामेव भवति नेतरेषामितिवैषम्यं वेदितव्यम्। सोहमित्याकारसम्पत्त्यनन्तरम् प्रणवाभिव्यक्तौ सत्यां "कूटस्थं यत्तदक्षरम्" "क्षरः सर्व्वाणि भूतानि कूटस्थोऽक्षर उच्यते" इत्यादिस्मरणात् एकाक्षरप्रणवप्रतिपादान्तर्वर्त्तिविश्ववैश्वानररूपाकारलक्षितं प्रथमं चैतन्यं, तैजसहिरण्यगर्भरूपोकारलक्षितं द्वितीयं चैतन्यं,प्राज्ञाव्याकृतरूपमकार-

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

लक्षितं तृतीयञ्चैतन्यं, शुद्धचिदद्वयार्धमात्रालक्षितं चतुर्थं चैतन्यं, "शिवं शान्तञ्च तुर्थं मन्यन्ते" इति श्रुतिलक्षितं स्वरूपं परिचीयत इति-वेदितव्यम्। अत्रापि घटावस्थैव वेदितव्या। नाग्रिमावस्था नासम्प्रज्ञातसमाधिरित्यर्थः। तथा च स्मर्य्यते "पूर्व्वं समाधेरखिलम्विचिन्तयेत्ॐकारमात्रं सचराचरञ्जगत्। तदेव वाच्यम्प्रणवो हि वाचको-विभाव्यतेऽज्ञानवशान्न बोधतः। अकारसंज्ञः पुरुषोहि विश्वकोह्युकारकस्तैजस ईर्य्यते क्रमात्। प्राज्ञोमकारः परिपठ्यते खिलैः समाधि-पूर्व्वन्नतु तत्त्वतोभवेत्। विश्वं त्वकारं पुरुषं विलापयेदुकारमध्ये बहुधा व्यवस्थितम्। ततोमकारे प्रविलाप्य तैजसं द्वितीयवर्णम्प्रणवस्य चान्तिमम्। मकारमप्यात्मनि चिद्धने परे पिलापयेत्प्राज्ञमपीह कारणम्" इति। अत्र निरूक्तस्मृतौ पूर्व्वं समाधेरखिलम्विचिन्तयेदित्यत्र समाधिशब्देन असम्प्रज्ञातसमाधिर्वेदितव्यः। असम्प्रज्ञातसमाधौ विचिन्तयेदिति क्रियानुपपत्तेश्चित्तवृत्तिनिरोधात् विश्वादिभिरित्युक्तचैतन्यैरनुक्ता वैश्वानराद्योपि चैतन्यात्मानोगृह्यन्ते। तथाश्रुतिस्मृति-प्रसिद्धेः तेषामवस्थासाहचर्य्याच्च। ननु हंसइत्याकारसम्पत्तौ तद्रूपेण तदभिव्यक्तावित्यर्थः। सोहमित्याकारसम्पत्तौ च प्रणवाभिव्यक्तौ च जीवात्मपरमात्मनोरैक्यव्यञ्जनात्। कथन्न तन्निष्पत्तिः कथञ्चात्र प्रणवाभिव्यक्तावपि अक्षरब्रह्मभावनावसरे ऐक्यस्य घटना सूचना-मात्रमभ्युपगम्यते। तत्रोच्यते यथा लोके कश्चित् भूमिभुजामग्रणीः शौर्य्यादिसम्पन्नोदुर्दैवयोगात् कामान्धीकृतोवेश्यादिवशीभूतोऽविदिता-दित्योदयास्तमनोविस्मृतराजकार्य्यः अनवलोकितप्रकृतिः शत्रुहृता-खिलसम्पत्तिः प्राप्तविपत्तिश्च नितरां क्लिश्यमानः पुनःप्राक्तनपुण्यपुञ्जोदये केनचिदनुस्मारितस्वरूपः राजाहं शूरोहमित्यात्मनो-राज्यं शौर्य्यञ्च अनुस्मरति। तत्र न तदानीमसौ स्वकीयराजपदभाक् भवति। किन्तु स्वस्य प्राक्तनराज्यपदमनुसन्दधानोभवति। पुनश्च कृतप्रयत्नः सञ्चितसेनादिशक्तिः शौर्य्येण कालान्तरे तत्पदमश्नुते एवमत्रापि पुरुषः अविद्यावशीकृतः विस्मृतात्मसच्चिदानन्दस्वरूपः संसारी गुरुमुखानुऽस्मारितस्वरूपः स्वस्य आनन्दादिरूपं ब्रह्माभिन्न-स्वरूपस्वाराज्यं अनुसन्धत्ते। पुनः कृताभ्यासादिप्रयत्नः प्राप्तप्राथमिकनानाभूमिकः ततः कृतात्मसाक्षात्कारः निष्पत्यवस्थायां ब्रह्मत्वमश्नुत इतिवेदितव्यम्। घटावस्थायां प्रणवाभिव्यक्तिः ततो महावाक्या-दिस्फुरणञ्च भाविजीवपरमात्मसमागममैक्यरूपं सूचयति इतिवे-

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

दितव्यम्। यथा वामाक्षिवाहूवादिस्पन्दनम् काकवचनञ्च पत्नीपति-समागमम्, तत्र तत्र देहल्यादौ स्थितम् पूर्णघटादिकेदलीपूगपुञ्जादि-सुगन्धितजलसुमनःस्रक्सुवेषभटादिपरिष्कृतराजपथादिप्रजा प्रजाधि-पसमागमं सूचयन्तीतिवेदितव्यम् । घटावस्थायामन्तर्नाड्यामपानः प्रविशति चक्राणि भिद्यन्ते। नादा आविर्भवन्ति। तथा च स्मर्य्यते योग-शास्त्रे "क्षितिं भित्वोर्ध्वगापानक्षोभिता स्याद्यदोरगी । तदा नादोत्प-त्तिरस्य जायते योगिनोहृदि। मृदङ्गनादोत्पत्तिस्तु मणिपूरभिदा भवेत्। अनाहतविभेदेन घण्टाध्वनिरुदेति च। विशुद्धचक्रभेदेन यन्त्रनादःप्रजा-यते " श्रूयते च हंसोपनिषदि "नादोदशविधोजायते चिणीतिप्रथमम् चिञ्चिणी तु द्वितीयकम् घण्टानादस्तृतीयः शंखनादश्चतुर्थः पञ्चम-स्तन्त्रीनादः षष्ठस्तालनादः सप्तमोवेणुनादः अष्टमोमृदङ्गनादः नव-मोभेरीनादः दशमोमेघनादः" इति विशुद्धचक्रे भिन्ने सति सत्यां च तत्र नादाभिव्यक्तौ परिचयावस्था वेदितव्या। यथास्मर्य्यते योगशास्त्रे "ततः परिचयावस्था योगिनोभ्यासतोभवेत् । यदा वायुश्चन्द्रसूर्यौ त्यक्त्वा तिष्ठति निश्चलः । यदा परिचितो वायुः सुषुम्ना व्योम्नि सञ्चरेत्। क्रियाशक्तिं गृहीत्वैव चक्रं भित्वा सुनिश्चितम्। यदा परि-चयावस्था भवेदभ्यासयोगतः । त्रिकूटं कर्म्मणां योगी तदा पश्यति-निश्चितम् । तृतीयायान्तु विज्ञेयोविहायोमर्द्दलध्वनिः। महाशून्यं तदा याति सर्व्वसिद्धिसमाश्रयम् । चित्तानन्दन्तदा जित्वा सहजानन्दस-म्भवः" इत्यादि । अत्र परिचयावस्थायां "चित्तानन्दन्तदा जित्वा सह-जानन्दसम्भवः " इतिस्मरणात् स्वरूपस्य नादविषयकान्तःकरणवृ-त्तिजन्यसुखमनपेक्ष्य निरस्येति वा स्वाभाविकात्मसुखावस्थितिः परि-चीयत इतिवेदितव्यम्। ननु सोहमित्याकारसम्पत्तौ जीवेन ईश्वरस्या-परोक्षत्वलाभे "प्राणापानौ" इत्युपक्रम्य "घटते यस्मात्" इत्युपसं-हृतायां घटावस्थाप्रतिपादिकायां स्मृतौ 'घटते' इतिवर्त्तमानकालिक प्रयोगदर्शनात् जीवात्मपरमात्ममेलनस्य तत्रैव दशायामुपस्थितिरुप-पद्यते । तत्कथमुच्यते तत्र तन्मेलनस्य घटनैव पूर्व्वसूचना मात्रमेवेति तत्रोच्यते "वर्त्तमानसमीप्ये लट्" इतिपाणिनेः 'घटते' इत्यत्र वर्त्तमानकालिकलटः भाविना उत्तरकालिकनिष्पत्त्यवस्थावर्त्तिना परमानन्दरूपेण जीवात्मपरमात्ममेलनेन तदैक्येनेतिभावः सम्बन्धोवेदि-तव्यः। "द्वितीयायां घटीकृत्य वायुर्भवति मध्यगः। दृढाऽऽसने भवेद्योगी ज्ञानी देवसमस्तदा । विष्णुग्रन्थेस्तदा भेदात् परमानन्दसूचकः।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

अतिशून्ये विमर्दश्च भेरीशब्दस्तदा भवेत्" अत्र स्मृतौ परमानन्दसूचक इत्यभिधानात् अस्यामवस्थायां परमानन्दरूपजीवात्मपरमात्मैक्यस्य ब्रह्मस्वरूपस्येतिभावः। सूचनामात्रत्वम्पूर्व्वनिरुक्तमुपपन्नम्भवति। घटावस्थापरिचयावस्थयोः क्रमः प्रदर्श्यते"यदा भवेद् घटावस्था पवनाभ्यासतः परा" इत्यादिस्मरणात् "ततः परिचयावस्था योगिनोभ्यासतोभवेत् " इत्यादिस्मरणाच्च। एतावता उक्तम्भवति साधकस्य सम्यगभ्यासतः अनिर्वचनीयचिरकालसम्पादितप्राक्तनेदानीन्तनपुण्यपुञ्जोदयात् मूलाधारात् निजावासात् अपानवायुः स्वभावादधोगतिकः अभ्यासादूर्ध्वगतिको भूतः उत्थितः सन् प्रसभेन कोशगतरम्भाकोमलदलनिस्सरणमिव ऊर्ध्वाभिमुखमभिसरन् चक्राणि भेदयन् प्रणवध्वनिमभिव्यञ्जयन् भीतिमधीरताञ्च जनयन् जड़तामुपरतिस्थितिमितियावत् प्रकटयन् कुम्भकनिष्पत्तिं सम्पादयन् ब्रह्मपुरिमूर्ध्नि इत्यर्थः। लीयते निर्व्यापारस्थितिं समीहते तदानीं युगपदेव प्रथमसमागमसुखं भीतिमधीतिमधीरताञ्च वनिता इव साधकबुद्धिवधूः प्रकृतिपदवाच्यास्वरूपसंस्पर्शजन्यशान्त्यादिसुखम्भीतिमधीरताञ्च गच्छति। तत्र भीतेरधीरतायाश्च हेतुः अपरिचितवस्तूपलब्धिरेव प्रायोबुद्धिस्वभावः अपरिचितवस्त्वसहिष्णुता तथा दृश्यते लोके शिशुरपरिचितजनेन लालितोऽपि रोरुयते हसति च स एव पुनःपरिचितजनाङ्क संस्थितः। तथा स्मर्य्यतेपि कपिलगीतायाम् "प्राप्तकाले च विप्रर्षे मानसम्भयमाप्नुयात्। तत्सर्व्वं कथयिष्यामि सावधानं शृणुष्व च स्त्रीणामादौ यथाभीतिः पुरुषस्यादिसङ्गमे।तथाऽऽसाञ्चित्तविक्षेपःप्राप्तानां स्वामिमन्दिरम्। पुरुषस्याल्पसङ्गेन गतायाता तु सोच्यते। लज्जाभीती यदा नष्टे तस्याः सुश्लिष्टता च सा। पुरुषन्तु वशीकृत्य गृहणी गृहमुच्यते। तदा सुलीनता प्रोक्ता सर्व्वसिद्धिविधायिनी। शरीरं भवनं यस्य हृदयं रतिमन्दिरम्। आत्मा च पुरुषः प्रोक्तो मानसं प्रकृतिस्तथा। विक्षेपता गतायाता सुश्लिष्टता सुलीनता। एवं हि प्रोच्यते सद्भिर्भूमिकानाम् चतुष्ठयम् "इति। अत्र प्रसङ्गप्राप्तं मानसभूमिकाचतुष्टयमभिहितम् वेदितव्यम्। ततः यथा यथा वायुप्रवेशात् यद्यच्चक्रं भिद्यते तथा तथा, तत्तच्चक्रे नादोभिव्यज्यते आज्ञाचक्रे भिन्ने सति सत्यां च तत्र वैणवक्वणद्वीणानादाभिव्यक्तौ निष्पत्यवस्था वेदितव्या। तथा स्मर्य्यते योगशास्त्रे "रुद्रग्रन्थिं यदा भित्वा शर्व्वपीठगतोऽनिलः। निष्पत्तौ वैणवः शब्दः क्वणद्वीणाक्वणोभवेत्। एकीभूतन्तदा

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

चित्तं राजयोगाभिधानकम्" इति। अस्यां निष्पत्त्यवस्थायां विषय विषयिणोरभेदोपचारात् चित्तचितोरैक्यमुपतिष्ठते । त्रिपुटीलयात् अन्तःकरणं ध्येयाकारेणैव परिणमत इत्यर्थः। "एकीभूतन्तदा चित्तं" इति स्मरणात् चित्तस्य आत्मना सह ऐक्यावगमात् जले सैन्धवखिल्यवत् तस्य तत्र लयादित्यर्थः। जीवस्य उपाधिभूत स्यान्तःकरणस्य लयोपपत्तौ दर्पणव्यतिरेकिमुखप्रतिबिम्बस्य मुखबि-म्बत्ववत् जीवस्य ब्रह्मत्वन्निष्पन्नं भवति स्वरूपस्य अमृतरूपा । निष्पन्नाद्वयावस्थितिः परीचीयत इतिवेदितव्यम् । तथा च स्मर्य-ते योगशास्त्रे "ततोऽभ्यासक्रमेणैव निष्पत्तिर्योगिनोभवेत् । अनादिक-र्म्मबीजानि येन तीर्त्वाऽमृतम्पिवेत्" अत्र अमृतम्पिवेदित्यभिधानेन मुक्तिरसं वेद्यम् । अनुभवेन निरतिशयसुखात्मकोभावोपर्य्यवसितो वेदितव्यः। अत्रैव अनादिकर्म्मबीजानि तीर्त्वा इत्यभिधानेन कर्म्मक्ष-यसत्वव्यञ्जनात् सुधारूपामृतपानसुखभोगानुपपत्तेः निर्विकल्पकस-माधिरूपनिर्व्यापारस्थितौ अमृतपानरूपव्यापारायोगाच्च एवमुक्त-प्रकारेण परिचयावस्थापर्य्यन्तम् चित्तवृत्तिसद्भावात् सम्प्रज्ञातयो-गोवेदितव्यः। निष्पत्यवस्थायान्तु चित्तवृत्तिलयात् असम्प्रज्ञातयोगो-वेदितव्यः । अयमेव जीवब्रह्मैक्यभावरूपश्चतुर्थयोगो राजयोगपद-वाच्यो वेदितव्यः । अत्र द्विधाभावो न भवति ऐक्यमेव विद्योतते तथा च स्मर्य्यते योगशास्त्रे "मन्त्रयोगोहठश्चैव लययोगस्तृतीयकः। चतुर्थो-राजयोगः स्यात् सद्विधा भाववर्जितः" इति । अत्रस्वरूपपरिचया त्मकोयोगः राजयोगपदवाच्यः संक्षेपेणैव व्याख्यातः ग्रन्थक्रमेण पौनः पुन्येन व्याख्यास्यत इतिवेदितव्यम् ।

तत्साधनेऽपि तच्छब्दः २।१।२।

तस्य निर्दिष्टस्य साधने तत्साधने यमनियमासनप्राणायामादि-रूपेऽपि तच्छब्दः योगशब्दः अत्र प्रयुज्यते इतियोजनीयम् यथा लोके प्राणधारणरूपजीवनसाधनेऽपि कृषिवाणिज्यादौ क्षेत्रमूलधनादौ वा जीवनशब्दः प्रयुज्यते ।

मनोदृष्टिभ्यामविमुक्तसेवनम् तच्छ्लेषः २।१।३।

मनश्च दृष्टिश्च मनोदृष्टी ताभ्याम्मनोदृष्टिभ्यां युगपदेव मनसा दृष्ट्या चेतिभावः अविमुक्तस्य भ्रूमध्यस्थानस्य सेवनम् मनोयोगिन्या

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

दृष्ट्या दर्शनमित्यर्थः।तच्छेषः तस्य योगस्य शेषः अङ्गमितियावत् "स्पर्शान् कृत्वा वहिर्वाह्यान् चक्षुश्चैवान्तरे भ्रुवोः" इत्यादि भगवद्वाक्यमुक्तमप्रमापयति चक्षुश्चैवान्तरे भ्रुवोरित्यभिधानेन भ्रूमध्यस्य दृष्ट्यावलोकनम् स्पष्टमभिधीयते। स्पर्शान् कृत्वा वहिर्वाह्यान् इत्यभिधानेन च बाह्यविषयैर्मनसः असम्बन्धो व्यज्यते। तेन च भ्रूमध्ये सम्बन्धस्तच्चिन्तनमितियावत् व्यज्यते इति वेदितव्यम्। ननु अविमुक्तशब्दो वाराणस्यामप्रसिद्धः स कथम् भ्रूमध्यस्थानेऽत्र व्यपदिश्यते। तत्रोच्यते शिवेन न विमुच्यत इति अविमुक्तप्रदेशो व्यपदिश्यते। स च प्रदेशः वाराणसीपदवाच्यो भवति। तत्र च वरणा-नासीनद्योः सङ्गमः प्रसिद्धः नासी एव क्वचित् असीशब्देन प्रसिध्यति निरुक्तधर्म्मविशिष्टः भ्रूमध्यप्रदेशो विश्रूयते आमनन्ति चैनम्परमेश्वरमस्मिन् अविमुक्ते यावालाः "एषोऽनन्तोऽव्यक्त आत्मा सोऽविमुक्ते प्रतिष्ठित इति सो ह्यविमुक्तः कस्मिन् प्रतिष्ठित इति वरणायां नास्यांच मध्ये प्रतिष्ठित इति का वै वरणा का च नासीति। तत्र चेमामेव वरणा नासीति निरुच्य सर्व्वाणीन्द्रियकृतानि पापानि वारयति सा वरणा सर्व्वाणीन्द्रियकृतानि पापानि नाशयति सा नासीति पुनरामनन्ति "कतरच्चास्य स्थानम्भवतीति भ्रुवोर्घ्राणस्य च यः सन्धिः स एष द्युलोकस्य परस्य च सन्धिर्भवति इति"। तथा स्मर्य्यतेपि "आज्ञापङ्कजदक्षांशात् वामनासापुटङ्गता। उदक्वहेति तत्रेड़ा गङ्गेतिस मुदाहृता। ततोद्वयमिहस्थाने वाराणस्यान्तु चिन्तयेत्। तदाकारा पिङ्गलापि तदाज्ञाकमलोत्तरे। दक्षनासा पुटे याति प्रोक्ता स्माभिरसीतिवै" इति भ्रूमध्यसेवनमेव खेचरी मुद्रा निरुच्यते योगशास्त्रे "भ्रुवोर्मध्ये शिवस्थानं मनस्तत्र विलीयते। ज्ञातव्यन्तत्पदन्तुर्य्यं तत्र कालो न विद्यते। अभ्यसेत्खेचरीन्तावत यावत्स्याद्योगनिद्रितः। सम्प्राप्तयोगनिद्रस्य कालोनास्ति कदाचन" इति। अस्याश्च सर्व्वमुद्राभ्य औत्कृष्ट्य स्मर्य्यते योगशास्त्रे "न खेचरी समा मुद्रा" इत्यादि। अपि चोक्तम् योगशास्त्रे "यावदीक्षेत्भ्रुवोर्मध्ये तावत्कालभयङ्कुतः" इति। अत्र अपरःप्रतिपादनीयोर्थो-भूमिकादिरूपः स्वयमेव श्रीमता सूत्रकारेण वक्ष्यतेऽतोऽत्र नाभ्यधायीतिवेदितव्यम्। २।१।३

तद्वदन्येषामपि बाह्याभ्यन्तराणाम्वा २।१।४।

तद्वत् अविमुक्तसेवनवत् अन्येषां भ्रूमध्यादितरेषां बाह्याभ्यन्तराणाम् बाह्यानां चन्द्रसूर्य्यदीनाम् आभ्यन्तराणां नाभिचक्रहृदयपुण्ड-

१४

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

रीकजिह्वाग्रादीनाम् अत्र सेवनमितियोजनोयम्। वा शब्दो वैकल्पिको वेदितव्यः। भ्रू मध्यसेवनं मुख्यविधेयम्। तदयोग्यतायाम् निरुक्तानां सेवनम् अमुख्यविधेयम्वेदितव्यम्। अन्तर्दृष्ट्या मूलाधाराद्याभ्यन्तर प्रदेशावलोकनम् वहिर्दृष्ट्या निमेषान्मेषवर्जितया वाह्यप्रदेशसम्वन्धः शाम्भवी मुद्रा वेदितव्या। तथाच स्मर्य्यते योगशास्त्रे "अन्तर्लक्ष्यविलीनचित्तपवनो योगी यदा वर्त्तते। दृष्ट्या निश्चलतारया वहिरधः पश्यन्नपश्यन्नपि। मुद्रेयं खलु शाम्भवीभवति सा लब्धाप्रसादाद्गुरोः। शून्याशून्यविलक्षणं स्फुरति तत् तत्त्वं परं शाम्भवम्। अन्तर्लक्ष्यमनन्यधीरविरतम् पश्यन्मुदासंयमी। दृष्ट्युन्मेषनिमेषवर्जितमियं मुद्रा भवेच्छाम्भवी। गुप्तेयं गिरिशेन तन्त्रविदुषा तन्त्रेषु तत्त्वार्थिनामेषा स्याद्यमिनाम्मनोलयकरी मुक्तिप्रदा दुर्ल्लभा" इत्यादि नासिकाग्रावलोकनं उन्मनीमुद्रा वेदितव्या। तथा स्मर्य्यते योगशास्त्रे "अर्धोन्मीलितलोचनः स्थिरमना नासाग्रदत्तेक्षणश्चन्द्रार्कावपि लीनतामुपनयन्निस्पन्दभावेन यः। ज्योतीरूपमशेषवीजमखिलं देदीप्यमानम्परन्तत्त्वन्तत्पदमेति वस्तु परममूवाच्यङ्किमत्राधिकम्" इत्यादि। अत्र नासाग्रेत्यभिधानात् नासिकाग्रसेवनाशक्तौ नासिकाग्राभिमुखम् द्वादशाङ्गुलपर्य्यन्ताम्वरप्रदेशः सेवनीयोवेदितव्यः। तथाहि वशिष्ठः "द्वादशागुलपर्य्यन्ते नासाग्रे विमलेऽम्बरं। सम्विद्दृशोः प्रशाम्यन्त्योः प्राणस्पन्दो निरुध्यते" इति। उक्तञ्च भगवद्गीतायाम् "सम्प्रेक्ष्य नाशिकाग्रं स्वं दिशश्चानवलोकयन्" इति। चन्द्रसूर्य्यादीनां मनोदृष्टिभ्यां सेवनात् अवान्तरफलं प्रतिपाद्यते पातञ्जलयोगशास्त्रे "चन्द्रे ताराव्यूहज्ञानम्" "भुवनज्ञानं सूर्य्ये संयमात्" इत्यादि। अत्र संयमशब्दात् ध्यानमभिधीयते ध्यानचिन्तनयोः पर्यायत्वम् शब्दशास्त्रप्रसिद्धम् चित्तमनसोरेकत्वविवक्षया निरुक्तसूत्रोक्तस्य मनोदृग्भ्यां तत्र तत्र सेवनस्य मनोव्यापाररूपत्वात् ध्यानत्वमुपपद्यते। निरुक्तसेवनस्य मुख्यफलन्तु योगनिष्पादननिमित्तीभूतमनस्स्थैर्यम्वेदितव्यम्। स्मर्यते च योगशास्त्रे "यत्र दृष्टिर्लयस्तत्र" इति एतदुक्तम्भवति दृष्टिस्थैर्यान्मनोलीयते "लयोविषयविस्मृतिः" इतियोगशास्त्रात् विषयविस्मृतिमन्मनोभवति दृश्याकारेण स्थितम् स्थिरम्भवतीत्यर्थः। यद्यपि "निरीक्षेन्निश्चलदृशा सूक्ष्मलक्ष्यं समाहितः। अश्रुसम्पातपर्यन्तमाचार्य्यैस्त्राटकं स्मृतम्" इत्यादियोगशास्त्रात् सूक्ष्मलक्ष्ये दृष्टिस्थिरीकरणम् त्राटकमभिधीयते तदेवात्र सूत्रद्वयेनापि विधीयते। तथापि नात्रत्यसूत्रनिरुक्तसाधनं त्राटकपदवाच्यं स्यात्। श्रा-

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

टके मनोयोगनियमाभावात् तादृगभ्यासासत्त्वे तादृक्फलानुपपत्तेश्च। स्मर्यतेपि त्राटकस्य निरुक्तसाधनफलात् विसदृशम्फलम् "मोचनं नेत्ररोगाणां तन्द्रादीनाङ्कपाटकम्" इत्यादियोगशास्त्रात्। ननु दृष्टिस्थिरीकरणेनैक मनःस्थिरीकरणत्वमुपपद्यते "यत्रदृष्टिर्लयस्तत्र" इतियौगिकाभिधानात्। तर्हि कथमत्र विसदृशम्फलमभ्युपगम्यते। तत्रोच्यते अश्रुसम्पातपर्य्यन्तमिति योगशास्त्रीयनियमनात् त्राटके अश्रूणां सम्यक् पतनपर्य्यन्तैव निरीक्षणस्यावधिरुच्यते। निरुक्ताविमुक्तादिसेवने तु "अभ्यसेत्खेचरीं तावत् यावत्स्यात् योगनिद्रितः" "सर्व्वदा पूजयेल्लिङ्गं दिवारात्रिनिरोधितः" इत्यादियोगशास्त्राभिधानात् दीर्घकालभाविनिद्रावधि निरवधित्वादिस्मरणात् अभ्यासवैषम्यात् फलवैषम्यमुपपन्नमितिवेदितव्यम्। "सर्व्वदा पूजयेल्लिङ्गं दिवारात्रिनिरोधितः" अत्रस्मृतौ "एतस्मादात्मन आकाशः सम्भूतः" इत्यादिश्रुतेः सर्व्वकारणमात्मा लिङ्गशब्देनाभिधीयते पूजयेत् इतिशब्देन ध्यायेदित्यर्थोवेदितव्यः। यतो ध्यानमेवात्मपूजनम्। तदुक्तं योगवाशिष्ठे "ध्यानोपहार एवात्मा ध्यानमस्य महार्चनम्। विना तेनेतरेणायमात्मा लभ्यत एवनो" इति। दिवारात्रि निरोधतः इति शब्देन सूर्य्यचन्द्रौ अर्थात् सूर्य्यचन्द्रपदवाच्येडापिङ्गलानाड्यौ निरुध्येदित्यर्थोवेदितव्यः। चन्द्रसूर्य्यसञ्चारे चन्द्रसूर्य्यनाड़ीगतवायुस्पन्दे चित्तस्थैर्य्याभावात् "चले वाते चलञ्चित्तम्" इत्युक्तत्वात् "सुषुम्नान्तर्गते वायौ मनस्थैर्य्यं प्रजायते" इत्युक्तत्वाच्च। निरोधतः अत्र ल्यब्लोपे पञ्चमी तस्यास्तसिल्। यथा अविमुक्तसेवनम् तच्छेषः योगाङ्गम् तथा अन्येषाम्बाह्याभ्यन्तराणां सेवनम् तच्छेषः तदङ्गम्वेदितव्यम्। एवमन्यत्रापि वक्ष्यमाणसाधनेषु तच्छेषत्वमूह्यम् मुमुक्षुभिः साधकैः। ननु द्वितीयाध्यायस्थ प्रथमपादस्थतृतीयचतुर्थसूत्रयोः मनोयोगिन्या दृष्ट्या निरीक्षणस्थले दर्शनावलोकनादिशब्दमनादृत्य स्पष्टं योजनया च कथं सेवनशब्दः स्वीकृतः। तत्रोच्यते यथा लोके सेवनम् कालक्रमाप्रमादगाम्भीर्य्य धैर्य प्रोत्साहानिर्व्वेदानुकूलाचरणाद्भिः फलति सेवकाय अभिमतार्थम्प्रापयति। तथेदम् मनोदृग्भ्यान्निरीक्षणमपि सेवनवत् तैरेव निरुक्तैः कालक्रमादिभिः साधकाय सिद्धिं गमयतीत्याशयेन श्रीमता सूत्रकारेणात्र दर्शनादिशब्दमनपेक्ष्य सेवनशब्दोऽपेक्षित इतिवेदितव्यम्। २।१।४

श्रीमान् सूत्रकारः दृष्टिसाधनाभ्यासमभिधाय अग्रिमसूत्रेण पवनसाधनाभ्यासं सूत्रयति ॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

प्राणापानयोरन्योन्यस्थितिविनिमये- नात्ममन्त्राभ्यासश्च २।१।५।

प्राण ऊर्ध्वगतिको वायु अपानोऽधोगतिकोवायुश्च प्राणापानौ तयोस्तथाभूतयोः अन्योन्यस्थितिविनिमयेन परस्परम् ऊर्ध्वाधोगतिरूपमर्य्यादापरिवर्त्तनेन हमितिरूपस्य श्वासात्मकस्य प्राणस्य अधोगत्या मूलाधारस्थितापाने प्रापणेन अपानस्य च प्राणवायुताड़ितस्य सविसर्गसकाररूपस्य स्वनिवासस्थानहृदयादारभ्य नासिकाग्रद्वादशाङ्गुलपर्य्यान्ताम्बरवर्त्तिनि प्राणे प्रापणेन पूरकरेचकयोरावर्त्तनेनेतियावत् आत्ममन्त्रस्य अजपाख्यगायत्र्या हंस इत्यस्येतियावत् अभ्यासः पौनःपुन्येन निरन्तरासकृदावृत्तिः। चकारः पुनरर्थकमव्ययम्। अत्र तच्छेष इतियोजनीयम्। यद्वा प्राणापानयोः हृदयगुदस्थयोः अन्योन्यस्थितिविनिमयेन परस्परं प्राणस्य अपानसंयोगेन गुदस्थितिसम्पादनेन अपानस्य च प्राणसंयोगेन हृदयस्थितिसम्पादनेन उभयोरितरेतरस्थितिपरिवर्त्तनेनेतिभावः अवशिष्टांशः पूर्व्ववद्व्याख्येयः। उक्तञ्च भगवद्गीतायाम् "अपाने जुह्वति प्राणम्प्राणेऽपानन्तथापरे" स्मृतञ्च योगशास्त्रे "सकारेण वहिर्याति हकारेण विशेत् पुनः प्राणस्तत्र स एवाहं हंस इत्यनुचिन्तयेत्" इति हंस इतिमन्त्रः पूर्व्वम्व्याख्यातःपुनरपि व्याख्येयांशे व्याख्यायते उत्तरगीतायाम् "हंसत्वम्पारदर्शनम्" इतिनिर्दिशति भगवान् श्रीकृष्णचन्द्रः। अत्र हंसत्वं हंसस्त्वपरम्वेदितव्यम् अत्रैव " हंसोहंसाक्षरश्चैतत् " इत्यभिधानात् हंसत्वं हंस इति मन्त्रधर्म्मः स्वभाव इतियावत् पारदर्शनम् संसारपारावलोकनम्। पारस्य दर्शनं येन इति पारदर्शनम्। अयमेव मन्त्रः संसारपारं दर्शयति संसारसमुद्रात्तारयतीत्यर्थोवेदितव्यः। यथा हंसः पक्षी पानीयैक्यसमापन्नम्पयो विवेचयति पानीयात्पृथक्कृत्य पिवति। तथायमपि हंसो मन्त्रः प्रकृतिसंश्लिष्टम्पुरुषम्विवेचयति ततः पृथक्कृत्य ज्ञापयति। यथा प्रणवो मन्त्रः "ॐमित्येकाक्षरम्ब्रह्म" इत्यभिधानात् ब्रह्मरूपोऽभ्युपगम्यते। तथायं हंसोमन्त्रः "प्राणस्तत्र स एवाहं हंस इत्यनुचिन्तयेत्" इत्यभिधानात् अहम्पदलक्षितोजीवरूपोवेदितव्यः। "अहम्ब्रह्मास्मि" इत्यत्र श्रुतौ अहम्पदेन जीवोलक्ष्यते स च हंस इत्यक्षरद्वितयी अक्षरद्वयरूपपक्षद्वयविशिष्टः पक्षिरूपो वेदितव्यः। तथाच स्मर्यते "हंसरूपा कामकला तत्स्वरूपं निगद्यते। हकारेण वहिर्याति सकारेण विशेत्पुनः। हकारस्य

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

सकारस्य लोपे कामकला भवेत्। पक्षद्वयेन रहितो हंसः कामकला भवेत्। सोहमेतस्य देवेशि! रूपंकामभलाभिधम्।सोहमित्यस्यदेवेशि!प्रणवः परिनिष्ठतः। जीवपक्षद्वयत्यागात् प्रणवः परिकीर्त्तितः" इति। अपिच स्मर्यते आत्मनः पक्षिरूपत्वमुत्तरगीतायाम् "यावत्पश्येत्खगाकारन्तदाकारम्विचिन्तयेत्" इति। एवं सति ब्रह्मरूपप्रणवाभिव्यक्तौ हंस इत्यस्यैव सोपानरूपेण प्रयोजकत्वमुपपद्यते। ततः पारदर्शनमित्यत्र पारावलोकनमितिव्याख्यानं युज्यते। स्मर्यते च हंसइत्यनुचिन्तयतोऽभ्यासशालिनः निरुक्तप्रकारेण संसारनिवर्त्तकज्ञानोत्पत्तिः "एवमभ्यसतः पुंसः संसारध्वान्तनाशनम्। ज्ञानमुत्पद्यते सर्व्वम् हंसक्षपणमव्ययम्" अत्र हंसक्षपणम्पदं हंसस्वरूपापहम् जीवदशानिवर्त्तकम् इतिव्याख्येयम्। व्याख्यातञ्च "हंसत्वम्पारदर्शनम्" इतिश्रीमद्भिर्गुरुवरैः उत्तरगीताव्याख्यायाम्। "तथाहि पारदर्शनम् यावत् तावद्धंसत्त्वम् नाम हंसपदाभिध्येयत्वम् शरीरविशिष्टजीवत्वमितिवेदितव्यम्। यथा यावच्छरीरित्वं शिवविद्यादीनामपि तत्सत्वात् नाम शरीरनिरूपितजीवत्वसत्वादपि नित्यशुद्धबुद्धत्वरूपात् नेश्वरत्वं हीयते। एवं जीवन्मुक्तस्यापि शरीरिणः ऐश्वर्य्यवतो नेश्वरत्वहानिरिति। अत एतदुक्तम्भवति पारदर्शनावधिकं जीवत्वम्। एतदनन्तरम् शरीरसत्तायामपि न जीवत्वम् किन्तु ब्रह्मत्वमेवेतिवेदितव्यम्। तथाच श्रूयते "ब्रह्मविद् ब्रह्मैव भवति" इति। तथा च व्याख्यातः हंसः शब्दः श्रीमद्भिर्गुरुवरैः उत्तरगीताव्याख्यायाम् "हन्ति अविद्यां हंसः हंसशब्दस्यौणादिकसप्रत्ययेन निष्पन्नत्वादिति। अभ्यासकाले प्रथमं यत्नतः श्वासप्रश्वासानुसारेण ध्वन्यात्मको हंस इति मन्त्रोजप्योऽनुचिन्तनीयोवेदितव्यः। तत्र पूरककाले पूरकारम्भकालात्प्रागित्यर्थः गुदाकुञ्चनरूपमूलबन्धोविधेयः। अपानमूर्ध्वगत्या अन्तर्नाड्याम्प्रवेशयितुम् कुण्डलनीशक्तिञ्चालयितुम् सार्धत्रिवलयाकाररूपमण्डलीभूतसर्पाकारात् ऋजूकर्त्तुम् दण्डाकारतामापादयितुमितिभावः सुप्तामुत्थापयितुमित्यर्थः। मोक्षद्वारम्विभेदयितुञ्च। तथा च स्मर्यते योगशास्त्रे "पार्ष्णिभागेन सम्पीड्य योनिमाकुंचयेद्गुदम्। अपानमूर्ध्वमाकृष्य मूलबन्धो भधीयते। अधोगतिमपानं च ऊर्ध्वगङ्कुरुते बलात्। आकुञ्चनेन तम्प्राहुर्मूलबन्धं हि योगिनः। प्राणापानौ नादबिन्दु मूलबन्धेन चैकताम्। गत्वा योगस्य संसिद्धिं यच्छतोनात्र संशयः। तेन कुण्डलनीसुप्ता निःश्वस्य ऋजुतां व्रजेत्। उद्घाटयेत्कपाटन्तु यथाकुञ्चिकयाहठात्। कुण्डलिन्या तथायोगी मोक्षद्वार-

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

न्विभेदयेत् । येन मार्गेण गन्तव्यं ब्रह्मस्थानं निरामयम् । मुखमाच्छाद्य तद्द्वारं प्रसुप्ता परमेश्वरी" इत्यादि पूरकान्ते पूरकान्तिमावयवभूतावसानकालिकस्थिताविति भावः । कण्ठसंकोचनरूपजालन्धरबन्धोविधेयः वायुप्रकोपनिवारणाय अन्तर्नाड्यतिरिक्तनाड्यन्तरे वायुगमननिरोधायेतियावत् कण्ठामयप्रणाशाय सूर्यमुखवंचनाय जठरानले पीयूषपातनिरोधात् जिह्वया तद्रसास्वादनायेतियावत् इड़ापिङ्गलानाड़ीद्वयस्तम्भनाय षोड़शाधारबन्धनाय अधोगामिनो नभसः कपालकुहरस्येतियावत् जलस्य चन्द्रच्युतामृतरसस्येतियावत् बन्धनाय सूर्याभिमुखमार्गनिरोधपूर्वकमामाशयमार्गप्रापणायेतिभावः। तथाच स्मर्यते "पूरकान्ते तु कर्त्तव्यो बन्धोजालन्धराभिधः" इतिपूरकान्ते त्वित्यत्र तुशब्दः पुनरर्थकः पूरकात्प्राक् विहितं मूलबन्धं द्योतयति। यद्वा व्यावर्त्तनार्थकः निरुक्तबन्धनव्यावर्त्तयतीतिवेदितव्यम् । जालन्धरबन्धं लक्षयति योगशास्त्रे तथाहि "कण्ठमाकुञ्च्य हृदये स्थापयेच्चिबुकं दृढ़म् । बन्धोजालन्धराख्योयञ्जरामृत्युविनाशकः । बध्नाति शिराजालमधोगामि नभोजलम् । ततोजालन्धरोबन्धः कण्ठदुःखौघनाशनः । जालन्धरे कृते बन्धे कण्ठसङ्कोचलक्षणे । नपीयूषम्पतत्यग्नौ नच वायुः प्रकुप्यति । कण्ठसङ्कोचनेनैव द्वे नाड्यौ स्तम्भयेद्दृढ़म् । मध्यचक्रमिदं ज्ञेयम् षोडशाधारबन्धनम्" इति । अत्र स्मृतौ कण्ठस्थितम्विशुद्धाख्यञ्चक्रम् मध्यचक्रम् मध्यमञ्चक्रम् तच्च षोड़शाधारबन्धनम् षोड़शाधाराणाम् बन्धनकारणम् वेदितव्यम् । षोड़शसंख्यकाः आधाराः स्मर्यन्ते योगशास्त्रे "अङ्गुष्ठगुल्फजानूरुसीवनीलिङ्गनाभयः । हृद्ग्रीवा कण्ठदेशश्च लम्बिका नासिका तथा । भ्रूमध्यञ्च ललाटञ्च मूर्धा च ब्रह्मरन्ध्रकम् । एते हि षोड़शाधाराः निरुक्ता योगिपुङ्गवैः" इति अङ्गुष्ठादि ब्रह्मरन्ध्रान्ताः षोड़शाधारा वेदितव्याः । एष्वाधारेषु धारणायाः फलविशेषः गोरक्षनाथपद्धतेरवगन्तव्यः । अत्र ग्रन्थविस्तारभिया नालेखीतिवेदितव्यम् अत्र पूरकान्ते हठयोगिभिः कुम्भकोऽनुष्ठीयते अस्माकन्तु राजयोगानुयायिनां सम्प्रदायानुसारेण "हकारेण बहिर्याति सकारेण विशेत्पुनः" इत्यादियोगशास्त्रानुमत्या च साधनकाले कुम्भको न विधीयते अभ्यासपरिपाकात् स्वयमेव कुम्भको निष्पद्यत इतिवेदितव्यम् । तथा स्मर्यते च योगवाशिष्ठे "यावदिच्छमवस्थैषा प्रणवस्यापरे क्रमे । बभूव न हठादेव हठयोगो हि दुःखदः। अथेतरे चावसरे प्रणवस्य समस्थितौ । निस्पन्दः कुम्भको नाम प्राणानामभवत्क्रमः" इति रेचकादौ

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

रेचकारम्भकावयवभूतादिमकालीनस्थितावितिभावः। उड्डीयानबन्धो विधेयः अंतर्नाड़ीनभसि प्राणविहङ्गोड्डीननिष्पत्तये सुषुमनान्तरे प्राणं गमयितुमितिभावः। जरसं निवर्त्य तारुण्यम्प्रापयितुम् स्वाभाविकमुक्तिं साधयितुंच। तथा स्मर्यते योगशास्त्रे "कुम्भकान्ते रेचकादौ कर्त्तव्यस्तूड्डिनायकः" इति। अत्र वाक्ये तु शब्दः राजयोगिनां कुम्भकान्तं व्यावर्त्तयति रेचकाद्यनुवर्त्तयतीतिवेदितव्यम्। अपि च स्मर्यते योगशास्त्रे "बद्धो येन सुषुम्नायां प्राणस्तूड्डीयते यतः। तस्मादुड्डीयनाख्योयं योगिभिःसमुदाहृतः। उड्डीनङ्कुरुते यस्मादविश्रान्तम्महाफलम्। उड्डीयानन्तदेव स्यात् तत्र बन्धोऽभिधीयते। उदरे पश्चिमं तानं नाभेरूर्ध्वं च कारयेत्। उड्डीयानो ह्यसौ बन्धो मृत्युमातङ्गकेशरी। उड्डीयानन्तु सहजङ्गुरुणा कथितं सदा। अभ्यसेत् सन्ततं यस्तु वृद्धोऽपि तरुणायते। सर्व्वेषामेव बन्धानामुत्तमोह्युड्डियानकः। उड्डीयाने दृढ़े बन्धे मुक्तिः स्वाभाविकी भवेत्" इत्यादि। गुल्फयोरधःप्रदेशरूपपार्ष्णिभागेन गुदमेढ्रयोर्मध्यभागरूपयोनिस्थानसम्पीड़नपूर्व्वकं गुदाकुंचनम्मूलबन्धो वेदितव्यः। गलपदवाच्यकण्ठाकुञ्चनपूर्व्वकं चतुरङ्गुलान्तरितहृदयसमीपे ऽधोनमनयत्नपूर्व्वकं हनुपदवाच्यचिबुकस्थापनरूपो जालन्धरबन्धो वेदितव्यः। प्रयत्नविशेषेण नाभेरूर्ध्वाधोभागप्रदेशस्य पृष्ठसंश्लेषानुरूपपश्चिमतानात्मकपृष्ठत आकर्षणमुड्डीयानबन्धो वेदितव्यः। भवति च एतद्बन्धत्रयस्य मुख्यफलम्प्राणस्य ब्रह्मनाड्याम्प्रवेशः। तथाच स्मर्य्यते योगशास्त्रे "अधस्तात् कुंचनेनाशु कण्ठसङ्कोचने कृते। मध्यपश्चिमतानेन स्यात्प्राणो ब्रह्मनाड़िगः" ननु "समकायशिरोग्रीवं धारयन्नचलं स्थिरः" इत्यादिभगवद्वाक्यात् जालन्धरबन्धो निषिध्यते। तथासति समकायत्वादिव्याहतेस्तत्रोच्यते एतद्बन्धत्रयापेक्षणं साधनदशायां ब्राह्मनाड्यां वायुप्रवेशरूपसिद्धिपर्यन्तं वेदितव्यम्। सत्याञ्च तत्र वायुप्रवेशरूपसिद्धिनिष्पत्तौ तदनपेक्षणम् युज्यते। युक्तञ्च ततः "समकायशिरोग्रीवम्" इत्यभिधानम्। दृश्यते च लोके खातनिष्पत्तिपर्य्यन्तमेव खनित्रधारणम् तन्निष्पत्तौ च तत्परित्यागः। अपिचतत्रैव भगवद्वाक्यात् "यतचित्तेन्द्रियक्रियः प्रशान्तात्मा विगतभीरित्या दिव्यपदेशात् निरुक्तसाधकस्य योगारूढ़त्वम्गम्यते। अस्य योगारूरुक्षुत्वस्वीकारे "सुषुम्नान्तर्गतेवायौ मनःस्थैर्य्यं प्रजायते" "चलेवाते चलञ्चितम्" इत्याद्युक्तत्वात् यतचित्तेन्द्रियक्रियत्वानुपपत्तेः "योगारूढ़स्य तस्यैव शमः कारणमुच्यते" इति भगवदुक्तेः "महाक्लेशादयो दोषाः क्षीयन्ते

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

मरणादयः" योगारूढत्वपक्षे इत्याद्युक्तत्वाच्च रागद्वेषादिदोषोत्पत्तिहेतुना विषयेषु समीचीनत्वासमीचीनत्वप्रीत्यप्रीतीष्टसाधनत्वानिष्टसधानत्वबुद्धीनां निवृत्तिरुपपद्यते। योगारुरुक्षुत्वपक्षे तु अन्तः करणस्य रागद्वेषादिसहितस्य रागद्वेषाद्यनुत्पत्तिरूपप्रशान्तात्मत्वानुपपत्तेः "त्यज धर्म्ममधर्म्मञ्च नैव धर्म्मी नचाधर्म्मी स्वाध्यायञ्च सर्व्वकर्म्माणि संन्यसेत् वेदानिमं लोकममुञ्च परित्यज्य आत्मानम न्विक्षेत्,, इत्यादिशास्त्रानुसारेण अन्नादानविसर्गातिरिक्तस्य दन्तधावन मुखक्षालनादेरपि सर्व्वस्य शास्त्रीयस्य लौकिकस्य कर्म्मणः परित्यागे शिष्टा निन्दिष्यन्तीतिभीतिविनिवृत्तिरूपविगतभीत्वस्य "आरुरुक्षोर्मुनेर्योगं कर्म्म कारणमुच्यते" इतिभगवद्वाक्यादनुपपत्तेः तस्माद्युक्तम् योगमारुरुक्षोः साधनकाले निरुक्तबन्धत्रयाभ्यसनम्। यद्वा "मतमत्र तु केषाञ्चित् कण्ठबन्धमृविवर्जयेत्। राजदन्तस्थजिह्वाया बन्धःशस्तोभवेदिति" इतियोगशास्त्रात् गुरुप्रसादात् राजदन्तस्थजिह्वाबन्धेऽवगते सति जालन्धरबन्धोऽनपेक्ष्यो भवति "अयं हि सर्व्वनाड़ीनामूर्ध्वं गतिनिरोधकः, इतिराजदन्तजिह्वाबन्धप्रक्रान्तयोगशास्त्रात् सुकरेण राजदन्तस्थजिह्वाबन्धेनापि "बध्नाति हि शिराजालम्" इतिजालन्धरोक्तफलसिद्धेरनुरयोगो जालन्धरबन्धस्येतिकेषाञ्चिदाचार्य्याणां मतम्वेदितव्यम्। तस्माद्युक्तम् समकायशिरोग्रीवमित्याद्यभिधानम्। कायशिरोग्रीवाणां समतया ऋजुत्वेनेतिभावः धारणेन पार्श्वयोः पश्चाच्च दृष्टुं स्प्रष्टुं च न शक्यते। ततः तत्र दर्शनस्पर्शनजनितचित्तचाञ्चल्यकृतविक्षेपो न सम्भवतीतिवेदितव्यम्। दन्तानां राजानौ राजदन्तौउपरिश्रेणिस्थमध्यवर्तिदन्तद्वयम् यथा "राजदन्तौ तु मध्यस्थावुपरिश्रेणिकौ क्वचित्" इतिहेमचन्द्रः तयोस्तिष्ठतीतिराजदन्तस्था सा चासौ जिह्वा तस्यां राजदन्तस्थजिह्वायाम् बन्धःतदुपरिभागस्य दन्तप्रदेशेन सम्बन्धः राजदन्तस्थजिह्वाबन्धो वेदितव्यः।

यद्वा "हठयोगोहि दुःखदः" इतिवशिष्ठसम्मतेः हठयोगाङ्गीभूतसंकलबन्धपरित्यागेनैव समकायत्वादिविशिष्टेन राजयोगानुयायिना साधकेन भवितव्यमितिवेदयति श्रीकृष्णचन्द्रः "समकायशिरोग्रीवम्" इत्यभिधानेनेतिव्यज्यते।

यद्यपि मूलबन्धादिसाहित्येन योगसिद्धिः द्रुतम्भवति। अन्यथा चिरेण तत्साहित्येन तदभ्यासे वैगुण्ये सति नानोपद्रवसम्भवात् तदसाहित्ये सत्यामपि चिरकालापेक्षिण्यां सिद्धिनिष्पत्तौ निरुपद्र-

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

त्वात् प्रायो योगिनां तत्र सम्मानं दृश्यते। भवति च लोकोक्तिः निरुपद्रवेण वत्सरगम्येन मार्गेण गन्तव्यम्। नच सोपद्रवेण षण्मासगम्येन मार्गेण गन्तव्यम् इति। केचित्तु योगिनः प्रकृते बन्धत्रये जालन्धरमेव विधापयन्ति तदितरावनुपयुक्तौ मन्यन्ते। अत्रेदं रहस्यं यदि श्रीगुरुमुखाज्जिह्वाबन्धःसम्यगवगतः तर्हि जिह्वाबन्धपूर्व्वकेन जालन्धरबन्धेनैव निरुक्तसिद्धिर्निष्पद्यते इतिमूलबन्धोड्डीयानबन्धावनुपयोग्यौ भवतः। तयोर्बन्धयोर्जिह्वाबन्धपूर्व्वकेन जालन्धरबन्धेनान्यथासिद्धत्वात् "जिह्वाबन्धो न विदितश्चेदधस्तात् कुञ्चनेन" इति श्लोकोक्तरीत्याऽभ्यासः कर्त्तव्यः। त्रयोपि बन्धा गुरुमुखादवगन्तव्यास्तथाच श्रूयते "आचार्य्यवान् पुरुषो वेद" इति। लोकेऽप्युच्यते गुरुहस्तेस्ति कुञ्चिकेति। मूलबन्धो हि सम्यगनवगतोऽनेकव्याधिजनको भवति। तथाहि यदि मूलबन्धाभ्यासे धातुक्षयो विष्टम्भोऽग्निमान्द्यं नादमान्द्यं गुटिकासमूहाकारमजस्येव पुरीषं स्यात् तदा मूलबन्धः सम्यगनवगत इति वेदितव्यम्। यदि धातुपुष्टिः सम्यङ्मलशुद्धिः अग्निदीप्तिः सम्यङ् नादाभिव्यक्तिश्च स्यात्तदा मूलबन्धः सम्यगवगत इतिवेदितव्यम्। असमीचीनाभ्यासजन्यमूलबन्धप्रकोपे यथाक्रमं हरीतकीसेवनीया। सितोपलशुण्ठीघृतानि समाहृत्य संमिश्रीकृत्येतिभावःवटिकाभूतमितियावत् भक्षणीयम्। तत्र घृतभागो न्यूनपरिमाणको ग्राह्यः। शुण्ठीसितोपले समभागे वेदितव्ये। मात्रा तु अग्निमान्द्याद्यनुसारेणैवोह्या। अत्र पूरकरेचकावसरे श्वासप्रश्वासानुसारेणैव यत्नविषेण जपकालस्य क्रमेण दीर्घीकरणानुकूलेनाभ्यासो विधेयः। प्रारम्भकाले योग्यतानुसारेण जपसंख्यानियमो विधेयः। यथा यथा कालपरिमाणवृद्धिः स्यात् तथा तथा संख्याह्रासो विधेयः। सति च सर्व्वसंख्याह्रासे असत्यां च कुम्भकनिष्पत्तौ पुनः संख्यानियमो विधेयः। सत्याञ्च निष्पत्तौ न तदावश्यकत्वमिति वेदितव्यम्। अभ्यासश्च प्रातःकाले मध्याह्नकाले सायङ्काले अर्द्धरात्रे चतुर्वारम्विधेयः। नित्यनैमित्तिकादिकर्म्मनिर्व्वाहो यथाकालं संक्षेपेण विधेयः। स्मर्य्यते च योगशास्त्रे "प्रातर्मध्यदिने सायमर्द्धरात्रे च कुम्भकान्। शनैरशीतिपर्य्यन्तं चतुर्वारं समभ्यसेत्" इति। अत्रस्मृतौ हठकरणात् कुम्भकशब्दाभिधानम्। अत्र तु पूरकरेचकरूपावर्त्तनात्मकोऽभ्यासो वेदितव्यः। चतुर्वाराभ्यासाशक्तौ अर्द्धरात्रं विहाय त्रिसन्ध्यमभ्यसितव्यम्। अयमेव सम्प्रदायः प्रायो योगिनां दृश्यते। अशीतिपर्य्यन्तम् प्रतिकालं संख्यानियमनम्पूर्णयोग्यतापरम् तन्न्यूनत्वे

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

तन्न्यूनत्वमवेदितव्यम् । अभ्यासकाले अस्माकं सम्प्रदाये यथासम्भवं नासाभ्यन्तरस्थायिनावेव प्राणापानौ प्रयत्नविशेषेण भवत इति वेदितव्यम् । तथाचोक्तम्भगवद्गीतायाम् "प्राणापानौ समौ कृत्वा नासाभ्यन्तरचारिणौ" इति । अयोग्यतानुरोधेन तु तदसम्भवे नासिकाग्रात् द्वादशाङ्गुलपर्य्यन्ताम्बरावधिकौ तौ विधेयौ । अभ्यासक्रमेण पूर्व्वपूर्व्वस्थितिकौ तावल्पाल्पपरिमितिस्थितिकौ विधेयाविति वेदितव्यम् । "बहिर्यद्रेचनम् वायोरुदराद्रेचकः स्मृतः" इति "बाह्यादापूरणम् वायोरुदरे पूरको हि सः" इत्युक्तलक्षणौ प्रयत्नविशेषेण बाह्यवायूपादानकोष्ठवायुनिस्सारणरूपौ पूरकरेचकौ हठयोगसम्मतावस्माकं राजयोगानुयायिनां न सम्मताविति वेदितव्यम् । क्वचित्तु "भस्त्रावल्लोहकारस्य रेचपूरौ ससम्भ्रमौ" इत्युक्तलक्षणौ तौ गौणौ वेदितव्यौ । तयोर्लक्ष्यत्वाभावात् । "युक्तं युक्तं त्यजेद्वायुं युक्तं युक्तञ्च पूरयेत्" इतियोगोक्तेः शनैः शनैःपूरकरेचकौ विधेयौ । तत्रापि योग्यतानुसारेण पूरकः वेगादपि कर्त्तव्यः वेगादपि कृते पूरके तादृक्दोषाभावात् । रेचकस्तु शनैः शनैरेव कर्त्तव्यः वेगात् कृते रेचके बलहानिप्रसङ्गात् । तथाचोच्यते योगशास्त्रे "ततः शनैः शनैरेव रेचयेन्न तु वेगतः" इति । अभ्यासारम्भे प्रयत्नविशेषेण पूरकरेचकौ विधेयौ । अभ्यासपरिपाके स्वभावतः स्वत एव प्रतिलोमविलोमतःआवर्त्त्यमानौ यथाक्रमं यथाकालं स्थास्यत इति वेदितव्यम् ।

इति परमपूज्यपादश्रीमद्योगदत्तशर्म्मकृतामृतोपदेशे पूज्यपादश्रीमद्योगदत्तशर्म्मशिष्यश्रीमत्सत्यनारायणशर्म्मकृतभाष्ये द्वितीयाध्यायस्य प्रमथः पादः समाप्तः ॥ २ ॥ १ ॥ ५ ॥

ततो हि मनसः स्थैर्य्यङ्कुम्भकनिष्पत्तिश्च ।२।२।१।

ततः पूर्व्वनिर्द्दिष्टसाधनानन्तरम्मनसः स्थैर्य्यम् चित्तस्य स्थिरता कुम्भकनिष्पत्तिः "न रेचको नैव च पूरकोऽत्र नासापुटे संस्थितमेव वायुम् । सुनिश्चलं धारयते क्रमेण कुम्भाख्यमेतत्प्रवदन्ति तज्ज्ञाः" इत्युक्तलक्षणकुम्भकाख्यप्राणायामस्य निष्पत्तिः परिपाकरूपेण चरमसम्पत्तिः निष्पन्दनामकुम्भकसिद्धिरिति वेदितव्यम् । चेति पुनरर्थक्रमव्ययम् । अत्र भवतीति योजनीयम् । निरुक्तस्थिरीकरणाभ्यासात् नाम दृष्टिस्थैर्य्याभ्यासात् पूरकरेचकरूपप्राणायामाभ्यासाच्च "यत्र दृष्टिर्लयस्तत्र" इत्युक्तत्वात् "मनोलयकरी" इत्यभिधानात् "चले वाते चलं चित्तम्

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

निश्चले निश्चलम्भवेत्" इत्यभिधानात् "हेतुद्वयन्तु चित्तस्य वासना च समीरणः। तयोर्विनष्ट एकस्मिन् तौ द्वावपिविनश्यतः" इत्यभिधानात् "द्वे वीजे राम चित्तस्य प्राणस्पन्दनवासने। एकस्मिन्श्च तयोर्नष्टे क्षिप्रं द्वे अपि नश्यतः" इति योगवाशिष्ठात् "यथा दीपो निवातस्थो नेङ्गते सोपमा स्मृता। योगिनो यतचित्तस्य युञ्जतो योगमात्मनः" इतिभगवदुक्तेश्च उपपन्नम्प्राप्तकाले मनसः स्थैर्य्यम्। अतएव "मनश्च वध्यते येन पवनस्तेन वध्यते" इत्युक्तेरूपपन्ना मनःस्थैर्य्यसमकालीना कुम्भकनिष्पत्तिरिति वेदितव्यम्। यथा कुम्भो जलेन पूर्णस्तिष्ठति तथा येन साधनेन वायुना उदरं पूर्णन्तिष्ठति तत्साधनम् कुम्भकपदवाच्यम्भवतीति वेदितव्यम्। कुम्भकः कनिष्ठमध्यमोत्तमभेदेन पृथग्लक्षणस्त्रिविधो वेदितव्यः। तथा स्मर्य्यते योगशास्त्रे "कनीयसि भवेत्स्वेदः कम्पो भवति मध्यमे। उत्तमे स्थानमाप्नोति ततो वायुं निरोधयेत्" इति। अपिच लिङ्गपुराणे "नीचो द्वादशमात्रस्तु सकृदुद्घात ईरितः। मध्यमस्तु द्विरुद्घातश्चतुर्विंशतिमात्रकः। मुख्यस्तु यस्त्रिरुद्घातः षट्त्रिंशन्मात्र उच्यते। प्रस्वेदकम्पनोत्थानजनकश्च यथाक्रमम्। आनन्दो जायते चात्र निद्रा धूमस्तथैव च। रोमाञ्चध्वनिसंविन्तिरङ्गमोटनकम्पनम्। भ्रवणस्वेदजलपाढ्यं संविन्मूर्च्छाञ्जयेत्तदा। तदोत्तम इति प्रोक्तः प्राणायामः सुशोभनः" इति। अत्र धूमपदेन चित्तान्दोलनम् वेदितव्यम्। उद्घातलक्षणन्तु योगशास्त्रे "प्राणेनोत्सर्पमाणेन अपानः पीड्यते यदा। गत्वा चोर्ध्वं निवर्त्तेत एतदुद्घातलक्षणम्" इति "अङ्गुष्ठाङ्गुलिमोक्षं त्रिस्त्रिर्जानुपरिमार्ज्जनम्। तालत्रयमपि प्राज्ञा मात्रासंज्ञाम्प्रचक्षते" इत्याह योगियाज्ञवल्क्यः। कुम्भकाख्यप्राणायाम एव अभ्यासक्रमेण वर्द्धमानः प्रत्याहारधारणाध्यानसमाधिशब्दैर्व्यपदिश्यते। तदुक्तं स्कन्दपुराणे "प्राणायामद्विषट्केन प्रत्याहार उदाहृतः। प्रत्याहारद्विषट्केन धारणा परिकीर्तिता। भवेदीश्वरसंगत्यै ध्यानं द्वादशधारणम्। ध्यानद्वादशकेनैव समाधिरभिधीयते" इति। सार्द्धपलद्वयात्मकः कालः प्राणायामकालो वेदितव्यः। षड्भिः श्वासैः एकम्पलम्भवति। अयमेव प्राणायामकालः क्रमेण उत्तरोत्तरम् द्वादशगुणितः प्रत्याहारादिकालो वेदितव्यः। एतदुक्तम्भवति पञ्चविंशतिपलात्मकः प्रत्याहारकालः। पञ्चघटिकात्मकः धारणाकालः। षष्टिघटिकात्मकाहोरात्रपरिमाणः ध्यानकालः। द्वादशाहोरात्रपरिमाणः समाधिकालो वेदितव्यः। वस्तुतस्तु यस्मिन्नेव काले अल्पपरिमाणेऽनल्पपरिमाणे वा मनसः समाहितावस्थितिसम्पत्तिः

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

स्यात् स एव कालः समाधिकालत्वेन अभ्युपगस्यते राजयोगिवर्य्यैः ॥ २ ॥ २ ॥ १ ॥

आनन्दानुभवश्च । २। २। २ ।

आनन्दस्य "यो वै भूमा तत्सुखम्" इत्युपनिषद्घुष्टस्य आनन्दस्य ब्रह्माभिन्नस्वरूपभूतसुखस्य अनुभवः उपलम्भः साक्षात्कार इत्यर्थः । चेतिपुनरर्थकमव्ययम् । तथाच स्मर्य्यते लिङ्गपुराणे "आनन्दो जायते चात्र" इति । अपिच स्मर्य्यते योगशास्त्रे "चित्तानन्दन्तदा जित्वा सहजानन्दसम्भवः" इति। अत्रायं क्रमः परिचयावस्थायां देहेषु चाग्निकलास्पर्श इव स्पर्शोऽनुभूयते । तथाच स्मर्य्यते योगशास्त्रे "अपाने ऊर्ध्वगे जाते प्रयाते वह्निमण्डलम् । तदानलशिखा दीर्घा जायते वायुनाहता। ततो यातो वह्न्यपानौ प्राणमुष्णस्वरूपकम्। तेनात्यन्तप्रदीप्तस्तु ज्वलनो देहजस्तथा" इति। परन्तु अत्रेत्यवधेयम् निरुक्तज्वलनः न दाहमुत्पादयति किन्तु सुखजनकप्रकाशमात्रमिति । अविमुक्तादिप्रदेशाच्च कश्चिदनिर्वचनीयः स्पर्शविशेषोऽभिव्यज्यमानः पादादिमस्तकपर्य्यन्तं शरीरम् व्याप्नोति। स एव ब्रह्मस्पर्शोऽभिधीयते।तथोक्तम्भगवद्गीतायाम् "युञ्जन्नेवं सदात्मानं योगी विगतकल्मषः। सुखेन ब्रह्मसंस्पर्शमत्यन्तं सुखमश्नुते" इति। तदानीं साधकः तदलौकिकानुपमेयस्पर्शरूपशान्तिसुखविरहमसहमानः न कायेन कर्त्तुं न वचसा वक्तुं न मनसा मन्तुं चोत्सहते। न कम्पकारणक्लिष्टोपि कम्पते। नच ततोधिकम् किञ्चित् सुखं मन्यते । तथाचोक्तम्भगवद्गीतायाम् "यं लब्ध्वा चापरं लाभं मन्यते नाधिकन्ततः। यस्मिन् स्थितो न दुःखेन गुरुणापि विचाल्यते" इति । अत्र आनन्दस्य अनाद्यविद्यावृतबीजरूपस्य तृणादिसंकुलभूम्यन्तराक्षिप्तशस्यबीजस्येव पूर्व्वोक्तसाधनद्वारा तृणाद्यपनयनफलकर्षणवारीसेकादिद्वारा इव अङ्कुरत्वम् शस्याङ्कुरत्वमिव वेदितव्यम्। अस्य च कालान्तरेण सम्पन्नस्य वृक्षरूपत्वं संसारनिवृत्तिफलनिष्पत्तिः शस्याङ्कुरस्य कालान्तरेण सम्पन्नस्य वृक्षत्वमिव कणिशफलनिष्पत्तिरिवेति वेदितव्यम् ॥ २ ॥ २ ॥ २ ॥

तत्सम्पत्तौ निमित्तान्तरोपस्थानं यथोपयोगम्।२।२।३।

तेषां मनः स्थैर्य्यकुम्भकनिष्पत्त्यानन्दानुभवानां पूर्व्वनिर्दिष्टानां सम्पत्तौ निष्पत्तौ मनोनिरोधयथेच्छवायुरोधप्रचयात्मकानन्दोत्पत्ति-

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

रूपाण्निमित्तान्तराणाम् अविमुक्तसेवनाद्यतिरिक्तसाधनीभूतानां हेत्वन्तराणां यथाक्रमं लब्धव्यसिद्धिसाधकानाम् उपस्थानम् उपस्थितिः यथोपयोगम् उपयुक्त्यनुसारेण यथावसरमितिभावः अत्र भवतीति योजनीयम्। इयं योगपरिपाटी यत् पूर्व्वपूर्व्वनैमित्तिकसम्पत्तौ उत्तरोत्तरं निमित्तान्तरम् भृत्यमित्रादिवदुपत्तिष्ठति। तथाच शास्त्रम् "योग एवाध्यापकः" इति। तदुपस्थापकत्वमेव तदध्यापकत्वम्वेदितव्यम्। एतावता उक्तम्भवति स्वयमेव बोद्धा पुरुषः यथावसरमुपागतंविधेयंविजानाति। तथाचोच्यते श्रीमद्भागवते "आत्मनो-गुरुरात्मैव पुरुषस्य विशेषतः"इति।श्रूयतेपि"पुरुषत्वे चाविस्तरामात्मा स हि प्रज्ञानेन सम्पन्नतमो विज्ञातं वदति। विज्ञातम्पश्यति। वेद श्वस्तनम् वेद लोकालोकौ। मर्त्येनामृतमीप्सत्येवम् सम्पन्नोऽथेतरेषाम्पशूनामशनापिपासे एवाभिविज्ञानमिति"॥ २ ॥ २ ॥ ३ ॥

गुरुशुश्रूषणादविलम्बः।२।२।४।

गुरुशुश्रूषणात् गुरोः शुश्रूषायाः लाक्षणिकत्वात् सेवाया इतिभावः अविलम्बः न विलम्बः अविलम्बः विलम्बप्रतियोगिवस्तुभूताचिरकालः। अत्र सिद्धिसम्पत्तौ भवतीति योजनीयम्। तथोक्तं योगशास्त्रे "गुरूं सन्तोष्य यत्नेन ये वै विद्यामुपासते अविलम्बेन विद्यायास्तस्मात्फलमवाप्नुयुः। गुरुप्रसादतो लोके लभते शुभमात्मनः।तस्मात्सेव्यो गुरुर्नित्यमन्यथा न शुभम्भवेत्" इति। यथा सन्निहितप्रदीपस्य घटाद्यवगमनम् द्रुतञ्जायते। सन्निहितकर्णधारस्य समुद्रतरणं द्रुतं दृश्यते। सन्निहितमार्गप्रदर्शकस्य च द्रुतगमनानुकूलङ्गन्तव्यगमनन्द्रुतन्दृश्यते। तथैव कृतगुरूपसदनस्य पुरुषस्य शुश्रूषणजातप्रसादात् गुरूपदिष्टसाधनसाध्यसिद्धिसम्पत्तिः शीघ्रम्भवतीति वेदितव्यम्। स्मर्य्यतेपि "गुरुचरणाम्बुजनिर्भरभक्तः संसारादचिराद् भव मुक्तः"इति। भवति च गुरुशब्दस्य तमस्तन्नाशकार्थकवर्णद्वयात्मकस्य अन्धकारनाशकत्वंव्युत्पन्नम्। ततश्च युक्तन्तस्य गुरोः प्रदीपसादृश्यम् "गुरुकर्णधारः" इतिस्मरणात्। युक्तञ्च कर्णधारसादृश्यम् "नान्यः पन्था विद्यतेऽयनाय" इतिश्रवणात् ज्ञानस्य मार्गत्वोपपत्तौ युक्तन्तस्य मार्गप्रदर्शकत्वम् "तद्विद्धिप्रणिपातेन परिप्रश्नेन सेवया" इतिभगवदुक्तिः प्रकृतम्पोषयतीति वेदितव्यम्। गीतञ्च स्वाराज्यसिद्धौ "चिरान्मग्नेनान्तःप्रकृतिविषमे जन्मजलधौ मया पुण्यैर्लब्धो गुरुरमृतचिन्तामणिरहो।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

यदीयाभिर्गोभिर्विशदमधुराभिर्वितिमिरे स्वसम्पूर्णे यस्मान्निरवधिसुखे धामनि रमे" इति शतसहस्रशः शास्त्रशासनैर्गुरुमहिमा प्रशस्यते इति वेदितव्यम् ॥ २ ॥ २ ॥ ४ ॥

मनोनुसरणात्तज्जयः ।२।२।५।

मनसः विमर्शकात्मकान्तःकरणस्य अनुसरणात् अनुव्रजनात् किञ्चित्तदभिलषितसम्पादनादित्यर्थः तस्य मनसो जयः वशीभावः। अत्र भवतीति योजनीयम्। तथाच स्मर्य्यते "यत्र यत्र मनो याति न निवार्य्यं ततस्ततः। अवारितं लयं याति वार्य्यमाणन्तु वर्त्तते। यथा निरङ्कुशो हस्ती कामम्प्राप्य निवर्त्तते। अवारितम्मनस्तत्र स्वयमेव विलीयते" इति। अपिच "उप्यमानम्मुहुः क्षेत्रं स्वयं निर्वीर्य्यतामियात्। न कल्पते पुनः सूत्या उप्तम्बीजञ्च नश्यति। एवं कामाशयं चित्तं कामानामतिसेवया। विरज्यते यथा राजन्नाग्निवत् कामविन्दुभिः" इति। तथासूत्रितञ्च श्रीमता पतञ्जलिना "यथाभिमतध्यानाद्वा" मनसः यदेवाभिमतन्तदेव ध्येयं स्यात्। तत्र स्थिरीभूतम्मनः अन्यत्रापि स्थिरीभूयात्। यद्यपि मनोजये तदनुसरणम् तन्निवारणञ्च साधनद्वयम् विधीयते। "चपलमपि मनो लालनैर्वा हठाद्वा" इतिस्मरणात् तथापि लालनशब्दस्य प्रथमतः पूर्व्वप्रयोगात् तस्यैव मुख्यविधेयत्वम् वेदितव्यम्। हठशब्दस्य च द्वितीयतः पश्चात् प्रयोगात् गौणविधेयत्वञ्च। अत्रेदं रहस्यं यदि मनसः वेश्यागमनमदिरापानादि अत्यन्तनिषिद्धमनर्थकारि वस्त्वभिलषितं स्यात् तदा तदनुसरणमन्तरा तन्निवारणमेव विधेयमिति वेदितव्यम्। यद्यपि "जिज्ञासुरपि योगस्य शब्दब्रह्मातिवर्त्तते' ध्यानमात्रेण योगीन्द्रो दुरितौघंविनाशयेत्' निस्त्रैगुण्ये पथि विचरतां को विधिः को निषेधः" इत्यादिवाक्यैः योगिनां निषिद्धाचरणेनापि नानर्थशंका तथापि योगिभिरपि लोकसंग्रहार्थम् विधिपरैरेव भवितव्यम् न निषेधपरैः। तथाच भगवद्वाक्यम् "लोकसंग्रहमेवापि सम्पश्यन् कर्त्तुमर्हसि""यद्यदाचरति श्रेष्ठस्तत्तदेवेतरो जनः" इति। अपिच विद्यारण्यमुनिवाक्यम् "अथवा कृतकृत्योपि लोकानुग्रहकाम्यया। शास्त्रीयेनैव मार्गेण वर्त्तेहङ्कामम्क्षतिः" सामान्यविषये मनो हठमनपेक्ष्य तदनुसरणात् लालयित्वैव वशीकर्त्तव्यम्। दृश्यतेपि लोके दुर्दमवाजिनः तदभिमतगत्यादानपूर्व्वकम् स्वाभिमतपथि चालनम् ॥ २ । २ ॥ ५ ॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

प्रणवसञ्जपनाद्विघ्ननिरासः ॥२।२।६।

प्रणवस्य ॐकारस्य सञ्जपनात् सम्यगर्थभावनापूर्व्वकम् दीर्घोच्चारणपूर्व्वकञ्च जपनात् जपकरणात् विघ्नस्य अन्तरायस्य मोहविक्षेपादेरितिभावः निरासः निरसनं विनाश इतिभावः।अत्रभवतीति योजनीयम्। तथाचोक्तं योगशास्त्रे "सन्त्यत्र बहवो विघ्ना दारुणा दुर्निवारणाः। तथापि साधयेद्योगी प्राणैः कण्ठगतैरपि। ततो रहस्युपाविष्टः साधकः संयतेन्द्रियः। प्रणवम्प्रजपेद्दीर्घं विघ्नानां नाशहेतवे" इति। "प्रणवं दीर्घमुच्चार्य्य घण्टानादं विसोर्णवत्"इत्यादिस्मरणात्।मूलाधारादिब्रह्मरन्ध्रपर्य्यन्तम्। गम्भीरस्वरेण वायुवलितेन घण्टानादरूपेण चिरेण जपेदित्यर्थः। प्रणवम्प्रजपेद्दीर्घमित्येतदंशस्य अयमाशयो वेदितव्यः। अवशिष्टांशः स्पष्ट एव। सूत्रितञ्च श्रीमता पतञ्जलिना योगाचार्य्येण "ततः प्रत्यक्चेतनाधिगमोऽप्यन्तरायाभावश्च" परिगणिताश्चान्तरायास्तेनैव "व्याधिस्त्यानसंशयप्रमादालस्याविरतिभ्रान्तिदर्शनालब्धभूमिकत्वानवस्थितत्वानि चित्तविक्षेपास्ते ऽन्तरायाः" इत्यनेन सूत्रेण। तत्र व्याधिः धातुरसकरणवैषम्यम् वातादिदोषत्रयवैषम्यम्वा। स्त्यानमकर्म्मण्यता चित्तस्य।संशयः सङ्कल्पविकल्पात्मकःइदमेवं स्यान्नैवं स्यादिति। प्रमादः अनवधानम् विधेयविस्मृतिरितिभावः। आलस्यम् शरीरस्य मनसश्च गौरवादप्रवृत्तिः। अविरतिः विषयासक्तिः। भ्रान्तिदर्शनम् विपर्य्ययज्ञानम्। अलब्धभूमिकत्वम् समाधिभूमेरलाभः। अनवस्थितत्वम् लब्धभूमौ चित्तचाञ्चल्यम्। एते चित्तविक्षेपरूपा योगप्रतिपक्षाः अन्तरायपदवाच्याः विघ्ना वेदितव्याः। उच्यन्ते शिवसंहितायाम् नारीशय्याशनवस्त्रादिस्नानपूजाविधिहोमादिधौतिप्रक्षालनादिभोग रूपधर्म्मरूपज्ञानरूपा बहवो विघ्नाः। ते ऽत्र ग्रन्थविस्तारभिया न प्रतिपादितास्ततएवावगन्तव्याः साधकैः॥ २ ॥ २ ॥ ६ ॥

सेवनन्त्वानुद्वेगं मनसः ॥ २ । २ । ७ ॥

पूर्व्वाभिहितम् अविमुक्तादिसेवनम् तुशब्दश्चार्थकः आ अनुद्वेगम् अनुद्वेगपर्य्यन्तम्। अत्र विधेयमिति योजनीयम्। यावदेव मनः उद्विग्नं न स्यात् तावदेव भ्रूमध्यादिस्थानम् मनोदृष्टिभ्यां सेवेत-इतिभावः। मनस्युद्विग्ने विक्षेपसम्भवः ततः ब्रह्मस्पर्शरूपप्रशमसुखहानिश्च सम्भवति। तस्मात् शनैः शनैरेव पुनःपुनर्विक्षिप्तञ्चित्तम् तदनुसरणेन अभ्यासक्रमेण उत्तरोत्तरम् क्षणमुहूर्त्तयामदिनादिकालावधि-

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

त्वेन लब्धप्रतिष्ठम् समाहितम् कुर्य्यात् । तथाच भगवद्वाक्यम् "शनैः शनैरुपरमेद्बुद्धया धृतिगृहीतया । आत्मसंस्थम्मनः कृत्वा न किञ्चिदपि चिन्तयेत्" इति शनैः शनैः क्रमेण वाह्यविषयेभ्यस्ततस्तत इन्द्रियेभ्यः ततस्तमोविपरीतप्रत्ययेभ्यश्च मन्दं मन्दमन्त करणमुपरमयेत् उपरतङ्कुर्य्यात् । योगनिष्पादनैककामितया विषयैः इन्द्रियैः असत्प्रत्ययैश्च स्पर्शो यथा न स्यात् तथा मनसो धार्य्यातिरिक्तप्रवृत्तिमुपशमयेदित्यर्थः । तथाच श्रूयये "यच्छेद् वाङ्मनसी प्राज्ञस्तद्यच्छेज्ज्ञानमात्मनि । ज्ञानमात्मनि महति नियच्छेच्छान्त आत्मनि" इति । मनः आत्मसंस्थं सम्यगात्मन्येव चैतन्यरूपे स्थितम् निश्चलङ्कृत्वा किञ्चिदपि वाह्यमाभ्यन्तरम्वा वस्तु न चिन्तयेत् न भावयेत् । किन्तु सर्व्वम्ब्रह्मैव भावयेदित्यर्थः । एतेन ब्रह्माकारवृत्त्या मनसो योऽन्यभावनाया अभावः स एष एव योग इति सूचितम्भवति । तथाच तत्रैव "यतो यतो निश्चरति मनश्चञ्चलमस्थिरम् । ततस्ततोनियम्यैतदात्मन्येव वशं नयेत्"इत्युच्यते । अत्रापि यतोयतस्ततस्तत इतिशब्दध्वनितपौनःपुन्येन उद्वेगनिरासेनैव अनुद्विग्नदशायाम् मनसः भ्रूमध्यादिव्यञ्जित आत्मनि स्थापनंविधीयते । एवशब्देन धार्य्यातिरिक्तस्थानात् मनसः आकर्षणंविधीयत इति वेदितव्यम् । अपिच तत्रैव "प्रशान्तमनसं ह्येनं योगिनं सुखमुत्तमम् । उपैति शान्तरजसम्ब्रह्मभूतमकल्मषम्" इत्यत्र प्रशान्तमनसः शान्तरजस एव साधकस्य ब्रह्मस्पर्शरूपमुत्तमं सुखम्प्राप्यम् स्वीक्रियते । मनउद्वेगे तु प्रशान्तमनस्त्वं शान्तरजस्त्वं न सम्भवतः "उद्वेग उद्भ्रमः" इतिकोशात् उद्वेगस्य उद्भ्रमपदवाच्यस्य चलनवृत्तिमतः रजोरूपत्वोपपत्तौ अप्रशान्तिवृत्तिमतः सत्त्वरूपत्वानुपपत्तेः । ननु स्वभावो दुरतिक्रमः इतिन्यायेन मनसः स्वाभाविकवेगस्य निरोधो न सेत्स्यति इति चेन्न "स्वभावविजयः शौर्य्यम्" इत्युद्धवम्प्रति भगवदुक्तेः स्वभावविजयोपपत्तेः । अपिच उच्यते भगवद्गीतायाम् "अभ्यासेन तु कौन्तेय वैराग्येण च गृह्यते" सूत्रितञ्च श्रीमता पतञ्जलिना "अभ्यासवैराग्याभ्यान्तन्निरोधः" इति । परन्तु मनोजयी पुरुषः मनः अभ्याससम्बन्धिना वैराग्यसम्बन्धिना च मनसा एव जयेत् । न च मनो विहाय केवलैर्विषयत्यागादिभिरुपायैस्तथाचभगवदुक्तिः "कर्म्मेन्द्रियाणि संयम्य य आस्ते मनसा स्मरन् । इन्द्रियार्थान् विमूढात्मा मिथ्याचारः स उच्यते । यस्त्विन्द्रियाणि मनसा नियम्यारभतेऽर्जुन । कर्मेन्द्रियैः कर्म्मयोगमशक्तः स विशिष्यते"

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

"आत्मैव ह्यात्मनो बन्धुरात्मैव रिपुरात्मनः। बन्धुरात्मात्मनस्तस्य येनात्मैवात्मना जितः। अनात्मनस्तु शत्रुत्वे वर्त्तेतात्मैव शत्रुवत्" इति। तथाचोक्तं योगवाशिष्ठे "मन एव समर्थः स्यान्मनसो दृढनिग्रहे। अराजाकः समर्थः स्याद्राज्ञो राघव ! निग्रहे। तृष्णाग्रहगृहीतानां संसारान्तरपातिनाम्। आवर्त्तैरुह्यमानानां वरं स्वमन एव नौः। मनसैव मनः छित्वा पाशं संसारबन्धनम्। भवादुत्तारयात्मानम् नासावन्येन तार्य्यते। यायोदेति मनोनाम्नि वासना वासितान्तरा। तान्ताम्परग्रहे प्राज्ञस्ततोऽविद्याक्षयो भवेत्। भोगैकवासनास्त्यक्त्वा मुञ्च त्वं भेदवासनाः। भावाभावौ ततस्त्यक्त्वा निर्विकल्पः सुखी भवेत्" इति। अपिचोक्तम् उत्तरगीतायाम् "मनसा मन आलोच्य स्वयं सिध्यन्ति योगिनः" इति। अत्र व्याख्यातं श्रीमद्गुरुवरैः। मनसा मन आलोच्य इत्यालोचनमुत्पथान्निवर्त्तनम्। यथाच काचिद्वनिता कुत्रचित्प्रस्थानकाले स्वमित्रायैवम् वदति मम शिशुरालोचनीयः इत्युक्तवत्यां तस्यां सा चैवं जानाति उत्पथान्निवर्त्तयितुमावोधयति करोति च तथा। अपिच भगवदुक्तिः "असंयतात्मना योगो दुष्प्राप इति मे मतिः। वश्यात्मना तु यतता शक्योऽवाप्तुमुपायतः" इति ॥ २। २। ७।

तच्च यमनियमपुरःसरम् ॥ २ । २ । ८ ॥

तत् अविमुक्तसेवनप्राणापानविनिमयादिसाधनम्। चेति पुनरर्थकमव्ययम्। यमश्च नियमश्च यमनियमौ तौ पुरःसरौ पूर्व्वसंस्थौ यस्य तत् तथाभूतम् यमनियमपूर्व्वकम्। अत्र विधेयमिति योजनीयम्। एतौ यमनियमौ योगाङ्गीभूतौ वेदितव्यौ। तथाचोक्तम्पातञ्जलयोगसूत्र "यम-नियमासन-प्राणायाम-प्रत्याहार-धारणा-ध्यान-समाधयोऽष्टावङ्गानि" इति। तत्र यमनियमाङ्गं श्रीमान्सूत्रकारो गुरुवरः अत्रोपदिशति आसनमग्र उपदेक्ष्यति। निरुक्तकुम्भकप्राणायामस्यैव उत्तरोत्तरम् प्रत्याहारादिसमाधिपर्य्यन्तं वर्द्धमानावस्थान्तरत्वेन परिणतत्वात् कुम्भकमात्रमुपदिश्य तत्रैव प्रत्याहाराद्यन्तर्भावि इत्याशयेन न तानि पृथगुपदिदेशेति वेदितव्यम्। यमनियमौ वक्ष्यमाणसूत्रद्वयेन श्रीमता पतञ्जलिना योगाचार्य्येण सूत्रितौ तत्र "अहिंसा-सत्या-स्तेय-ब्रह्मचर्य्या-परिग्रहा यमाः" इति "शौच-सन्तोष-तपः-स्वाध्याये-श्वरप्रणिधानानि नियमाः" इति क्वचिद्योगशास्त्रे दश दशसंख्याकौ तौ निर्द्दिष्टौ तथाचोक्तम् "अहिंसा सत्यमस्तेयम्ब्रह्मचर्य्यङ्क्रियाज्जवम्। क्षमाधृतिर्मिताहारशौचञ्चेति यमा दश। तपः सन्तोष आस्तिक्यं दानं देवस्य पूजनम्।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

सिद्धान्तःश्रवणञ्चैव ह्रीर्मतिश्च तपोहुतम्। दशैते नियमाःप्रोक्ता योगशास्त्रविशारदैः" इति। श्रीमद्भागवते तु द्वादशद्वादशसंख्याकौ उद्धवम्प्रति श्रीमद्भगवता उपदिष्टौ "अहिंसा सत्यमस्तेयमसङ्गो ह्रीरसञ्चयः। आस्तिक्यम्ब्रह्मचर्यञ्च मौनं स्थैर्य्यं क्षमा भयम्। शौचं जपस्तपो होमःश्रद्धातिथ्यम्मदर्चनम्। तीर्थाटनम्परार्थेहा तुष्टिराचार्य्यसेवनम्। एते यमाः सनियमाः उभये द्वादश स्मृताः। पुंसामुपासितास्ते तु यथाकामं दुहन्ति हि" इति। अत्र शौचम् बाह्याभ्यन्तरभेदेन द्विसंख्याकम्। ततः द्वादशसंख्यापूर्तिरिति वेदितव्यम्। अत्र उभयोः प्रवृत्तनिवृत्तयोर्मुमुक्ष्वोरकामस्य यमा मुख्याः सकामस्य नियमा मुख्याः इत्यर्थो वेदितव्यः। उक्तञ्च तत्रैव "यमानभीक्ष्णं सेवेत नियमान्मत्परः क्वचित्। मदभिज्ञङ्गुरुं शान्तमुपासीत मदात्मकम्" इति। अत्र मत्पर-इत्यनेन भगवत्परत्वम्प्रतिपाद्यते ततो मुमुक्षुत्वमित्यर्थः "यमानभीक्ष्णं सेवेत" इत्यनेन मुमुक्षोर्यमसेवनम् सर्व्वदाभिधीयते। "नियमान्मत्परः क्वचित्" इत्यनेन मुमुक्षोर्नियमसेवनम् शक्त्यनुसारेण अभ्यासाविरोधेन यथाकालं यथासम्भवं विधीयते। "मदभिज्ञमित्यनेन ब्रह्मज्ञत्वम्प्रतिपाद्यते। "गुरुं शान्तमुपासीत मदात्मकमित्यनेन यमेष्वप्यादरम्परित्यज्य शान्तिसम्पन्नो ब्रह्मस्वरूपो गुरुरुपासनीय इत्युपदिश्यते। तथाचोक्तं गुरुसेवनमाहात्म्यम् कपिलगीतायाम् "अनेकैर्नामसंस्कारात् सद्गुरुः सेव्यते बुधैः। सन्तुष्टः श्रीगुरुर्देवं आत्मरूपम्प्रदर्शयेत्" उक्तञ्च योगबीजे "मरुज्जयो यस्य सिद्धः संसेवेत गुरुं सदा। गुरुवक्त्रप्रसादेन कुर्यात्प्राणजयम्बुधः" इति। उक्तञ्च राजयोगिवेदान्तितार्किकैरागमीयैश्च "नानाविधैः शास्त्रकदम्बकैश्च ध्यानादिभिः सत्करणैर्न गम्यः। चिन्तामणिं ह्येकगुरुम्विहाय" इति स्कन्दपुराणे "आचार्य्याद्योगसर्व्वस्वमवाप्य स्थिरधीः स्वयम्। यथोक्तं लभते तेन प्राप्नोत्यपि च निर्वृतिम्" इति सुरेश्वराचार्य्यैश्च "गुरुप्रसादाल्लभते योगमष्टाङ्गसंयुतम्। शिवप्रसादाल्लभते योगसिद्धिञ्च शाश्वतीम्" इति। एवम् "यस्य देवे परा भक्तिर्यथा देवे तथा गुरौ। तस्यैते कथिता ह्यर्थाः प्रकाशन्ते महात्मनः" इत्यादि शतशः स्मृतयः गुरुसेवनमहिमानमुद्घोषयन्ति। ततः सर्व्वात्मना श्रीगुरुदेवः संसारार्णवज्ञाननौकाकर्णधारः मुहुर्मुहुर्वन्द्यो मनसा कर्म्मणा वाचा सेवनीयश्चेति वेदितव्यम्॥ २॥ २॥ ८॥

एवम् श्रीमान्सूत्रकारः सविधियोगमुपदिश्य योगिविधेयम् पथ्यम्परिचापयति वक्ष्यमाणसूत्रद्वयेन

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

दोषत्रयाऽनुत्पत्तिविनाशनिमित्तम्पथ्यम् । २ । २ । ६ ।

दोषत्रयस्य प्रकृतिपरिमितिर्यतिक्रान्तौ व्याधिहेतूनां वातपित्तश्लेष्मणाम् त्रयस्य तथाभूतस्य अनुत्पत्तिविनाशयोर्निमित्तम् हेतुः पथ्यम्। अत्र योगिसेव्यमिति योजनीयम्। तथाचोक्तं योगशास्त्रे "गोधूमशालिजवषाष्ठिकशोभनान्नं क्षीराज्यखण्डनवनीतसितामधूनि। शुण्ठीपटोलकफलादिकपञ्चशाकम् मुद्गादिदिव्यमुदकञ्च यमीन्द्रपथ्यम्" "पुष्टं सुमधुरं स्निग्धं गव्यं धातुप्रपोषणम् । मनोऽभिलषितं योग्यं योगी भोजनमाचरेत्" इति। अत्र मनोभिलषितशब्दोपात्ताऽविहितभुक्तिप्रसक्तिनिवृत्तये योग्यशब्दोपादानम् इतिवेदितव्यम्। विहितमेव मनोऽभिलषितम्भोक्तव्यम् । नाविहितमित्यर्थः। "अन्नमशितं त्रेधा विधीयते । तस्य यः स्थविष्ठोधातुस्तत्पुरीषम्भवति । योमध्यमस्तन्मांसं, योऽणिष्ठः तन्मनः, मूत्रं लोहितं प्राणश्चापाङ्कार्य्यम्, अस्थिमज्जावाक् तेजसः, अध्यात्ममिदमन्नम, तस्याशितस्य कार्य्यं मांसादि, इदमपाम्पीतानाङ्कार्य्यं लोहितादि, इदन्तेजसोशितस्य कार्य्यमस्थ्यादि" इत्यादिश्रवणात् "चतुर्व्विधस्य चान्नस्य रसस्त्रेधा विभज्यते । तत्र सारतमो लिङ्गदेहस्य परिपोषकः सप्तधातुमयम्पिण्डमेति पुष्णाति मध्यमः। याति विण्मूत्ररूपेण तृतीयः सप्ततो बहिः । आद्यभागे द्वयं नाड्यः प्रोक्तास्ताः सकला अपि। पोषयन्ति वपुर्वायुमापादतलमस्तकम्। नाड़ीभिराभिः सर्व्वाभिर्वायुः सञ्चरते यदा । तदैवान्नरसो देहे साम्येनेह प्रवर्त्तते" इतिस्मरणाच्च मनसोऽन्नमयत्वमुपद्यते तदुपपत्तौ तन्तुपटादिवत् मृद्घटादिवत् दुग्धदध्यादिवत् कार्य्यकारणसाधर्म्यात् सात्विकान्नात् सात्विकमनोजायते राजसाद्राजसम् तामसात्तामसमित्युपपन्नं वेदितव्यम्। अत्र प्रसङ्गात् अन्नानि कति विधानि इतिविचारः प्रस्तूयते। अत्र उपरितनस्मृतौ अन्नस्य चातुर्विध्यम्प्रतिपादितम् चतुर्विधस्येति वाक्यात् । तथाच सुश्रुतः "तत्र पाञ्चभौतिकस्य चतुर्विधस्य षड्रसस्य" इत्यादिना चातुर्विध्यम्प्रतिपादयति। तत्र भक्ष्यभोज्यपेयलेह्यभेदेन चतस्रो विधा वेदितव्याः। केचिदायुर्व्वेदिनः षट् प्रकारान् स्वीकुर्व्वन्ति । तथाचोच्यते "आहारं षड्विधं चोष्यं पेयं लेह्यं तथैवच। भोज्यं भक्ष्यं तथा चर्व्यम्" इत्यादिना । तत्र चर्व्यस्य भक्ष्ये चोष्यस्य च पेये अन्तर्भावो वेदितव्यः। अथ प्रकृतम्प्रतिपाद्यते "मन एव मनुष्याणाङ्कारणम्बन्धमोक्षयोः" इतिस्मरणात् मनसोबन्धमोक्षकारणत्वमुपपन्नम्भवति "सत्वात्सञ्जायते ज्ञानम्" इतिभगवदुक्तेः "ज्ञानादेव तु

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

कैवल्यम्" इतिश्रवणात् "ज्ञानादेव विमुच्यते" इतिश्रवणाच्च। सात्विकमनसः ज्ञानोत्पत्तिरुत्पद्यते ज्ञानाच्च मुक्तिनिष्पत्तिरुपपद्यते तस्माद्युक्तं योगिभिः सात्विकान्नरूपपथ्यसेवनमिति वेदितव्यम्। अन्नजलतेजसान्निरुक्तत्रिवृत्करणव्यपदेशात् सप्तधातुमयपिण्डपदवाच्यशरीरस्य अन्नजलतेजोमयत्वमुपपन्नम्भवति। "धर्म्मार्थकाममोक्षाणां शरीरं साधनम्परम्" इतिस्मरणात् शरीरस्य पुरुषार्थहेतुत्वमुपपन्नम्भवति। शरीरमपि पूर्व्ववत् कार्य्यकारणसादृश्यात् सात्विकान्नादिमयं सात्विकवृत्तिमदुपपन्नम्भवति। असात्विकमयम् असात्विकवृत्तिमदित्युपपन्नम् वेदितव्यम् "इन्द्रियाणाम्मनोनाथः" इतिस्मरणात्" "इन्द्रियेभ्यः परम्मनः" इतिभगवदुक्तेश्च इन्द्रियसमुदायरूपशरीरस्य मनःप्रेर्य्यत्वमुपपद्यते। ततः सात्विके मनसि शरीरं सात्विकवृत्तिकमुपपद्यते। अन्यथा अन्यथावृत्तिकम्। एतावता उक्तम्भवति सात्विकरसपरिणतसात्विकमनःप्रेरितशरीरस्य सात्विकवृत्तिमत्त्वम् सात्विकवृत्तिमत्त्वे तस्य मोक्षहेतुत्वात् युक्तं सात्विकान्नजलतेजःप्रतिपादकवाक्यप्रविष्टघृतरूपपथ्यसेवनमिति वेदितव्यम्। उक्तञ्च सात्विकादिभेदेन त्रिविधमन्नम् भगवद्गीतायाम् "आयुःसत्त्वबलारोग्यसुखप्रीतिविवर्धनाः। रस्याः स्निग्धाः स्थिरा हृद्या आहाराः सात्विकप्रियाः। कट्वम्ललवणात्युष्णतीक्ष्णरूक्षविदाहिनः। आहारा राजसस्येष्टा दुःखशोकामयप्रदाः। यातयामं गतरसं पूति पर्य्युषितञ्च यत्। उच्छिष्टमपि चामेध्यं भोजनं तामसप्रियम्" इति। पथ्येष्वपि उक्तानुक्तेषु "अभ्यासकाले प्रथमं प्रशस्तं क्षीराज्यभोजनम्" इतियोगशास्त्रे पृथङ्निर्देशात् योगमारुरुक्षोः अभ्यासारम्भदशायां क्षीराज्यभोजनमवश्यविधेयम् वेदितव्यम्। क्षीरं दुग्धम् आज्यं घृतम् तद्युक्तम्भोजनम् क्षीराज्यभोजनम् शाकपार्थिवादिवत्समासः। यद्वा सति सम्भवे सति च शरीरानुकूल्ये केवलं क्षीराज्यमात्रम्भोक्तव्यमित्यर्थोवेदितव्यः। "ततोऽभ्यासे दृढीभूते न तादृङ्नियमग्रहः" इतियोगशास्त्रात् अभ्यासे दृढीभूते कुम्भकादिनिष्पत्ताविति भावः। तादृङ्नियमग्रहः क्षीराज्यभोजनावश्यताकं विधेयत्वं न भवतीति वेदितव्यम्। पथ्यस्यापि यथेष्टाहारो न विधेयः; किन्तु "सुस्निग्धमधुराहारश्चतुर्थांशविवर्ज्जितः। भुज्यते शिवसम्प्रीत्यै मिताहारः स उच्यते। द्वौ भागौ पूरयेदन्नैस्तोयेनैकम्प्रपूरयेत्। वायोः सञ्चरणार्थाय चतुर्थमवशेषयेत्" इत्यादियोगशास्त्रोक्तमिताहार एव विधेयः। तथाच श्रुतिः "यदात्मसम्मितमन्नन्तदवति न हिनस्ति यद् भूयो हिनस्ति तद्यत् क-

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

नीयो न तद्‌वति" इति। अस्या श्रुतेरयमर्थः आत्मसम्मितं स्वकीयान्नाशयपरिमितम्पथ्यं यदन्नम्भुज्यते तदन्नमत्तारमवति रक्षति कुंभकादि निष्पादयतीतिभावः। न हिनस्ति दोषवैषम्यपदवाच्यामयं सम्पाद्य साधकं न हन्ति न पीड़यतीति भावः। यद्भूयः स्वकीयान्नाशयपरिमित्यतिक्रान्तमन्नं भुज्यते तद्धिनस्ति शूलाद्यामयमुत्पाद्य साधकं हन्ति कुम्भकादि विघट्टयतीत्यर्थः। यत्कनीयश्चतुर्थमवशेषयेदिति परिमितिन्यूनमत्यल्पमन्नं भुज्यते न तत्साधकमवति बुभुक्षापनोदनाय कुम्भकादिघटनाय न प्रभवतीति भावः। अथ उक्तम्भवति मिताहारो विधेय इति। तथाचोक्तम्भगवद्गीतायाम् "नात्यश्नतस्तु योगोस्ति नचैकान्तमनश्नतः। न चातिस्वप्नशीलस्य जाग्रतो नैव चार्ज्जुन। युक्ताहारविहारस्य युक्तचेष्टस्य कर्म्मसु। युक्तस्वप्नावबोधस्य योगो भवति दुःखहा" इति अनयोरर्थः अपरिमितजरयितुमशक्यमन्नमश्नतः बह्वाशिनो योगिनः योगो नास्ति योगनिष्पत्तिर्न भवति। एकान्तं नियमेन अनश्नतोऽप्यल्पमश्नतश्च योगो नास्ति। तन्निष्पत्तिर्न भवति। तथाच स्वप्नशीलस्य अत्यन्तनिद्रालोः अतिजाग्रतश्च तदसिद्धिरितिभावः तर्हि कस्य योगसिद्धिरित्याह "युक्ताहारविहारस्य" "द्वौ भागौ पूरयेदन्नैः" इति चोक्तत्वात्। अगृहस्थयोगपक्षे "न गव्यूतेः परम् गच्छेन्न ग्रामे नगरे वसेत्" इति। गृहस्थयोगपक्षे "ऋतौ भार्य्यामुपेयात्" इत्यादिशास्त्रीयव्यवस्थायाम् युक्त आहारोऽन्नम् विहारः प्रथमे विश्रान्त्यै भूमिसञ्चारः द्वितीये मर्य्यादायै धर्मपत्नीसंयमः यस्य तस्य परिमिताहारविहारस्य युक्तचेष्टस्य कर्म्मसु अन्नादानविसर्गादिशरीरयात्रासम्बन्धनीषु क्रियासु यावता शरीरयात्रा तावत्परिमिता नतु यथेष्टा चेष्टा कायिकवाचिकमानसिकव्यापारो यस्य तस्य तथाभूतस्य युक्तस्वप्नावबोधस्य स्वप्नो निद्रा बोधो जागरणम् तौ युक्तौ परिमितौ "जागृयात् दशनाड्यस्तु निद्रा तु दशनाड़िकाः। पश्चाज्जागरणं तद्वत् दशनाड्यस्तु योगिनः" इत्युक्तलक्षणलक्षितौ स्वप्नावबोधौ यस्य तस्य योगिनः योगः दुःखहा दुःखानि आध्यात्मिकादीनि जन्मादीनि च स्वस्मिन् सिद्धात्मज्ञानेन हन्ति इति दुःखहा भवति। एतावता उक्तम्भवति योगिनः आहारविहारनिद्रावबोधचेष्टानामपरिमितत्वे रजस्तमउद्रेकः ततो योगिभिः तत्परिमितशीलैरेव भवितव्यम्। प्रसङ्गात् योगिविधेयाः परिमितविहारादयोऽप्यर्था अभिहिता इति वेदितव्यम्। "कुर्वन्ति योगिनः पथ्यमपथ्यं न कदाचन। एलां वापि लवङ्गं वा भोजनान्ते च

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

भक्षयेत् । केचित् कर्पूरमिच्छन्ति ताम्बूलं शोभनन्तथा । चूर्णेन रहितं शस्तम्पवनाभ्यासयोगिनाम्॥ इतिचिन्तामणेर्वाक्यं स्वारस्यम्भजते नहि। केचित्पदेन यस्मात्तु तयोः शीतोष्णहेतुना" इति योगशास्त्रात् योगिभिः पथ्यमवश्यं विधेयम् सूचितम्भवति । अपथ्यञ्च अवश्याविधेयमिति योगिनाम्मुखवासनवस्तुषु भोजनान्तभक्ष्येषु एलालवङ्गञ्च देवकुसुमपदवाच्यमपथ्यम्भवति । केचित्पदस्वारस्यानुरोधात् पैत्तिकप्रकृतिकस्य कर्पूरम्पथ्यम् कफिकप्रकृतिकस्य च उष्णगुणकं चूर्णेन रहितं ताम्बूलं पथ्यं सूचितम्भवति। यद्यपि कर्पूरयुक्तं ताम्बूलं लोकव्यवहृतंपरस्परम् शीतोष्णगुणसम्पर्कात् तत्तत्प्राबल्यप्रशान्तये अनतिशीतोष्णम्पथ्यम्भवितुमर्हति । तथापि शास्त्रीयप्रमाणानुपलब्धेः पथ्यगणनायां न गणितमिति वेदितव्यम् । प्रायःयानि यानि वस्तूनि शास्त्रे हविष्यत्वेन परिगणितानि तानि तानि पथ्यत्वेन स्वीकर्त्तव्यानि।परन्तु क्वचित्क्वचिदंशे तयोरनेकवाक्यतापि भवति । यथा योगशास्त्रे मधु पथ्यत्वेन परिगण्यते धर्मशास्त्रे अहविष्यत्वेन परिगण्यते । एवमन्यत्रापि वेद्यम् २।२।९॥

शुक्रस्य च निमित्तम् ।२।२।१०।

शुक्रस्य वीर्य्यपदवाच्यस्य रसादिपरिणतचरमधातोः च शब्दः रसादिमज्जान्तान् षड्धातूनपि गमयतीति वेदितव्यम् । निमित्तं हेतुः। अत्र पथ्यंशब्दः पूर्व्वसूत्रस्थो योजनीयः पथ्यप्रकरणस्थयोगशास्त्रे "पुष्टं सुमधुरम् धातुप्रपोषणम्पुष्टम्" इत्याद्युक्तेः युक्तम्पथ्यस्य शुक्रधातुनिमित्तत्वम् । चकारात् रसादिधातुनिमित्तत्वम् वेदितव्यम् । "अस्थिमज्जावाक्तेजसः" इतिश्रवणात् तेजोपदवाच्यघृतस्य शुक्रधात्वव्यवहितमज्जाधातुहेतुत्वम् मज्जाऽव्यवहितास्थिधातुहेतुत्वञ्च उपपन्नम्भवति । ततश्च युक्तं घृतस्य मज्जापरिणतशुक्रहेतुत्वम्।अत एव घृतसारदुग्धस्यापि उपपन्नन्तद्धेतुत्वम् । अन्यस्यापि पथ्यस्य रसादिपरिणत्या क्रमेण शुक्रहेतुत्वमस्ति परन्तु घृतस्य दुग्धस्य च तेजस्तेजोसारत्वात् अन्नाद्यपेक्षया अधिकांशेन अल्पकालेन च शुक्रजनकत्वोपपत्तेः 'शस्तं क्षीराज्यभोजनम्" इति शास्त्राच्च । घृतदुग्धभोजनम् अवश्यविधेयत्वेन अनुज्ञाप्यत इति वेदितव्यम् । "सुगन्धिर्योगिनां देहे जायते बिन्दुधारणात् । यावद्धातुःस्थिरो देहे तावत्कालभयङ्कुतः । शुक्रायत्तञ्च जीवितम्" इत्यादियोगाभिधानात् । हितकारिशुक्रनिमित्तम्पथ्यं योगिसेव्यमित्युपपन्नम्भवति । यद्वा "सपर्य्यगाच्छुक्रमका-

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

यमव्रणमस्नाविरं शुद्धमपापविद्धम्" इतिश्रुत्या शुक्रशब्दात् ब्रह्म निर्दिश्यते अस्यां श्रुतौ अकायमित्यादिविशेषणानि शुक्रस्य विशिष्टस्य भवन्ति। एतानि च विशेषणानि श्रुतिस्मृतिप्रसिद्धानि ब्रह्मसम्बन्धीनि अधिगतानि भवन्ति। तस्माद् शुक्रमितिशब्दो ब्रह्मनिर्देशक इत्युपपन्नम्भवति। "अङ्गुष्ठमात्रः पुरुषोऽन्तरात्मा सदा जनानां हृदये सन्निविष्टः। तं स्वाच्छरीरात् प्रवृहेन्मुञ्जादिवैषीकान्धैर्य्येण तम्विद्याच्छुक्रममृतम्" इति श्रुतिः अङ्गुष्ठमात्रम् अन्तरात्मानम्पुरुषं जीवपदवाच्यं सदा जनानां हृदये सन्निविष्टम् अन्तःकरणावच्छिन्नं निर्दिशति। तं जीवं स्वाच्छरीरात् आत्मत्वेनाभ्यस्तात् देहात् प्रवृहेत् पृथक्कुर्य्यात्। प्रकृत्यसंश्लिष्टं विवेचयेत्। धैर्य्येण बलवदिन्द्रियनिग्रहादिना तं विविक्तमात्मानं शुक्रं शुक्लं स्वप्रकाशमितियावत् अमृतम् कूटस्थम्ब्रह्मेतियावत् विद्यात् जानीयादिति निर्दिशति। ततोऽप्युपपन्नम्भवति शुक्रस्य ब्रह्माभिधेयत्वम् तदुपपत्तौ शुक्रस्य ब्रह्मणः चेतिपुनरर्थकमव्ययम्। निमित्तं हेतुः। तत्प्राप्तिहेतुरितियावत् युक्ताहारविहारादि ब्रह्मप्राप्तिहेतुर्योगनिष्पादनाचरणम्। अत्र पथ्यं पूर्व्ववद्योजनीयम्। यद्वा "शुक्रोवैश्वानरोवर्हिर्वह्निः सूक्ष्मा तनूनपात्" इति शब्दार्णवात् शुक्रशब्दः अग्निपर्य्यायत्वेन उपपद्यते इत्युपपत्तौ शुक्रस्य अग्नेः जाठराग्नेरितियावत् चकारः "यदा तु नाड़ीशुद्धिः स्यात् तदा चिह्नानि बाह्यतः। कायस्य कृशता कान्तिस्तदा जायेत निश्चितम्॥ यथेष्टधारणम्वायोरनलस्य प्रदीपनम्। नादाभिव्यक्तिरारोग्यञ्जायते नाड़िशोधनात्" इति योगशास्त्रोक्ताग्निदीपनसमानकालीननादाभिव्यक्तादीनि गमयतीति वेदितव्यम्। तेषामपीत्यर्थः निमित्तं हेतुः अत्र पथ्यम्पूर्व्ववद्योजनीयम्। एतावता यज्जठराग्निं दीपयति नादाभिव्यक्त्यादीनि निष्पादयति तन्नाड़ीशोधनानुकूलमाहारविहारादिपथ्यं अभ्युपगम्यत इति वेदितव्यम्। यद्वा शब्दशास्त्रात् रलयोरेकत्वस्मरणात् शुक्रशब्दात् शुक्लशब्दग्रहणमुपपद्यते "कर्म्माशुक्लाकृष्णं योगिनस्त्रिविधमितरेषाम्" इति पातञ्जलसूत्रात् तपः स्वाध्यायध्यानात्मकम् परपीड़ानुग्रहरूपबहिःसाधनासाध्यम् आभ्यन्तरसाधनीभूतं स्वच्छं धर्म्मपदवाच्यं कर्म्म शुक्लशब्देनाभिहितमुपपद्यते। इत्युपपत्तौ शुक्रस्य निरुक्तशुक्लकर्म्मणः च शब्दः अशुक्लाकृष्णम् "नैव तस्य कृतेनार्थो नाकृतेनेह कश्चन" इति भगवदुक्तपुण्यपापाकिङ्करत्वरूपं योगारूढयोगिनः विधिनिषेधराहित्यं गमयते निमित्तं हेतुः अत्र पथ्यं तथा

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

योज्यम् । यद्वा "अजामेकां लोहितशुक्लकृष्णाम्" इत्यादिस्मृतौ लोहितशुक्लकृष्णशब्दैः रजस्तमःसत्वानि गुणवृत्त्याभिधीयन्ते । रञ्जनात्मकत्वाल्लोहितं रजः। प्रकाशात्मकत्वात् शुक्लं सत्त्वम्। आवरणात्मकत्वात् कृष्णं तमः। एवं सति रलयोरेकत्वस्मरणात् शुक्रशब्दात् शुक्लपदवाच्यं सत्वमुपपद्यते इत्युपपत्तौ शुक्रस्य शुक्लपदवाच्यसत्वगुणस्य च शब्दः "गुणानेतानतीत्य त्रीन् देही देहसमुद्भवान् । जन्ममृत्युजरादुखैर्विमुक्तोऽमृतमश्नुते" इति भगवदुक्तनैर्गुण्यस्थितिं गमयति। तस्यापीत्यर्थः निमित्तं हेतुः। अत्र पथ्यम्पूर्व्वंवद्योजनीयम् । एतावता उक्तम्भवति यदाहारविहारादि सत्त्वगुणमाविर्भावयति रजस्तमसीतिरोभावयति नैर्गुण्यं सम्पादयति तत्पथ्यं विधेयम् । ग्रन्थविस्तारभिया "उत्साहात् साहसाद्धैर्य्यात् तत्त्वज्ञानाच्च निश्चयात् । जनसंगपरित्यागात् षड्भिर्योगः प्रसिध्यति" इत्यादियोगसाधनीभूतं कायिकं वाचिकं मानसम् आचरणं पथ्यपदवाच्यं नालेखि तत्तु स्वात्मारामादिवाक्यादवगन्तव्यं साधकैः इति वेदितव्यम् । २।२।१ ।

तद्विपरीतमपथ्यम् ।२।२।११।

तस्मात् निरुक्तपथ्यात् विपरीतमन्यथा भूतम् आमिषप्रायं राजसतामसान्नम् अपथ्यम् । तथाचोक्तं योगशास्त्रे "कट्वम्लतीक्ष्णलवणोष्णहरीतशाकसौवीरतैलतिलसर्षपमद्यमत्स्यान् । आजादिमांसदधितक्रकुलत्थकोलपिण्याकहिंगुलशुनाद्यमपथ्यमाहुः । भोजनमहितम्विद्यात् पुनरस्योष्णीकृतं रुक्षम् अतिलवणमम्लयुक्तं कदशनशाकोत्कटं वर्ज्यम्" उक्तञ्च श्रीमता दत्तात्रेयेण "अथ वर्ज्यानि वक्ष्यामि योगविघ्नकराणि च । लवणं सर्षपञ्चाम्लमुग्रं तीक्ष्णञ्च रूक्षकम् । अतीवभोजनं त्याज्यमतिनिद्रातिभाषणम्" स्कन्दपुराणेऽपि "त्यजेत्कट्वम्ललवणम्" इति । उक्तञ्च योगशास्त्रे आहारादन्यदपि वर्ज्यमपथ्यम् "वह्निस्त्रीपथिसेवनमादौ वर्ज्जनमाचरेत्। वर्जयेद्दुर्ज्जनप्रान्तं वह्निस्त्रीपथिसेवनम् । प्रातःस्नानोपवासादिकायक्लेशविधिन्तथा" इति । अत्र आदावितिशब्देन अभ्यासकाले इत्यर्थो वेदितव्यः। अत उक्तम्भवति अभ्यासनिष्पत्तौ तु कदाचित् शीतकाले वह्निसेवनम् गृहस्थस्य ऋतौ धर्म्मपत्नीगमनम् तीर्थयात्रादौ मार्गगमनम् विहितमिति वेदितव्यम् । प्रातःस्नानोपवासादीत्यत्र आदिशब्दः फलाहारादिज्ञापकं इति वेदितव्यम् । यद्यपि प्रातःस्नानाद्याचरणम् स्मृतिविहितं

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

धर्म्यम्प्रसिद्धम् तथापि प्रथमाभ्यासिनः प्रातःस्नाने शीतविकारकफाद्युत्पत्तेः उपवासादौ पित्ताद्युत्पत्तेः तत्त्वर्ज्यमिति वेदितव्यम्। अभ्यासनिष्पत्तौ लोकसंग्रहार्थिना कारुणिकेन योगिना तदाचरणं न निषिद्धमिति रहस्यम् वेदितव्यम्। अत्र "अत्याहारः प्रयासश्च प्रजल्पो नियमग्रहः। जनसङ्गश्च लौल्यञ्च षड्भिर्योगो विनश्यति" इत्यादि योगशास्त्रोक्तानि "नात्यश्नतस्तु योगोस्ति न चैकान्तमनश्नतः। न चातिस्वप्नशीलस्य जाग्रतो नैव चार्ज्जुन" इत्यादि भगवदुक्तानि च आचरणानि योगहानिकरत्वात् वर्ज्यानि अपथ्यपङ्क्तिगतानि परिगणनीयानीति वेदितव्यम् ॥२।२।११।

इति परमपूज्यपादश्रीमद्योगदत्तशर्म्मकृतामृतोपदेशे पूज्यपादश्रीमद्योगदत्तशर्म्मशिष्यश्रीमत्सत्यनारायणशर्म्मकृतभाष्ये द्वितीयाध्यायस्य द्वितीयः पादः समाप्तः ॥

विनापि तेभ्यः पूर्व्वसम्पादितक्षेत्रसंस्कारात् २।३।१

तेभ्यः यमनियमपथ्येभ्यो विनापि पूर्व्वसम्पादितक्षेत्रसंस्कारात् अभ्यासारम्भकालात् पूर्व्वं विद्यमानजन्मनि व्यतीतजन्मनि वा तपःस्वाध्यायेश्वरप्रणिधानात्मकक्रियायोगेन सम्पादितात् निष्पादितात् क्षेत्रसंस्कारात् "महाभूतान्यहङ्कारो बुद्धिरव्यक्तमेव च। इन्द्रियाणि दशैकञ्च पञ्च चेन्द्रियगोचराः। इच्छा द्वेषः सुखं दुःखं सङ्घातश्चेतना धृतिः। एतत्क्षेत्रं समासेन सविकारमुदाहृतम्" इतिभगवदुक्तक्षेत्रस्य साङ्ख्यसम्मतचतुर्विंशतितत्त्वरूपस्य इच्छाद्वेषादिधर्मवतः शरीरत्रयस्य संस्कारात् परिशोधनात् अत्र योगो निष्पद्यत इतियोजनीयम्। उक्तञ्च तथा श्रीपतञ्जलिना "स हि क्रियायोगः समाधिभावनार्थः क्लेशतनूकरणार्थश्च" इति सूत्रेण क्रियायोगद्वारा क्लेशतनूकरणरूपक्षेत्रसंस्कारं समाधिभावं च निरूप्य योगनिष्पत्तिर्निरूप्यतइति वेदितव्यम्। दृश्यतेऽपि लोके हलकर्षणतृणापनयनगोमयभस्मपातनादिभिः संस्कृतक्षेत्रे विनापि पौनःपुन्येन सेचनादिप्रयासैः बीजवपनात् शस्यनिष्पत्तिः। तथाच विनापि यमादिभिः क्रियागोगात् क्षेत्रे शरीररूपे संस्कृते सति अविमुक्तसेवनादिरूपसाधनैरेव योगनिष्पत्तिः सिद्धयतीतिवेदितव्यम् ।२।३।१।

जन्मान्तरकृताभ्यासवाहुल्याद्वा २।३।२

अत्र सूत्रादौ विनापि तेभ्यः इति पुरस्ताद्योजनीयम् जन्मान्तरकृ-

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

ताभ्यासवाहुल्यात् विद्यमानजन्मनः प्राक्तनजन्मसु कृताभ्यासाधिक्यात् वा शब्दो वैकल्पिकोवेदितव्यः। अत्रपूर्ववदेव योगोनिष्पद्यते इति योजनीयम् "अनेकजन्मसंसिद्धस्ततोयाति परां गतिम्" इत्यादिभगवद्वाक्यैः जन्मान्तरकृताभ्यासात् योगनिष्पत्तिरुपपद्यते। अधिगम्यते च पुराणादिषु शुकादीनाम् जन्मत एव योगनिष्पत्तिः। तथाहि "जैगीषव्यो यथा विप्रो यथाचैवोषितादयः। क्षत्रिया जनकाद्यास्तु वलाधारादयो विशः॥ सम्प्राप्ता योगसंसिद्धिं पूर्वाभ्यस्तस्वयोगतः। धर्मव्याधादयः सप्त शूद्राः पैलवकादयः। मैत्रेयी सुलभा शार्ङ्गी शाण्डिली च तपस्विनी। एते चान्ये च बहवो नीचयोनिगता अपि। ज्ञाननिष्ठां परां प्राप्ताः पूर्वाभ्यस्तस्वयोगतः" इत्यादिस्मरणञ्च ।२।३।२।

अभ्यासे सिद्धासनम् २।३।३

अभ्यासे अभ्यासकाले सिद्धासनम् सिद्धाख्यम् आस्ते अस्मिन् आस्यते अनेनेति वा आसनम् योगाङ्गीभूतम् अत्र विधेयमितियोजनीयम् उक्तञ्च तत्स्वरूपं योगशास्त्रे "योनिस्थानकमङ्घ्रिमूलघटितं कृत्वा दृढं विन्यसेत्। मेढ्रे पादमथैकमेव हृदये कृत्वा हनुं सुस्थिरम्। स्थाणुः संयमितेन्द्रियोऽचलदृशा पश्येद्भ्रुवोरन्तरम्। ह्येतन्मोक्षकपाटभेदजनकं सिद्धासनम्प्रोच्यते" इदम्मत्स्येन्द्रसम्मतं सिद्धासनम् अन्यसम्मतं प्रकारान्तरेणोक्तं योगशास्त्रे "मेढ्रादुपरि संस्थाप्य सव्यं गुल्फन्तथोपरि। गुल्फान्तरञ्च निक्षिप्य सिद्धासनमिदम्भवेत्। एतत् सिद्धासनम्प्राहुरन्ये वज्रासनम्विदुः। मुक्तासनम्वदन्त्येके प्राहुर्गुप्तासनं परे" इति आसनाभिज्ञाः। यत्र वामपादपार्ष्णिंयोनिस्थाने नियोज्य दक्षिणपादपार्ष्णिर्मेढ्रादुपरि स्थाप्यते तत्सिद्धासनम्। यत्र दक्षिणपादपार्ष्णिर्योनिस्थाने नियोज्य वामपादपार्ष्णिमेढ्रादुपरि स्थाप्यते तद्वज्रासनम्। यत्र तु दक्षिणसव्यपार्ष्णिद्वयमुपर्य्यधोभागेन संयोज्य योनिस्थानेन संयोज्यते तन्मुक्तासनम्। यत्र च पूर्ववत् संयुक्तं पार्ष्णिद्वयं मेढ्रादुपरि निधीयते तद्गुप्तासनमिति। उक्तञ्च योगशास्त्रे सर्वासनेभ्यः सिद्धासनस्योत्कृष्टयम् अभ्यासे तद्विधेयत्वञ्च "चतुरशीत्यासनानि शिवेन कथितानि च। तेभ्यश्चतुष्कमादाय सारभूतम्ब्रवीम्यहम्। सिद्धम्पद्मं तथा सिंहं भद्रञ्चेति चतुष्टयम्। श्रेष्ठं तत्रापि च सुखे तिष्ठेत् सिद्धासने सदा। यमेष्विव मिताहारमहिंसां नियमेष्विव। मुख्यं सर्वासनेष्वेकं सिद्धाः सिद्धासनम्विदुः। चतुरशीतिपीठेषु सिद्ध-

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

मेव सदाभ्यसेत् । द्वासप्ततिसहस्राणां नाडीनाम्मलशोधनम्" इति । अपिचोक्तं योगशास्त्रे योगान्तराभ्यासमन्तरेणापि सिद्धासनाभ्यासमात्रेण योगसिद्धिः "आत्मध्यायी मिताहारी यावद्द्वादशवत्सरम् सदा सिद्धासनाभ्यासाद्योगी निष्पत्तिमाप्नुयात्" उक्तञ्च योगशास्त्रे सामानान्येनआसनाभ्यासफलम् "कुर्य्यात्तदासनं स्थैर्य्यमारोग्यञ्चाङ्गलाघवम्" इति तदासनम् "आसनेन रजो हन्ति" इति योगवाक्यात् देहस्य मनसश्च चाञ्चल्यरूपरजोधर्म्मनाशकत्वेन स्थिरतामारोग्यं धातुरसकरणसाम्यमङ्गानां लाघवं लघुत्वम् कुर्य्यात्। गौरवरूपतमोधर्म्मनाशकत्वमप्यनेनोक्तम्। चकारात् क्षुद्बाधादिकमपि बोध्यम् "द्वन्द्वानभिघातः" इति योगशास्त्रीयवाक्यात् आसनसिद्धिसाधकानां शीतोष्णादिद्वन्द्वैरनभिभवो भवतीति वेदितव्यम्। उक्तञ्च विशेषेण सिद्धासनाभ्यासफलम् योगशास्त्रे "किमन्यैर्बहुभिः पीठैः सिद्धे सिद्धासने सति । प्राणानिले सावधाने बद्धे केवलकुम्भके। उत्पद्यते निरायासात् स्वयमेवोन्मनीकला ।तथैकस्मिन्नेव दृढे सिद्धे सिद्धासने सति। बन्धत्रयमनायासात् स्वयमेवोपजायते" इति। उक्तञ्च पातञ्जलयोगसूत्रे आसनसिद्धिनिमित्तीभूतमुपायद्वयम् "प्रयत्नशैथिल्यानन्तसमापत्तिभ्याम्" इतिसूत्रेण अस्य भावः प्रयत्नोपरमात् सिद्ध्यत्यासनम् येन नाङ्गमेजयत्वम्भवति । अनन्ते च समापन्नञ्चित्तमासनं सम्पादयतीति । उक्तञ्च आसनसिद्धौ प्राणायामसिद्धिफलम् तत्रैव योगशास्त्रे "तस्मिन् सति श्वासप्रश्वासयोर्गतिविच्छेदः प्राणायामः ॥२।३।३॥

पद्मस्वस्तिके वापि ।२।३।४।

अत्र सूत्रादौ अभ्यासे इति पुरस्ताद्योजनीयम् पद्मस्वस्तिके पद्मासनस्वस्तिकासने, वेति वैकल्पिकमव्ययपदम् अपीति समुच्चयेऽव्ययपदम् पूर्व्वनिर्द्दिष्टसिद्धासनेन सार्द्धं पद्मासनस्वस्तिकासने समुच्चिनोति अत्र विधेये इति योजनीयम्। उक्तञ्च पद्मासनस्वस्तिकासनस्वरूपम् क्रमेण योगशास्त्रे "वामोरूपरि दक्षिणञ्च चरणं संस्थाप्य वामन्तथा । दक्षोरूपरि पश्चिमेन विधिना धृत्वा कराभ्यां दृढम् । अङ्गुष्ठौ हृदये निधाय चिबुकं नासाग्रमालोकयेत्। एतद्व्याधिविनाशकारि यमिनां पद्मासनं प्रोच्यते" मत्स्येन्द्रनाथाभिमतम् पद्मासनम् प्रकारान्तरेणाभिधीयते "उत्तानौ चरणौ कृत्वा उरुसंस्थौ प्रयत्नतः । उरुमध्ये तथोत्तानौ पाणी कृत्वा ततो दृशौ। नासाग्रे विन्यसेद्राजदन्त-

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

मूले तु जिह्वया। उत्तम्भ्य चिवुकं वक्षस्युत्थाप्य पवनं शनैः। इदं पद्मासनम्प्रोक्तं सर्व्वव्याधिविनाशनम्। दुर्ल्लभं येन केनापि धीमता लभ्यते भुवि" इति आसनाभिज्ञा यत्र हस्ताभ्याम् अर्थात् करग्रहणपूर्व्वकम् पद्मासनम् बद्धपदविशिष्टं वदन्ति। तदितरत् तदविशिष्टमिति-वेदितव्यम्। "जानूर्व्वोरन्तरे सम्यक् कृत्वा पादतले उभे। ऋजुकायः समासीनः स्वस्तिकं तत्प्रचक्षते" "उरूजंघान्तरादाय प्रपदे जानुमध्यगे। योगिनो यदवस्थानं स्वस्तिकं तद्विदुर्बुधाः" इति "पद्मकं स्वस्तिकम्वापि भद्रासनमथापि वा। वध्वा योगासनं सम्यगुत्तराभिमुखस्थितः" इत्यादियोगशास्त्रीयवाक्यैरनयोरासनयोर्विधेयत्वम् दृश्यते इति वेदितव्यम् ॥२।३।४॥

विश्रामे च शवासनम् ।२।३।५।

विश्रामे योगाभ्यासजनितश्रमापनोदने। चशब्दः अभ्यासकालम् व्यावर्त्तयति विश्रामकालमनुवर्त्तयतीति वेदितव्यम्। शवासनम् शवाख्यमासनम्। अत्र विधेयमिति योजनीयम्। "उत्तानं शववद्भूमौ शयनन्तच्छवासनम्। शवासनम् श्रान्तिहरं चित्तविश्रान्तिकारकम्" इतियोगशास्त्रात् शवासनस्वरूपम् तदनुष्ठानफलञ्च समभिधीयत इतिवेदितव्यम्। यद्यपि "आसनानि च तावन्ति यावन्त्यो जीवजातयः। एतेषामखिलान्भेदान् विजानाति महेश्वरः। चतुरशीतिलक्षाणि एकैकं समुदाहृतम्। ततः शिवेन पीठानां षोड़शानां शतं कृतम्" इति-गोरक्षवाक्यात् "चतुरशीत्यासनानि शिवेन कथितानि च" इतिस्वात्मारामवाक्याच्च चतुरशीतिलक्षसंख्यया षोड़शशतसंख्यया चतुरशीतिसंख्यया च आसनानि मुख्यगौणभेदेन परिगणितानि तथाप्यत्र श्रीमान् गुरुवरःसूत्रकारः कारुण्यपूरितहृदयः सूत्रत्रयेण परमोपयोगीनि मुख्यतमानि चतुःसंख्यकानि सिद्धपद्मस्वस्तिकशवाह्वयान्यासनानि समुदाजहारेति वेदितव्यम्। प्रसङ्गात् श्रमजातजलेन गात्रमर्द्दनविधानं तत्फलञ्च योगशास्त्रोक्तम् व्यपदिश्यते "जलेन श्रमजातेन गात्रमर्द्दनमाचरेत्। दृढ़ता लघुता चैव तेन गात्रस्य जायते" इतिवाक्यात् ।२।३।५।

नाविश्रान्तेन किमप्यनुष्ठेयम् ।२।३।६।

नेति निषेधार्थकमव्ययम्। अविश्रान्तेन परिश्रान्तेन। अत्र साधकेनेति योजनीयम्। किमपि सुकरदुष्करव्यापारमात्रम् नाचरणीयम्

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

अभ्यासी साधकः श्रान्तः सन् विश्रामपर्य्यन्तम् न किमपि कार्य्यङ्कुर्य्यादित्यर्थः। यश्च साधकः दीर्घकालनैरन्तर्य्याभ्यासपाटवेन अतिक्रान्ताभ्यासनिबन्धनशान्तिर्भवति न तस्याभ्यसनावसानाव्यवहितोत्तरकालेऽपि व्युत्थानदशायाम् व्यापारनिषेध इतिरहस्यम् वेदितव्यम्। अपिच अभ्यासिना सर्व्वदापि श्रमजननानुकूलोव्यापारः प्रयासपदवाच्योयोगविघ्नकरत्वादननुष्ठेय एवेतिवेदितव्यम्। "अत्याहारः प्रयासश्च प्रजल्पो नियमग्रहः। जनसंघश्च लौल्यञ्च षडभिर्योगोविनश्यति" इतियोगशास्त्रात्। तथासति अभ्यासजनितश्रमोऽपि श्रमत्वसामान्यात् योगविघ्नकरत्वेनोपपद्यते। ततः तदविधेयत्वमप्युपपद्यते "संविदं लभतेऽभ्यासात् योगोऽभ्यासात्प्रवर्त्तते। मुद्राणां सिद्धिरभ्यासादभ्यासाद्वायुसाधनम्। कालवञ्चनमभ्यासात् तथामृत्युञ्जयोभवेत्। वाक्सिद्धिः कामचारित्वम् भवेदभ्यासयोगतः। तस्मादभ्यसनं नित्यं कर्त्तव्यम्मोक्षकाङ्क्षिभिः। अभ्यासाज्जायते सिद्धिरभ्यासान्मोक्षमाप्नुयात्"इत्यादियोगशास्त्रात् अभ्यासस्य योगनिष्पत्तिहेतुत्वात् योगिनां तस्य अवश्यविधेयत्वं सूचितम्भवति। अभ्यासजनितश्रमोपि विधेय एवेतिसूचितम्भवति। एवमभ्यासजनितश्रमस्य निषेधविधिरूपकोटिद्वयपातित्वात् योगिभिः अभ्यासनिबन्धनं श्रमम् स्वीकृत्य तदपनोदनाय विश्रामपर्य्यन्तं श्रमावहम् न व्यापारमात्रङ्कर्त्तव्यम् वेदितव्यम्। कुसंयोगात् शवासनाऽसम्भवत्वेऽपि येन केन प्रकारेण विश्रामं लब्ध्वैव व्यापारङ्कुर्य्यादित्यर्थः ॥२।३।६

अन्यथा व्याधिसम्भवः ।२।३।७।

अन्यथा अविश्रान्तेन साधकेन कस्मिंश्चिदपि व्यापारमात्रे अनुष्ठिते सति व्याधिसम्भवः रोगसमुत्पत्तिः। अत्र जायते इतियोजनीयम्। "दुःखदौर्मनस्याङ्गमेजयत्वश्वासप्रश्वासा विक्षेपसहभुवः" इतिपातञ्जलयोगसूत्रेण श्वासप्रश्वासयोर्विक्षेपसहभवनम् सूचितम्भवति। श्वासप्रश्वासौ च श्रान्तिसमकालीनौ श्रान्तिजन्यौ लोके दृश्येते। ततः श्रान्तेरपि विक्षेपसहभवनम् व्यज्यते। विक्षेपसहभूतपरिगणनायाञ्च श्रमसचिवश्वासप्रश्वासाभ्यां सार्द्धं दुःखदौर्मनस्याङ्गमेजयत्वानि निरुक्तपातञ्जलसूत्रेणावगम्यन्ते। तेषांदुःखादीनां सहभवनसामान्यात् तैः सह शान्तिसहभवनोपपत्तौ च श्रान्तौ जातायां दुःखपदवाच्यप्रसिद्धरोगसमुत्पत्तिरुपपद्यते। श्रान्तिसद्भावे विश्रान्तिमनपेक्ष्य पुन-

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

व्यापारानुष्ठानेन नितरां श्रमसद्भावे अतिशयेन रोगसमुत्पत्तिरुपपन्नेति वेदितव्यम्। दृश्यतेऽपि लोके विश्रान्तिमनपेक्ष्य व्यवायजलावगाहनातपपरिभ्रमणादिकृतश्रमशालिनां जनानाम् रोगसमुत्पत्तिः। ततोऽन्यथा व्याधिसम्भव इतिनिरुक्तसूत्ररूपा श्रीमत्सूत्रकारोक्तिरुपपन्नेति-वेदितव्यम् ॥२।३।७।

देशम्पूतमनापदम् २।३।८।

देशं योगाभ्यसनस्थानम् पूतम्पवित्रम् गोमयादिलिप्तमितियावत्। यद्वा धार्म्मिकम् तीर्थक्षेत्राश्रमादिरूपम् अनापदम् चोरव्याघ्राद्युपद्रवरहितम् अत्र योगिनोऽधितिष्ठेयुरिति योजनीयम्। तथाचोक्तं योगशास्त्रे "सुराज्ये धार्म्मिके देशे सुभिक्षे निरुपद्रवे। धनुःप्रमाणपर्य्यन्तम् शिलाग्निजलवर्ज्जिते। एकान्ते मठिकामध्ये स्थातव्यं हठयोगिना" "अल्पद्वारमरन्ध्रगर्त्तविवरं नात्युच्चनीचायतम्। सम्यग्गोमयसान्द्रलिप्तममलम् निःशेषजन्तूज्झितम्। वाह्ये मण्डपवेदिकूपरुचिरम् प्राकारसम्वेष्टितम्। प्रोक्तं योगमठस्य लक्षणमिदं सिद्धैर्हठाभ्यासिभिः" इति नन्दिकेश्वरपुराणेत्वेवं योगाभ्यासस्थानलक्षणमुक्तम् "मन्दिरं रम्यविन्यासं मनोज्ञं गन्धवासितम्। धूपामोदादिसुरभि कुसुमोत्करमण्डितम्। मुनितीर्थनदीवृक्षपद्मिनीशैलशोभितम्। चित्रकर्म्मनिवद्धञ्च चित्रभेदविचित्रितम्। कुर्य्याद्योगगृहं धीमान् सुरम्यं शुभवर्त्मना। दृष्ट्वा चित्रगताञ्छान्तान् मुनीन् याति मनःशमम्। सिद्धान् दृष्ट्वा चित्रगतान् मतिरभ्युदये भवेत्। मध्ये योगगृहस्याथ लिखेत् संसारमण्डलम्। श्मशानञ्च महाघोरं नरकांश्च लिखेत् क्वचित्। तान् दृष्ट्वा भीषणाकारान् संसारे सारवर्जिते। अनवसादो भवति योगी सिद्धयभिलाषुकः। पश्यंश्चवाधितान् जन्तून् नतान्मत्तांश्चलद्व्रणान्" इति ॥२।३।८।

श्रीमान् गुरुवरः सूत्रकारः पुनरपि योग्यधिष्ठेयं स्थानं विशिनष्टि-

निर्ज्जनं सुखसेव्यम् २।३।९

निर्ज्जनम् एकान्तम् जनसमागमाभावात् कलहादिरहितमितियावत् जनसमागमेन कलहादिकं विक्षेपनिमित्तीभूतम् योगविघ्नकरं स्यादेव तदुक्तं श्रीमद्भागवते "वासे बहूनां कलहोभवेद्वार्त्ता द्वयोरपि" इति। सुखसेव्यम् पूर्वोक्तैः अरन्ध्रगर्त्तविवरम् निःशेषजन्तूज्झितम् नात्युच्चनीचायतम् रम्यविन्यासम् मनोज्ञम् गन्धवासितम् धूपामोदादि

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

सुरभि कुसुमोत्करमण्डितम् इत्यादिविशेषणैः योगाभ्यासदेशस्य सुख सेव्यत्वमुपपन्नमितिवेदितव्यम् ।२।३।६।

उपवेशनम् कुशवाससैणादीनि ।२।३।१०।

उपविश्यते अस्मिन् अनेनेति वा उपवेशनम् आसनम् । कुशवास सैणादीनि । कुशः दर्भपवित्रादिपदवाच्यः तृणविशेषः । वासः वस्त्रम् । ऐणम् एणाख्यचारुनेत्रमृगविशेषचर्म्म । आदिपदेन कम्वलव्याघ्रचर्म्म-पत्रादीनि गृह्यन्ते । तानि तथाभूतानि अत्र निर्म्मीयन्ते इतियोजनीयम् । उपवेशनानीतिवहुवचनप्रयोगस्थले उपवेशनमित्येकवचनम् जातावेक-वचनमितिशब्दशास्त्रानुमत्या उपवेशनत्वरूपजातिपरमितिवेदितव्यम् । कुशादिभिरासनानि विधीयन्ते इत्यर्थोवेदितव्यः । तथाचोक्तं शिवगी-तायाम् "सर्व्वान् कामानवाप्नोति मनुष्यः कम्वलासने । कृष्णाजिने भवेन्मुक्तिर्मोक्षश्रीर्व्याघ्रचर्म्मणि।कुशासनेभवेज्ज्ञानमारोग्यम्पत्रनिर्म्मिते । पाषाणे दुःखमाप्नोति काष्ठे नानाविधाङ्गदान् । वस्त्रेण श्रियमाप्नोति भूमौ मन्त्रो न सिध्यति" इति । तथाचोक्तम्भगवद्गीतायाम् "शुचौ देशे प्रतिष्ठाप्य स्थिरमासनमात्मनः । नात्युच्छ्रितं नातिनीचं चैलाजिनकुशो-त्तरम्" इति शुचौ मार्ज्जनप्रोक्षणादिक्रियया स्वभावेन वा शुद्धे विजने देशे प्रदेशे नदीतीरगुहादावात्मनः स्वस्यैव ध्यानयोग्यमासनं नात्युच्छ्रितमत्यौन्नत्यरहितम् अत्युन्नतत्वे क्वचित्पारवश्येन चलनपत-नादिविघ्नप्रसङ्गात् । नातितुङ्गम् नातिनीचमतिनिम्नञ्च तथात्वे शैत्यौ-ष्ण्यपाशाणादिघर्षणक्लेशप्रसङ्गात् । ततस्तदुभयविलक्षणम् तत्रापि चैलाजिनकुशोत्तरम् । चैलम् वस्त्रम् । अजिनम् वैयाघ्रम् वा चर्म । कुशा दर्भाः उत्तरम् उपर्य्युपरि व्युत्क्रमेण यस्य तत्तथाभूतम् अधः कुशैः ततः अजिनेन ततोवस्त्रेण आच्छादितमितियावत् । वस्त्रं यद्यपि स्मृत्या निषिद्धम् "वस्त्रं दारिद्यदुःखाय दारु रोगाय चोपलम्" इति तथापि "वस्त्रेण श्रियमाप्नोति" इतिशिवगीतावचनात् तत् कर्म्मकाण्ड-विषयम् नचोपासकयोगिविषयमिति द्रष्टव्यम् । ध्याता स्वस्यैवमासनम-चलम् स्थिरम् निश्चलम् यथा स्यात्तथा प्रतिष्ठाप्य कल्पयित्वेत्यर्थः योगं युञ्जयादिति तत्रत्यपश्चिमश्लोकान्तरादन्वेतव्यम् । एकत्र कुशवस्त्र चर्म्मकम्वलपत्रादिभिःपार्थक्येन आसनकल्पना विधीयते अन्यत्र तु चैलाजिनकुशैः समवेतैरेव तत्कल्पना समर्थ्यते । तत्र सामान्यतः पूर्व्व-कल्पो विधीयते । विशेषतश्च सुखानुभवहेतुत्वेन ध्यानसौकार्य्येण योग-

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

सिद्धिकरत्वात् पश्चिमकल्पोविधीयते इतिवेदितव्यम् । तत्र योग्यतानुसारेण उभयकल्पयोरेकतराऽभ्युपगन्तव्यः । न तत्र कश्चिद्विरोध इतिवेदितव्यम् । अत्र श्रीमद्भगवद्युक्त्या पूर्व्वसूत्रनिर्द्दिष्टोयोगाऽभ्यसनदेशोऽपि प्रसङ्गात् सूत्राकारोक्तिस्वारस्यानुसारेण निर्द्दिष्टः सूत्रकारसम्मतिम्पोषयतीतिवेदितव्यम् ॥२।३।१०।

इति परमपूज्यपादश्रीमद्योगदत्तशर्म्मकृतामृतोपदेशे पूज्यपादश्रीमद्योगदत्तशर्म्मशिष्यश्रीमत्सत्यनारायणशर्म्मकृतभाष्ये द्वितीयाध्यायस्य तृतीयः पादः समाप्तः ॥

ततश्चान्तर्नाड्यामपानप्रवेशः । २ । ४ । १ ।

ततः पूर्व्वनिर्द्दिष्टाविमुक्तसेवनाद्यभ्यासानन्तरम् । चेति पुनरर्थकमव्ययम् । अन्तर्नाड्याम् ईडापिङ्गलयोर्मध्यस्थायाम् सुषुम्नायाम् अपानप्रवेशः अपानस्य अधोगतिकस्य गुदस्थितस्य वायोः प्रवेशः अन्तर्गमनम् । अत्र भवतीति योजनीयम् । उक्तञ्च योगशास्त्रे "विधिवत्प्राणसंयामैर्नाड़ीचक्रेविशोधिते । सुषुम्ना वदनम्भित्वा सुखं विशति मारुतः" इति "अपाने ऊर्ध्वगे जाते प्रयाते वह्निमण्डलम्" इत्याद्युक्तिरपि तत्र अपानप्रवेशम् उपपादयतीतिवेदितव्यम् ॥२।४।१।

स च चक्रभेदस्य निमित्तम् । २ । ४ । २ ।

स अपानप्रवेशः चेतिकुण्डलनीबोधादि समुच्चिनोति चक्रभेदस्य मूलाधारादिचक्राणाम् भेदस्य स्फुटनस्य निमित्तम् हेतुः । अत्र भवतीति योजनीयम् । उक्तञ्च योगशास्त्रे "वायुस्तत्र प्रविश्याजगून्थिन्भित्वाऽजपंकजम् । करोत्यूर्ध्वमुखं तस्मिन् प्रविष्ट्यन्तरथध्वनिः । क्रमान्मेघनिनादाभो जायते तेन बुध्यते" इति । तेन बुध्यते अत्र तेन शब्दोत्तरे कुण्डलनीपदम् अध्याहार्य्यम् ततः अन्तर्नाड्यामपानप्रवेशात् कुण्डनीबोध उपपद्यते । उक्तञ्च शिवसंहितायाम् "सुप्ता गुरुप्रसादेन यदा जागर्त्ति कुण्डली । तदा सर्व्वाणि पद्मानि भिद्यन्ते ग्रन्थयोपि च" इति । अपिचोक्तमीश्वरमीननाथसम्वादे "यदा परिचये शक्तिश्चलितोर्ध्वमुपैति सम् । षट्चक्राणि क्रमाद्भित्वा तदा स्युरणिमादयः । पुरा गून्थित्रयम् भित्वा यात्यूर्ध्वं मरुतोरगी । स्फुटन्ति पृष्ठवंशास्थिगून्थयो योगिनस्तदा । वायुस्तदैव सर्व्वाङ्गे लीनोभवति संजितः । धीरैः केवलकुम्भस्स उच्यते सर्व्वसिद्धिदः । मूलाधारे यदापानो भित्वोर्ध्वं याति वेगतः । तदातीता

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

नागतज्ञो योगी भवति मद्विधः। क्षितिं भित्वोर्ध्वगापानक्षोभिता स्याद्य-दोरगी। तदा नादोत्पत्तिरस्य जायते योगिनो हृदि" इत्यादि ब्रह्ममुद्राव-ज्ञेत्यादिसंज्ञकद्वात्रिंशत् ग्रन्थीनां भेदनफलानि क्रमेणाभिहितानि तानि चात्र ग्रन्थविस्तारभिया न लिखितानि सनातनसिद्धान्ते ईश्वर-पितामहसम्वादात् तदवगतिः मुमुक्षुभिः कार्य्येत्यवगन्तव्यम्।२।४।२।

नादाभिव्यक्तेश्च ।२।४।३।

नादाभिव्यक्तेः शब्दाविर्भावस्य। चेति पुनरर्थकमव्ययम्। अत्र सनि-मित्तम्भवतीति योजनीम्। अपानप्रवेशो नादमभिव्यनक्तीत्यर्थः। तथा-चोक्तं योगशास्त्रे "सोऽन्तरात्मा तदा देवो नादात्माजायते स्वयम्। यथा संस्थानभेदेन स भूयो वर्णतां गतः। वायुना प्रेर्य्यमाणोऽसौ पिण्डा-द्व्यक्तिः प्रजायते" इति। तथा चोक्तं श्रीमद्भागवते "स एष जीवो वि-वरप्रसूतिः प्राणेन घोषेण गुहाम्प्रविष्टः। मनोमयं सूक्ष्ममुपेत्य रूपम् मात्रा स्वरो वर्ण इति स्थविष्ठः" इति अस्यार्थः स एषोऽपरोक्षः जीव-यतीति जीवः परमेश्वरः अपरोक्षत्वे हेतुः विवरेष्वाधारादिचक्रेषु प्रसूतिरिव प्रसूतिरभिव्यक्तिर्यस्य स तथाभूतः तामेवाभिव्यक्ति-माह–घोषेणेति। घोषेण पराख्येन नादवता प्राणेन सह गुहामाधारच-क्रम्प्रविष्टः सन् मनोमयं सूक्ष्मं रूपम् पश्यन्त्याख्यम् मध्यमाख्यम् च मणिपूरचक्रे विशुद्धचक्रे चोपेत्य प्राप्य वक्त्रे मात्राह्रस्वादिः स्वर उदात्तादिः वर्णः ककारादिरित्येवम् वैखर्य्याख्यः स्थविष्ठोऽतिस्थू-लो नानावेदशाखात्मको भवति। तथा च श्रुतिः "चत्वारि वाक्परिमि-तपदानि तानि विदुर्ब्राह्मणा ये मनीषिणः। गुहायां त्रीणि निहितानि नेङ्गयन्ति तुरीयं वाचो मनुष्या वदन्ति" इति। अस्याः श्रुतेरर्थः वाक्-परिमितानि वाचः परिमितानि शास्त्रनिर्णीतानि चत्वारि पदानि स्थानानि परा पश्यन्ती मध्यमा वैखरीति तानि च ये ब्राह्मणा मनी-षिणोऽध्यात्मकुशलास्ते विदुः तेषाम्मध्ये त्रीणि पदानि गुहायां शरीरे आधारनाभिहृदयेषु निहितानि नेङ्गयन्ति न जानन्ति तुरीयं चतुर्थं वैखर्य्याख्यम् मनुष्या वदन्ति मनुष्याणाम्वदने वर्त्तमानोऽर्थबोधकः शब्दो भवतीत्यर्थः। अभियुक्तश्लोकश्च "यासामित्रावरुणसदनादुच्च-रन्ती त्रिषष्टिम् वर्णानन्तः प्रकटकरणैः प्राणसङ्गात्प्रसूते। ताम्पश्यन्ती-म्प्रथममुदिताम् मध्यमां बुद्धिसंस्थाम् वाचम्वक्त्रेकरणविशदास्वै-खरीञ्च प्रपद्ये" इति। श्लोकार्थश्च तां त्रिविधाम्भारतीम्प्रपद्ये या

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

सा भारती मित्रावरुणसदनात् अग्निसोमस्थानात् उच्चरन्ती उद्भवन्ती मित्रोऽग्निर्वरुणः सोमः तयोः सदनमावासस्थानम् परमात्मा यतः श्वासस्य शीतोष्णत्वम् तस्मादुच्चरन्ती त्रिषष्टिवर्णान् जनयति अइउवर्णा ह्रस्वदीर्घप्लुतभेदेन त्रिविधा नव ऋकारः प्लुतहीनो द्विविधः ऌकारो द्विविधो दीर्घहीनः सन्ध्यक्षराणि ह्रस्वहीनान्यष्ट एवमेकविंशतिः स्वराः स्पर्शाः पञ्चविंशतिः कादयो मान्ताः यादयोऽष्टावन्तस्था ऊष्माणश्च अनुनासिकाः पञ्च अनुस्वारविसर्गौ जिह्वामूलीयोपध्मानीयौ चेति त्रिषष्टिः एतान् वर्णान् वायुसङ्गजान् प्रकटकरणैर्बुद्धिंगतैः प्रत्यक्षरूपैरिन्द्रियैरन्तःपश्यति न तूच्चारयति सा पश्यन्त्याख्या तां प्रथममुदितामुत्पन्नाम्बुद्धिसंस्थामुच्चारयामीतिविचारयुक्ताम् मध्यमाम् मुखेऽवस्थितां करणविशदां स्थानप्रयत्ननिर्म्मलाम् वैखरीञ्च प्रपद्ये इति। तथा चोक्तं योगशास्त्रे "सूक्ष्मा कुण्डलनी मध्ये ज्योतिर्मात्रस्वरूपिणी अश्रोत्रविषया तस्मादुद्गच्छन्त्यूर्ध्वगामिनी। स्वयम्प्रकाशा पश्यन्ती सुषुम्नामाश्रिता भवेत्। सैव हृत्पाङ्कजम्प्राप्य मध्यमा नादरूपिणी। ततः सङ्कल्पमात्रा स्यादभिव्यक्तोर्ध्वगामिनी। सैवोरःकण्ठतालुस्था शिरोघ्राणोदरस्थिता। जिह्वामूलौष्ठनिश्वासरूपवत्वपरिग्रहा। शब्दप्रपञ्चजननी श्रोत्रग्राह्या तु वैखरी" इति। तत्र परा पश्यन्ती मध्यमा वाक् योगिभिरेवाध्यात्मकुशलैरवगम्या भवति। वैखरी तु सर्वैरवगम्यत इतिवेदितव्यम्। "तानि विदुर्ब्राह्मणा ये मनीषिणः" इत्यादिश्रुतिभिः परादिवाक्त्रितयी योगिभिरेवावगम्येत्युपपन्नम्भवति "अनाहतन्तु यच्छब्दं तस्य शब्दस्य यत्परम्। तत्परञ्चिन्तयेद्यस्तु स योगी छिन्नसंशयः" इति ध्यानोपनिषद्वाक्यात् "नादाभिव्यक्तिरारोग्यं जायते नाड़िशोनात्" "शुद्धसुषुम्नासरणौ स्फुटममलः श्रूयते शब्दः" इत्यादिस्वात्मारामवाक्यात् "भ्रुवोर्मध्ये पद्ममेकं द्विदलन्तत्र शोभितम्। हंस अक्षरसंयुक्तं वर्त्तते वायुमण्डले। तन्मध्ये त्वात्मज्योतिश्च शिखरे तु विराजते। नीवारशूकवत्तन्वी पीता भास्वत्यनूपमा" इत्यादिकपिलगीतावाक्याच्च। योगिनां साधारणजनानवाप्या अनाहतादिचक्रे नादाभिव्यक्तिरुपपद्यत इति वेदितव्यम्। शब्दब्रह्मैव परानाम शब्दावस्था सैव चैतन्यरूपा कुण्डनीशक्तिपदवाच्या भवति सैव शक्तिः पश्यन्त्यादिपदवाच्या वेदादिरूपिणी भवतीतिशब्दक्रमो वेदितव्यः। तथा च स्मर्य्यते "शक्तिस्ततो ध्वनिस्तस्मात् नादस्तस्मान्निरोधिका। ततोऽर्धेन्दुस्ततो बिन्दुस्तस्मादासीत्परा ततः। पश्यन्ती मध्यमा वाक् च वै-

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

खरी सर्व्वजन्मभूः" इति। तत्र सत्त्वप्रतिष्ठा चिच्छक्तिपदवाच्या भवति। सा चाभ्यासशालिनः पुरुषस्य स्फोटरूपेणोपलभ्यमाना ध्वनिपदवाच्या भवति। सैव सत्त्वप्रतिष्ठा रजोगुणानुविद्धा नादपदवाच्या व्यक्तावस्था भवति। सैव तमःप्रचुरा निरोधिकाशब्दवाच्या भवति। सैव सत्त्वानुविद्धा अर्धेन्दुपदवाच्या भवति। अर्धेन्दुद्वयसम्बन्धात् बिन्दुपदवाच्या भवति। अयमेव बिन्दुर्मूलाधारेऽभिव्यज्यमानः परा स्वाधिष्ठाने पश्यन्ती हृदि मध्यमा जिह्वायां वैखरीत्यभिधीयते इति शास्त्रसम्मतिर्वेदितव्या मुमुक्षुभिः साधकैः। उक्तञ्च नादश्रवणफले योगशास्त्रे "बद्धन्तु नादबन्धेन मनः संत्यक्तचापलम्। प्रयाति सुतरां स्थैर्य्यं छिन्नपक्षः खगो यथा। नादोऽन्तरङ्गसारङ्गबन्धने वागुरायते। अन्तरङ्गकुरङ्गस्य बधे व्याधायते पि च। बद्धं विमुक्तचाञ्चल्यं नादगन्धकजाररणात्। मनःपारदमाप्नोति निरालम्बाख्यखेटनम्। नाद श्रवणतः क्षिप्रमन्तरङ्गभुजङ्गमः। विस्मृत्य सर्व्वमेकाग्रः कुत्रचिन्नहि धावति" इत्यादि शतसहस्रशःयोगोक्तिभिः नादाभिव्यक्तिः चित्तं स्थिरीकृत्य एकाग्रताभूमिं समाधिं सम्पादयतीत्युक्तम्भवति। "अनाहतस्य शब्दस्य ध्वनिर्य उपलभ्यते। ध्वनेरन्तर्गतं ज्ञेयं ज्ञेयस्यान्तर्गतं मनः। मनस्तत्र लयं याति तद्विष्णोः परमम्पदम्" इत्यादियोगशास्त्रोक्त्या नादाभिव्यक्तिः निर्विकल्पकसमाधिं सम्पाद्य विष्णुपदवाच्यब्रह्मप्राप्तिरूपकैवल्यं सम्पादयतीत्युक्तम्भवति। ततो नादाभिव्यक्तौ अविमुक्तसेवनादिभिरुपायैर्यतितव्यम् योगिभिरिति वेदितव्यम्। नादाभिव्यक्तिर्द्विधा भवति। तत्र अन्तर्नाड्यामपानः प्रविश्य दहराद्याकाशताड़नद्वारा तत्र तत्र नादाभिव्यक्तिं सम्पादयति। तथाचोक्तं योगशास्त्रे "क्षितिम्भित्वोर्ध्वगापानक्षोभिता स्याद्यदोरगी। तदा नादोत्पत्तिरस्य जायते योगिनो हृदि" इति इयमेका नादाभिव्यक्तिः अस्माकं राजयोगिनां परमादरभूमिः इयमेव प्रणववरुणबीजमहाजसदृशध्वनिमातृकाक्षरमहावाक्यादिरूपेण परिणता साधकानां संशयं विच्छिद्य ज्ञानन्निष्पाद्य कृतकृत्यतामावहतीति योगिरहस्यं वेदितव्यम्। अपरा तु नादाभिव्यक्तिः कर्णपिधानपूर्व्वकम् षण्मुखीमुद्रासाधनपूर्व्वकं वा विनापि ताभ्याम् समाहितमनोयोगमात्रपूर्व्वकं वा वाय्वाघातमन्तरेणापि इयं नादाभिव्यक्तिः नैसर्गिकम् सुषुम्नान्तस्थं प्राणघोषपदवाच्यं नादमनुसंदधानस्य अभ्यासशालिनो भवतीति वेदितव्यम्। तथाचोक्तं योगशास्त्रे "मुक्तासने स्थितायोगी मुद्रां सन्धाय शाम्भवीम्। शृणुयाद्दक्षिणे कर्णे नादमन्तस्थमे-

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

कधीः'' इति "कर्णौ पिधाय हस्ताभ्याम्" इत्याद्युक्तत्वात् उभयकर्ण-पिधानसम्मतिरपि व्यज्यत इति वेदितव्यम्। श्रवणपुटनयनगोलक-घ्राणमुखानां निरोधनङ्कार्य्यम् "शुद्धसुषुम्नासरणौ स्फुटममलः श्रूयते नादः" इतियोगोक्तिःप्रकृतम्प्रमापयति। इदमेव साधनं षण्मुखीमुद्रापद-वाच्यम् भवति। पराङ्मुखीमुद्रापदवाच्यम् ज्योतिष्मतीमुद्रापदवाच्यम् चेति वेदितव्यम्। निरोधनप्रकार उच्यते "अङ्गुष्ठाभ्यामुभौ कर्णौ त-र्ज्जनीभ्याञ्च चक्षुषी। नासापुटौ तथान्याभ्याम्प्रच्छाद्य करणानि च" इति योगोक्त्या चकारात् तदन्याभ्याम्मुखम् सिद्धासने स्थित्वा पाद-पार्ष्णिभ्यां गुदलिङ्गे च प्रच्छाद्येति समुच्चीयते। श्रवणनयनघ्राणमुख गुदलिंगानीति षट्संख्यकानामेतेषाम् मुद्रणादियम्मुद्रा षण्मुखीपद-वाच्या भवतीति वेदितव्यम्। अत्र श्रवणनयनघ्राणानां द्वित्वेन लब्धषट्-संख्यया सह मुखगुदलिंगानां त्रिसंख्यायाः समायोगात् नवसंख्या-लाभात् इयमेव मुद्रा प्रसिद्धनवद्वारसंयमरूपसाधनमुपपन्नमिति वेदित-व्यम्। अत्र बाह्येन्द्रियाणां सम्मुखीभूतशब्दादिवाह्यविषयेभ्यो वृत्तिनि-रोधात् प्राङ्मुखीभवनात् इयं प्राङ्मुखीपदवाच्या भवतीति वेदितव्यम्। अत्र च अन्तर्दृष्ट्यां ज्योतिःप्रकाशसद्भावात् इयमेव मुद्रा ज्योतिष्मती पदवाच्या भवतीति वेदितव्यम्। अत्र साधकानाम्वृत्तिवै लक्षण्येन दीप-कलिकादिरूपेण नानाप्रकारज्योतिराविर्भवतीति वेदितव्यम्। "सर्व्वचि-न्ताम्परित्यज्य सावधानेन चेतसा। नाद एवानुसन्धेयो योगसाम्राज्यमि-च्छता" इत्युक्त्वा इयं नादानुसन्धानरूपनादाभिव्यक्तिः गोरक्षनाथादि हठयोगिसम्मता विविधफलप्रसूर्भवतीति वेदितव्यम्। तथा चोक्तं त्रिपुरासारसमुच्चये "विजितो भवतीह तेन वायुःसहजो यस्य समुत्थितः प्रणादः। अणिमादिगुणा भवन्ति तस्यामितपुण्यस्य महागुणोदयस्य। सुरराजतनूजवैरिरन्ध्रे विनिरुध्यस्वकरांगुलिद्वयेन जलधेरिव धीर-नादमन्तःप्रसरन्तं सहसा शृणोति मर्त्यः" इति नादश्रवणविषयिण्यः विविधाः प्रक्रियाः योगशास्त्रेषूपदिश्यन्ते। ताश्च ग्रन्थविस्तारभिया नात्र व्यपदिष्टाः ताश्च हठदीपिकादियोगशास्त्रैरवगन्तव्या मुमुक्षु-भिः साधकैरिति ॥२।४।३।

आरम्भे स्वेदकम्पादिः ।२।४।४॥

आरम्भे प्रत्याहारादिसमाध्यन्तयोगसाधनानां पूर्व्वस्थितिभूतप्रा-णायामरूपाभिक्रमे स्वेदकम्पादिः स्वेदो घर्म्मः। कम्पो वेपथुःशरीरास्थै

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

र्य्यमित्यर्थः। आदिशब्देन ब्रह्मरन्ध्ररूपस्थानप्राप्तिर्गृह्यते। अत्र जायते इति योजनीयम्। तथाचोक्तं योगशास्त्रे "कनीयसि भवेत्स्वेदः कम्पो भवति मध्यमे। उत्तमे स्थानमाप्नोति ततो वायुं निबन्धयेत्" इति अत्र-कनीयसीत्यादिविशेषणत्रयम्प्राणायामं विशिनष्टि। ततः स्वेदानुमेयः कनिष्ठः प्राणायामः कम्पानुमेयो मध्यमः ब्रह्मरन्ध्ररूपस्थानप्राप्त्यनुमेय उत्तम इत्युक्तम्भवतीति वेदितव्यम् ॥२।४।४॥

प्रतिचक्रं नादवैचित्र्यम् । २।४।५ ॥

प्रतिचक्रं एकैकञ्चक्रञ्चक्रम्प्रति नादवैचित्र्यं शब्दवैलक्षण्यम्। अत्र भवतीति योजनीयम्। मूलाधारादिब्रह्मरन्ध्रान्तसर्व्वेषु षट्सु चक्रेषु पद्मपदवाच्येषु पार्थक्येन घण्टानादादिभेदेन नाना नादा आविर्भवन्तीत्यर्थो वेदितव्यः। तथाचोक्तं योगशास्त्रे "मृदङ्गनादोत्पत्तिस्तु मणिपूरभिदा भवेत्। अनाहतविभेदेन घण्टाध्वनिरुदेति च। विशुद्धचक्रभेदेन यन्त्रनादःप्रजायते" इत्यादि। उक्ता च स्वात्मारामेण "ब्रह्मग्रन्थिरूपशून्यपदवाच्यहृदाकाशविष्णुग्रन्थिरूपातिशून्यपदवाच्यविशुद्धाकाशरुद्रग्रन्थिरूपमहाशून्यपदवाच्यभ्रूमध्याकाशब्रह्मरन्ध्राकाशेषु क्रमेण आरम्भघटपरिचयनिष्पत्त्यवस्थाभूमिषु क्वणकभेरीमर्द्दलवीणानादानुकारिनादाभिव्यक्तिः। उक्तञ्च त्रिपुरासारसमुच्चये "आदौ मत्तालिमाला जनितरवसमस्तारसंस्कारकारी नादोऽसौ वांशिकस्यानिलभरितलसद्वंशनिस्वानतुर्य्यः। घण्टानादानुकारी तदनु च जलधिध्वानधीरो गभीरो गर्ज्जन् पर्य्यन्यघोषः पर इह कुहरे वर्त्तते ब्रह्मनाड्याः" इति। स्वात्मारामस्त्वाह–"आदौ जलधिजीमूतभेरीझर्झरसम्भवाः। मध्ये मर्द्दलशङ्खोत्था घण्टाकाहालजास्तथा। अन्ते तु किङ्किणीवंशवीणाभ्रमरनिस्वनाः" इति। एवमन्यत्र हंसोपनिषदि शिवपुराणादौ च प्रकारान्तरेण नादक्रमोऽभिधीयते। तथासति तेषामन्योन्यविरोधात् महदासमञ्जस्यमापतति। तत्परिहाराय निगद्यते। क्वचित् वाय्वाघातसञ्जातचक्रभेदमन्तरापि अभ्यासशालिना अनुसन्धीयमान आभ्यन्तरिकः साधकेतरानुपलभ्यमानः भिन्नक्रमो नादः श्रूयते। क्वचित् वाय्वाघातसञ्जातसमुत्पन्न आभ्यन्तरिकोऽपि संशुद्धनाड़िकस्य योगिनः निरुक्तक्रमभिन्नक्रमो नादः श्रूयते। क्वचित् क्षेत्रविन्याससाधनाभ्यासवैचित्र्यसचिवः साधकानामपरक्रमो नादः श्रूयते। इतियोगिसम्प्रदायरहस्यम् वेदितव्यम्। नचात्र विवदितव्यं साधकैर्मुमुक्षुभिः ॥२।४।५॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

निष्पत्तौ यन्त्रवन्नादः ।२।४।६।

निष्पत्तौ योगशास्त्रप्रसिद्धनिष्पत्त्यवस्थायाम् नादाभिव्यक्तिपराकाष्ठायामितियावत् । यन्त्रवन्नादः वीणाख्ययन्त्रसदृशशब्दः अत्र जायते इति योजनीयम् । तथाचोक्तं योगशास्त्रे"निष्पत्तौ वैणवः शब्दः नदद्वीणाक्वणो भवेत्" इति । यद्यपि "क्रमान्मेघनिनादाभो जायते तेन बुध्यते" इतियोगशास्त्रोक्तेः "दशमो मेघनादः"इतिहंसोपनिषदुक्तेश्च । निष्पत्तौ मेघध्वनिरुपपद्यते । तथापि पूर्व्वोक्तनादवैचित्र्यविरोधप्रतिवचनवत् अत्रापि प्रतिवक्तव्यमिति वेदितव्यम्।निष्पत्तावपि यन्त्रनादाभिव्यक्त्यव्यवहितपूर्व्वकाले वैणवपदवाच्यो वेणुसदृशनादो जायते इति"निष्पत्तौ वैणवः शब्दः"इत्युक्तया यन्त्रनादोक्तिर्न विरुध्यते इतिं वेदितव्यम् ।२।४।६।

गात्रविक्षेपश्च ।२।४।७।

गात्राणां करचरणादीनां विक्षेपः चलनम् । चकारः पुनरर्थकः । अत्र भवतीति योजनीयम् । अभ्यासशालिनः गात्रेषु वायुसञ्चरणात् गात्रसञ्चारो जायते इत्यर्थो वेदितव्यः। यद्यपि मध्यमप्राणायामेऽपि कम्पोऽभिधीयते तथापि लिङ्गपुराणे प्रस्वेदकम्पनोत्थानजनकश्चेत्येकत्र व्यपदिश्य क्रमेणान्यत्र ध्वनिसम्वित्तिरङ्गमोटनकम्पनम् इतिव्यपदेशात् नायङ्गात्रविक्षेपो मध्यमप्राणायामसहभूः किन्तु कुम्भकनिष्पत्त्यनन्तरकालीनइति वेदितव्यम् । अपिच प्रथमं ध्वनिसंवित्तिरित्युक्तिर्दृश्यते । तदनन्तरम् अङ्गमोटनकम्पनम् इतिच ततश्च नादाभिव्यक्त्यनन्तरमेव सूत्रकारस्वरसानुसारी निष्पत्त्यवस्थितिसमकालीनोऽयङ्गात्रविक्षेप उत्युपपद्यत इति वेदितव्यम् ।२।४।७।

मुद्रान्यासात्मकानेकविधः ।।२।४।८।।

गात्रविक्षेपः किमात्मको जायते इत्याकाङ्क्षायाम् श्रीमान् सूत्रकारः तं विशिनष्टि। मुद्रान्यासात्मकानेकविधःमुद्रा योगशास्त्रप्रसिद्धा क्लेशान् मुद्रणातीतिव्युत्पत्तिमती महामुद्रा महाबन्धमहावेधखेचर्य्युड्डीयानमूलबन्धजालन्धरविपरीतिकरी वज्रोलीशक्तिचालनप्रभृतयः तन्त्रशास्त्रप्रसिद्धा योनिधेन्वङ्कुशाद्याः न्यासः हृदयाद्यङ्गेषु कराङ्गुल्यादिस्थापनरूपःषडङ्गमातृकाव्यापकषोढादिपदवाच्यःतौ मुद्रान्यासौ

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

तदात्मकः तत्स्वरूपकः स चानेकविधः अनेके बहवो विधाः प्रकाराः यस्य स तथाभूतः "अङ्गमोटनकम्पनम्" इति लिङ्गपुराणोक्तेः अस्य गात्रविक्षेपरूपकम्पनस्य अङ्गमोटनत्वोपपत्तौ मुद्रान्यासात्मकत्वम् व्यक्तमिति वेदितव्यम्। यद्यपि प्रायशः शास्त्रेषु नायम्मुद्रान्यासात्मको गात्रविक्षेपो व्यपदिश्यते तथापि योगाभिज्ञैरनुभूतोयम् परमरहस्योविक्षेपः श्रीमता सूत्रकारेण योगिवर्य्येण स्वयमप्यनुभूतोऽत्र शिष्यप्रबोधायोपदिष्ट इति वेदितव्यम् ।२।४।८।

ज्वलनञ्चक्रमध्यगं द्वीपाकाराऽचिरस्थायि ॥२।४।९॥

ज्वलनं ज्वालानुभवनम्। चक्रमध्यगम् अनाहतचक्राद्यन्तस्थम्। द्वीपाकारम् द्वीपस्य आकारो यस्य तच्च अचिरस्थायि अल्पकालस्थितिशीलं द्वीपाकाराचिरस्थायीति समस्तम्पदं वेदितव्यम्। अत्र भवतीति योजनीयम्। तथाचोक्तमुत्तरगीतायाम् "जीवे परेण तादात्म्यं सर्व्वगं ज्योतिरीश्वरः। प्रमाणलक्षणैर्ज्ञेयं स्वयमेकाग्रवेदिना" इति। उक्तञ्चस्वात्मारामेण "अपाने ऊर्ध्वगे जाते प्रयाते वह्निमण्डलम्। तदाऽनलशिखादीर्घा जायते वायुनाऽऽहता" इति। उक्तञ्च योगियाज्ञवल्क्येन "देहमध्ये शिखिस्थानं तप्तजाम्बूनदप्रभम्। त्रिकोणन्तु मनुष्याणां चतुरस्रञ्चतुष्पदाम्। मण्डलन्तु पतङ्गानां सत्यमेतद्ब्रवीमि ते। तन्मध्ये तु शिखा तन्वी सदा तिष्ठति पावके" इति। यद्यपि निरुक्तपावकशिखा मनुष्यपशुपक्ष्यादिप्राणिसाधारण्येन वह्निमण्डलवर्तिनी वर्त्तते इतिनिरुक्तयोगियाज्ञवल्क्योक्त्या सिध्यति तथापि परमेश्वरचमत्कृत्या न सा तेषान्तापमनुभावयति। योगिनान्तु सा शिखा वायुहता प्रज्वलन्ती सती तापकारिणी जायते। स च तापः अमरवारुण्यादिरसशैत्येन शीतली शीतकार्य्यादिकुम्भकोद्भूतवायुहतिवेगप्रशान्तौ प्रशाम्यति। अत एव तत्तापस्य श्रीमत्सूत्रकारसूत्रितज्वलनपदवाच्यस्य दीर्घकालनैरन्तर्य्यसचिवसद्भावासत्त्वात् अचिरस्थायित्वं प्रतिज्ञातं श्रीमता सूत्रकारेणेति रहस्यं योगाभिज्ञवेद्यं वेदितव्यम्। तत्र अमरवारुणी रसजातशीतली शीतकार्य्यादिकुम्भकोद्भूतशैत्याभ्यां कतिपयदिनस्थायिबाह्याभ्यन्तरिकसकलदेहव्यापितापानुभवशान्तिजातवायुहतिवेगशान्त्या कतिपयक्षणमात्रस्थायिद्वीपाकृतिचक्रमध्यगशिखा प्रशाम्यतीति योगीन्द्रानुभूतिवेद्यं वेदितव्यम् "हृदयाग्निर्ज्वलज्ज्वालोददाह मलिनं वपुः" इत्यादियोगशास्त्रोक्तिरपि प्रकृतम्पोषयतीति वेदितव्यम् ।२।४।९।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

आत्ममन्त्राक्षरयोरन्योन्यस्थितिविनिमयश्च ॥२।४।१०॥

हंस इति आत्ममन्त्रस्याक्षरयोः बिन्दुविसर्गावसानकयोः हंकारसकारयोः अन्योन्यस्थितिविनिमयः सोऽहमित्याकारेण परस्परसमन्वयः। चकारः पुनरर्थकः। उक्तञ्च शारदायाम् "पुम्प्रकृत्यात्मकौ प्रोक्तौ बिन्दुसर्गौ मनीषिभिः। ताभ्यां क्रमात्समुद्भूतौ बिन्दुसर्गावसानकौ। हंसौ तौ पुम्प्रकृत्याख्यौ हम्पुमान् प्रकृतिस्तु सः। अजपा कथिता ताभ्यां जीवो यामुपतिष्ठते। पुरुषं स्वाश्रयं मत्वा प्रकृतिर्नित्यमात्मनः। यदा तद्भावमाप्नोति तदा सोऽहमियम्भवेत्" इति। एतावता उक्तम्भवति प्राणायामावसरे हंस इत्यजपाजपशालिनोऽभ्यासिनः निरुक्ताजपापदवाच्यहंसइत्यात्ममन्त्रः अभ्यासक्रमेण स्वयमेव सोऽहमित्याकारेण परिवर्त्तत इति अभ्यासी प्राणायामसहचरप्राणापानौ हंस इत्यात्ममंत्रजपात् परिवृत्त स्थितिकौ सम्पादयन् अभ्यासतः स्वयमेव उपस्थितं सोऽहमित्याकारेण परिणतं निरुक्तमन्त्रं समासाद्य तज्जपानुकूलमेव प्राणायाममभ्यसतीत्यर्थो वेदितव्यः ॥२।४।१०।

मातृकानादस्याभिव्यक्तिः ।२।४।११।

मातृकानादस्य सानुस्वाराकारादिक्षकारान्तमूलाधारादिषट्चक्रान्तर्वर्त्तिपञ्चाशद्वर्णध्वनेः अभिव्यक्तिः प्राकट्यम्। अत्र जायते इति योजनीयम्। यद्यपि शब्दस्य पूर्व्वावस्थाविशेषः परापश्यन्तीमध्यमापदवाच्यः सूक्ष्मरूपः न सर्व्वजनताश्रुतिगोचरो भवति। उत्तरावस्थाविशेषः वैखरीपदवाच्य एव स्वरव्यञ्जनात्मा स्थूलरूपः सर्व्वैराकर्ण्यते अतीन्द्रियवस्तुदृशाम् आभ्यन्तरिकशब्दस्पर्शरूपरसगन्धविषयविदां योगैश्वर्यवतां योगिनान्तु निरुक्तपूर्व्वावस्थाविशेषोऽपि सूक्ष्मरूपः समाहितस्थितौ श्रुतिगोचरो भवतीति वेदितव्यम्। सूत्रितञ्च तथा सूत्रद्वयेन श्रीमता योगाचार्य्येण पतञ्जलिना "प्रवृत्त्या लोकन्यासात् सूक्ष्मव्यवहितविप्रकृष्टज्ञानम्" "ततः प्रातिभश्रावणवेदनादर्शास्वादवार्त्ता जायन्ते" इति "अक्षराणि समात्राणि सर्व्वे बिन्दुसमाश्रिताः" इत्युक्तेः मातृकाक्षराणां बिन्दुसमाश्रयोपपत्तौ सानुस्वारत्वमुपपन्नमिति वेदितव्यम्। ननु "सोऽन्तरात्मा तदा देवो नादात्माजायते स्वयम्। यथा संस्थानभेदेन स भूयो वर्णतां गतः" इत्युक्तेः अभिव्यक्तनादानाम् योगिनां आभ्यन्तरिकनाद एव मातृकाक्षररूपेण परिणतो भवतीत्युपपद्यते। "बिन्दुर्नादेन

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

भिद्येत" इत्युक्तेस्तु बिन्दुः नादकार्य्यम् अक्षरकारणञ्च भिद्यते स्वरव्यञ्जनादिनानारूपेणाविर्भवतीति उपपन्नम्भवति। एवमुभयवाक्यविरोधापत्तिरापतति तन्निराशाय निगद्यते वर्णकार्य्यम्प्रति नादस्य वर्णकारणबिन्दुजनकत्वेन परम्पराकारणत्वम् बिन्दोस्तु नादकार्य्यस्य तम्प्रति साक्षात्कारणत्वमित्यविरोधो वेदितव्यः। भवति च ज्योतिर्विदामभ्युपगमः बिन्दवः समुदायभावेन सम्भूय रेखाकृतिमधिगच्छन्ति। रेखैव च विन्यासविशेषवती अक्षररूपिणी लोकेदृश्यते। ततोपि बिन्दोरक्षरम्प्रति कारणत्वमुपपद्यते। एतावता उक्तम्भवति अभ्यासशालिनः अभ्यासकाले सोऽहमित्याकारसम्पत्त्यनन्तरम् तत्रत्यनादबिन्दुसम्भवानि मातृकाक्षराणि स्वयमुपस्थितानि अभ्यासिभिःउपलभ्यन्ते। यदा कुण्डलनीशक्तिः उत्थाय ऊर्ध्वाभिमुखम्प्रस्थीयते तदा मातृकाक्षराणि आगममन्त्ररूपाणि सम्पद्य स्वयमुपस्थीयन्ते इतिरहस्यंवेदितव्यम्। उक्तञ्चागमे "नादाख्यम्पदमर्धचन्द्रकुटिलं संविन्मयीं शाश्वतीम्। यान्तीमक्षररूपिणीं विमलधीर्ध्यायेद्विभुं तेजसाम्"इति। अत्र अक्षररूपिणीमितिशब्देन कुण्डलिन्याः अक्षरं रूपयतीतिव्युत्पत्त्या मातृकाक्षराभिव्यञ्जकत्वं सिद्धमिति वेदितव्यम् ॥२।४।११।

तद्वत्प्रणवस्याऽपि ।२।४।१२।

तद्वत् मातृकानादस्याभिव्यक्तिवत्। प्रणवस्य ओंकारस्य। अपिशब्दः अव्ययात्मा समुच्चयार्थः। अत्र अभिव्यक्तिर्जायत इति योजनीयम्। तथाचागमे "सकारार्णम् हकारार्णम् लोपयित्वा प्रयत्नतः। सन्धिङ्कुर्य्यात् पूर्व्वरूपं तदासौ प्रणवो भवेत्" इति। इदं वाक्यम्पूर्व्वं व्याख्यातम्। अभ्यासिनः अभ्यासकाले सोऽहमितिसम्पत्त्यनन्तरम् मातृकानादाभिव्यक्तिसमकालीनः निरुक्तवाक्यानुसारी ओंकारध्वनिराविर्भवतीत्यर्थो वेदितव्यः। तत्रैव "नादाख्यम्पदमर्धचन्द्रकुटिलं संविन्मयीं शाश्वतीम्। यान्तीमक्षररूपिणीं विमलधीर्ध्यायेद्विभुं तेजसाम्' इति आगमोक्तेः नादाख्ये अर्धचन्द्रकुटिले पदे प्रणवस्वरूपे मातृकानादवलिता कुण्डलनी शक्तिर्लीयते। अतःपरम्प्रणवनादाविर्भावसम्पत्तौ सत्याम् निष्पत्त्यवस्थाविर्भावो वेदितव्यः। "पूर्व्वरूपन्तदासौ प्रणवो भवेत्" इत्युक्तेः प्रणवस्य स्वरूपभूतात्मवस्तुसाक्षात्कारस्य पूर्व्वरूपत्वम् प्रागृदिगारुण्यस्य सूर्य्यसाक्षात्कारस्येव वेदितव्यम्। यथा तदानीमपि सूर्य्योदयात् प्राक् प्रभातसमये लोको दिनमिति व्युत्पन्नमतिर्भवति। न च रात्रिरिति। तथाऽत्रापि प्रणवाविर्भावे सति स्वरूपसाक्षात्कारा-

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

त्प्रागपि योगनिष्पत्यवस्थैव योगाभिज्ञै रभ्युपगम्यत इत्यर्थो वेदितव्यः।
निरुक्तपूर्व्वरूपत्वं पक्षान्तरेण सोऽहमितिमन्त्रावयवरूपपूर्व्वोत्तरवर्णी-
भूतसकारहकारलोपानन्तरं सकारान्ताविति स्वरस्य हकारान्तामि-
त्यस्य च सन्ध्यापूर्व्ववर्णाविति स्वरस्य उत्तररूपभूतसानुस्वारामिति-
स्वरस्य च मेलनसम्पन्नवर्णात्मकप्रणवस्येति वेदितव्यम्। बाह्यप्रदेशा-
वलम्बिनी त्वगिन्द्रियव्यापिनी चक्षुरविषयीभूता अनिर्वचनीयकामिनी
प्रतिमा मूलाधारादाविर्भूय हृदयप्रदेशं समासाद्याश्लिष्य च तत्र-
लीना भवति। तदानीन्तनः सुस्वरगानरूपः प्रणवनाद आविर्भवतीति यो-
गरहस्यं योगिजनानुभवगोचरं वेदितव्यम्। तथोक्तञ्चागमे "अथातः
सम्प्रवक्ष्यामि निर्णयम्प्रणवस्य तु। कलापञ्चकसंयुक्तन्तत्क्रमं शृणु
पार्व्वति!। अकारस्य उकारस्य मकारस्य तृतीयकः। नादश्चतुर्थो गदितः
पञ्चमो बिन्दुरीरितः। ब्रह्मा विष्णश्च रुद्रश्च ईश्वरश्च सदाशिवः। एते
पञ्च महाप्रेताः प्रणवश्च समन्वितः। शृणु यत्नेन देवेशि!। कलासप्तक-
रूपिणम्। कलासप्तस्वरूपश्च सप्तधा भेद ईरितः। अकारश्च उकारश्च
मकारश्च तृतीयकः। नादो बिन्दुस्ततो देवि नादातीतं ततो भवेत्।
बिन्दुतीता सप्तमी स्याच्छाम्भवी परिकीर्त्तिता। आच्छादयन्त्यः
कामेशं तत्रस्थाः सुन्दरीकलाः। प्रणवः सुन्दरीरूपा कलासप्तकसं-
युता" "विधाय धारावदने सुधायाः श्रीचक्रमभ्यर्च्य कुलक्रमेण। आस्वा:
दयन्त्यः पिशितं मृगाक्षीमालिङ्ग्य मोक्षं सुधियो लभन्ते। पीत्वाऽऽलि-
ङ्ग्य कुलाचारे प्रमदां यौवनोन्नताम्। कोटिजन्मार्जितम्पापं तत्क्षणादेव
नश्यति" इति। अत्र मृगाक्षीशब्देन निरुक्तप्रणवरूपिण्याः सुन्दर्य्या-
ग्रहणं वेदितव्यम्। पिशितशब्देन पारिभाषिकगोमांसस्य तथा सुधा-
शब्देन पारिभाषिकया अमरवारुण्याश्च ग्रहणं वेदितव्यम्। तथा-
चोक्तं स्वात्मारामेण "गोमांसं भक्षयेन्नित्यम्पिबेदमरवारुणीम्। कुली-
नन्तमहम्मन्ये इतरे कुलघातकाः। गोशब्देनोदिता जिह्वा तत्प्रवेशो हि ता-
लुनि। गोमांसभक्षणन्तत्तु महापातकनाशनम्। जिह्वाप्रवेशसम्भूतवह्नि-
नोत्पादितः खलु। चन्द्रात्स्रवति यः सारः स स्यादमरवारुणी" इति।
उक्तञ्च प्रणवस्वरूपं शिवगीतायाम् "अकारश्च उकारश्च मकारो-
बिन्दुलक्षणः। त्रिधा मात्रास्थितिर्यत्र तत्परं ज्योतिरोमिति। अकार उच्यते
रुद्रो मकारश्च पितामहः। उकार उच्यते विष्णुः तत्परंज्योतिरोमिति।
इच्छा क्रिया ज्ञानशक्तिर्ब्राह्मी गौरी च वैष्णवी। त्रिधा शक्तिस्थितिर्यत्र
तत्परंज्योतिरोमिति। ब्रह्मा विष्णुश्च रुद्रश्च देवेन्द्रो देवतास्तथा। अमला-

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

कस्थिराकारं प्रज्वलद्भुवनत्रयम् । धारयत् ब्रह्मविष्ण्वादिवह्निना सह दृश्यते'' "दृशिस्वरूपं गगनोपमम्परं सर्व्वात्मकं सात्त्विकमेकमक्षरम् । अलेपनं सर्व्वगतं यदद्वयं तदेव चैकं प्रणवम्मदुक्तम्'' इति ।

यद्यपि "ओमित्येवं ध्यायथ आत्मानम्'' इत्यादिश्रवणात् "आत्मानमरणिं कृत्वा प्रणवञ्चोत्तरारणिम् । ध्याननिर्मथनाभ्यासात् साक्षात् पश्यति मां ततः'' इत्यादिस्मरणात् "तज्जपस्तदर्थभावनम्'' इतिपातञ्जलदर्शनाच्च आत्मरूपत्वेन प्रणवस्य चिन्तनम् तथा जपश्च साधनरूपेण विधीयते । यत्र स्वयमेव प्रणवाविर्भावः मध्यनाड़ीगतवायुताड़ननिष्पन्नः अभ्याससम्पादितः स सिद्धिरूपेण वेदितव्यः । तदानीन्तनस्य निरुक्तनादस्य वागिन्द्रियागोचरत्वं तदभिव्यक्त्यनुकूलकृत्यजन्यत्वञ्च प्रकृतम्पोषयत इति वेदितव्यम् । अत्र आत्मनः एकाक्षरशब्दब्रह्मरूपत्वम् समाहितस्थितौ परिचीयते "ओमित्येवं ध्यायथ आत्मानम्'' इत्यादिश्रुतेः प्रणवस्य ध्यानविषयीभूतत्वोपपत्तेः ध्यायथ इति मध्यमपुरुषक्रियासूचितध्यातृत्वोपपत्तेः अत्र ध्यातृध्यानसत्त्वात् ध्येयसद्भावोपपत्तेश्च ध्यातृध्यानध्येयरूपत्रिपुटीलाभात् सम्प्रज्ञातसमाधिः तल्लक्षणलक्षितः श्रीमता सूत्रकारेण सूचित इत्यर्थो वेदितव्यः ।२।४।१२

ततो महाजसदृशध्वनिः ।२।४।१३।

ततः प्रणवाभिव्यक्त्यनन्तरम् । महाजसदृशध्वनिः महावस्तध्वनितुल्यध्वनिः अत्र जायते इति योजनीयम् । महाजशब्दोत्तरध्वनिशब्दोऽत्रलुप्तो वेदितव्यः ततश्च मध्यमपदलोपो समासश्च वेदितव्यः । महाजध्वनिसदृशध्वनिः इतिशब्दस्वरूपो वेदितव्यः । तदभिव्यक्तावयं योगरहस्य क्रमः । वमितिशब्दस्वरूपवरुणबीजनिष्पत्तिभूताकारशब्दः उकारशब्दस्वरूपविन्दुमभिव्यक्तीकृत्य विलीयते । सत्येवम् वुमितिशब्दस्वरूपं निष्पन्नम्भवतीति वेदितव्यम् । निरुक्तोकारशब्दस्य विन्दुत्वम् अकारोत्तरीभूतत्वञ्च "अकारो नादरूपश्च ह्युकारो बिन्दुरूपकः । मकारस्तु कला प्रोक्ता ओंकारो ज्योतिरेवहि''इति कपिलगीतोक्तिरुपपादयतीति वेदितव्यम् ।२।४।१३।

वरुणबीजस्य च ।२।४।१४।

वरुणबीजस्य वमितिशब्दस्वरूपस्य चेतिपुनरर्थकमव्ययम् । अत्राभिव्यक्तिर्जायत इति योजनीयम् । प्रणवो निजनिष्पत्तिकारणीभूतयोरकारोकारयोः स्थितिविनिमयेन संहत्या वरुणबीजरूपेण परिणतो-

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

भवतीति योगिजनानुभवगोचरं योगरहस्यं वेदितव्यम् । निष्पत्त्यवस्थायां प्रणवमहाजध्वनिसदृशध्वनिवरुणबीजानाम् तन्त्रीनादतालनादस्वरूपेणाभिव्यक्तिर्जायते इति योगाभिज्ञसम्मतिस्तदनुभूतिश्च वेदितव्या ॥ २ । ४ । १४ ॥

ततः शुशुकारफुत्कारयोः ।२।४।१५।

ततः वरुणबीजाभिव्यक्त्यनन्तरम् । शुशुकारफुत्कारयोः सर्प्परूपिण्याः वायुताडितायाः स्वबिलरूपान्मूलाधारात् प्रस्थानभूमिगतब्रह्मनाड्यन्तर्गतायाः कुण्डलनीशक्त्याः समुदीरितयोः ध्वनिविशेषयोः अत्राभिव्यक्तिर्जायत इति योजनीयम् । तालुमूलावलम्बिसुधामयचन्द्रमसः यदमृतं निर्गलति तत्काकचञ्चुपुटेन पिबन्निव जिह्वया चुम्बितिध्वनिपुरस्सरम्पीयते । तच्च शुशुकारफुत्कारध्वन्याकृष्टशीतलवाय्वानीतम्भवतीति वेदितव्यम् । तथाचोक्तं शिवसंहितायाम् "सरसं यः पिबेद्वायुं प्रत्यहं विधिना सुधीः । नश्यन्ति योगिनस्तस्य श्रमदाहजरामयाः। काकचञ्च्वा पिबेद्वायुं सन्ध्ययोरुभयोरपि । कुण्डलन्या मुखं ध्यात्वा क्षयरोगस्य शान्तये "चुम्बन्ती यदि लम्बिकाग्रमनिशं जिह्वारसस्पन्दिनी सक्षारा कटुकाम्लदुग्धसदृशी मध्वाज्यतुल्या तथा । व्याधीनां हरणं जरान्तकरणं सस्त्रागमोदीरणम् तस्य स्यादमरत्वमष्टगुणितम् सिद्धाङ्गनाकर्षणम् मूर्ध्नः षोड़शपत्रपद्मगलितम्प्राणादवाप्तं हठादूर्ध्वास्योरसनां नियम्य विवरे शक्तिम्परां चिन्तयन् उत्कल्लोलकलाजलञ्च विमलं धारामयं यः पिबेन्निर्व्याधिः स मृड़ालकोमलवपुर्योगी चिरञ्जीवति इति । २ । ४ । १५ ।

महावाक्यादेः स्फुरणम् । २ । ४ १६ ॥

महावाक्यादेः ऋग्वेदगत प्रज्ञानम्ब्रह्मेति, यजुर्वेदगताहम्ब्रह्मास्मीति, सामवेदगततत्त्वमसीति, अथर्व्वणवेदगतायमात्मा ब्रह्मेति, श्रुतिसम्मताद्वैतप्रतिपादिकाया महावाक्यपदवाच्यायाः सर्व्वं खल्विदम्ब्रह्मेति, एष सर्व्वेश्वर इति, सर्व्वं विष्णुमयञ्जगदित्याद्यनेकश्रौतस्मार्त्तवाक्योपेताया उक्तेःस्फुरणं स्फूर्त्तिः । अत्र भवतीति योजनीयम् । योगिनां लब्धभूमिकानां हृद्ग्रन्थिविभेदिका सर्व्वसंशयविच्छेदिका स्वरूपपरिचायिका परमानन्ददायिका अविद्यावृतिनिवृत्त्यनुकूलिनी सकलानर्थप्रतिकूलिनी नीरुक्तोक्तिसमाविर्भूतिर्भवतीति वेदितव्यम् । तथाचोक्तं श्रीम

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

ताचक्रपाणिना उत्तरगीतायाम् "जीवे परेण तादात्म्यं सर्व्वगञ्ज्योतिरीश्वरः। प्रमाणलक्षणैर्ज्ञेयं स्वयमेकाग्रवेदिना" जीवे जीवात्मनि परेण परमात्मना सह तादात्म्यम् अभिन्नत्वम् अद्वैतापरोक्षज्ञाननिष्पत्तिरिति यावत्। स्वयं योगमहिम्ना शास्त्रश्रवणमन्तरापि एकाग्रवेदिना चित्तैकाग्र्यप्रत्ययीकृतानतानिष्पत्त्यवस्थितिकयोगिना प्रमाणलक्षणैः स्वतःस्फुरितमहावाक्यादिभिः ज्ञेयं वेद्यम्भवति। निरुक्ततादात्म्यं विशिनष्टि सर्व्वगं जीवात्मपरमात्मनोरुपाधिभूताविद्यामायानिरासेन निरुपाधिकमनवच्छिन्नं ज्योतिः प्रकाशात्मकम् ईश्वरः तदेव तादात्म्यम् ईश्वरात्मकत्वेन ईश्वरपदवाच्यं भवतीति श्लोकार्थो वेदितव्यः। एतावता योगिनां शास्त्रमन्तरापि स्वयमेव ज्ञाननिमित्तीभूतशास्त्रोपलब्धिर्भवतीत्युक्तम्भवति। समुदितोपार्ज्जितपुण्यपुञ्जस्य कस्यचिद्योगिनः महावाक्यादिस्फूर्त्तिः स्वाभिव्यक्तिसमकालमेव ज्ञानं निष्पादयति। कस्यचित्तु कषायप्रतिवद्धस्य कषायपाकानन्तरम् कालान्तरेण विद्यमानजन्मनि जन्मान्तरे वेति वेदितव्यम्। तथाच स्मर्य्यते "विचारयन्नामरणान्नैवात्मानं लभेत चेत्। जन्मान्तरे लभेतैव प्रतिबन्धक्षये सति इति ॥२।४।१६।

वेदे प्रामाण्यग्रहः । २ । ४ । १७ ॥

वेदे श्रुतौ प्रामाण्यग्रहः प्रमाणत्वनिश्चयः। अत्र भवतीति योजनीयम्। योगिनां व्युत्थानदशायां वेदाः प्रमाणम् इत्यादिवाक्यस्फूर्त्त्या निरुक्तमहावाक्यादिस्फूर्त्त्या च कुतर्कहेतुकासम्भावना-संशयादिप्रतिपक्षभावनाव्युदासपुरस्सरं वेदे तन्मूलके शास्त्रे च श्रद्धोत्पद्यते। महावाक्यादिस्फूर्त्ताविव अत्रापि प्रमाणलक्षणसामान्यात् प्रमाणलक्षणैर्ज्ञेयमित्याद्युक्तिः प्रमाणत्वेन योजनीया। तत्र कस्यचित्तु कषायरहितस्य योगिनः निरुक्तवाक्यस्फुरणसमकालीना तदाकारकवेदादिश्रद्धार्जनिका ज्ञानोत्पत्तिरुपजायते। कस्यचित्तु कषायप्रतिवद्धस्य वाक्यस्फुरणमात्रं भवति। कषायरूपप्रतिबन्धक्षये कालान्तरेण निरुक्तज्ञानसम्पत्तिर्भवतीति लब्धभूमिकयोगाभिज्ञानुभूतिर्वेदितव्या।२।४।१७

कृतकृत्यताग्रहश्चात्मनि । २ । ४ । १८ ॥

कृतकृत्यताग्रहः कृतार्थत्वनिश्चयः। आत्मनि स्वस्मिन्। अत्र समुपतिष्ठतीति योजनीयम्। लब्धभूमिकस्य योगिनः महावाक्यादिस्फुरण-

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

जनितज्ञानोदये सति कृतकृत्योऽहं न चास्ति किञ्चित्कर्त्तव्यम् इत्याकारिका तृप्तिस्ततः शोकनिवृत्तिश्च भवतीति योगाभिज्ञानुभूतिर्ज्ञातव्या। तथाच "किमिच्छन् कस्य वा हेतोः शरीरमनुसंज्वरेत्" इति श्रूयते "कृतं कृत्यं प्रापणीयम्प्राप्तमित्येव तुष्यति' इति स्मर्य्यते। उच्यते चोत्तरगीतायाम् "ज्ञानमृतेन तृप्तस्य कृतकृत्यस्य योगिनः। न चास्ति किञ्चित्कर्त्तव्यमस्तिचेन्न स तत्त्ववित्" भगवद्गीतायाञ्च "यस्त्वात्मरतिरेव स्यादात्मतृप्तश्च मानवः। आत्मन्येव च सन्तुष्टः तस्यकार्य्यं न विद्यते" अष्टावक्रगीतायाञ्च "कृत्यं किमपि नैव स्यादितिसञ्चिन्त्य तत्त्वतः। यदा यत्कर्त्तुमायाति तत्कृत्वास्ते यथासुखम्" उक्तञ्च "तत्परं पुरुषख्यातेर्गुणवैतृष्ण्यम्" इति "दृष्टानुश्रविकविषयदोषदर्शी विरक्तः पुरुषः दर्शनाभ्यासात् तच्छुद्धिप्रविवेकाप्यायितबुद्धिर्गुणेभ्यो-व्यक्ताव्यक्तधर्म्मकेभ्यो विरक्त इति तद्द्वयम्वैराग्यम् तत्र यदुत्तरम् तज्ज्ञानप्रसादमात्रम् यस्योदये प्रत्युदितख्यातिरेवं मन्यते प्राप्तम्प्रापणीयम् 'क्षीणाः क्षेतव्याः क्लेशाः, छिन्नः श्लिष्टपर्व्वा भवसंक्रमो यस्याविच्छेदात् जनित्वा म्रियते मृत्वा च जायत" इति पातञ्जलसूत्रभाष्यं॥

योगारूढस्य योगिनः सत्वपुरुषान्यताख्यातिसम्पत्तौ कर्म्मन्यासरूपः सन्न्यासः आग्रहेण चेतसि समाविशति नैवाहं कर्म्माचरिष्यामि अकर्त्तैवाहम्भवामि इत्यवधारितचेतसोयोगिनः नित्यनैमित्तिकेष्वपि आवश्यकेषु कर्म्मसु अप्रवृत्तिर्भवति। तदन्तरम् निरुक्तख्यातिनिरोधावसरे पुरुषख्यातिमात्रनिष्पत्तौ सत्यां कर्म्माकरणरूपाग्रहस्यापि साङ्कल्पिकत्वात् कर्त्तव्यतान्तःपातित्वेन निरोधो भवति। तत्र उभयोरपि कर्म्माकरणकरणयोरनाग्रहेणैव प्रवृत्तिर्भवतीति वेदितव्यम्। तथाचोक्तम्भगवद्गीतायाम् "नैव तस्य कृतेनार्थो नाकृतेनेह कश्चन। न चास्य सर्व्वभूतेषु कश्चिदर्थव्यपाश्रयः" इति। न तदानीम् कायिक वाचनिकसमीहामात्रकर्म्म निवर्त्तते। किन्तु मानसिकसमीहारूपज्ञानमपि निवर्त्तते। तथाचोक्तम् उत्तरगीतायाम् "उल्काहस्तो यथा कश्चित् द्रव्यमालोक्य तां त्यजेत्। ज्ञानेन ज्ञेयमालोक्य ज्ञानम्पश्चात्परित्यजेत्" इति॥ २।४।१८॥

पावित्र्यग्रहश्च। २। ४। १९।

पावित्र्यग्रहः पवित्रतानिश्चयः। चेतिपुनरर्थकमव्ययम्। अत्र भवतीति योजनीयम्। योगारूढस्य योगिनः पवित्रोऽहमित्याकारकः प्रत्ययो जायते

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

इतिसाधकानुभूतिर्वेदितव्या। तथाचोक्तम्भगवद्गीतायाम् "नहि ज्ञानेन सदृशम्पवित्रमिह विद्यते। तत्स्वयं योगसंसिद्धः कालेनात्मनि विन्दति" इति। वस्तुतः आत्मा तु स्वरूपतः पवित्र एव भवति। परन्तु रजस्तमोनुविद्ध मलिनचेतःसम्पृक्तः अध्यस्तचित्तमालिन्यः अपवित्र इव भवति। ततश्चित्तपावित्र्यनिबन्धनमेवात्मपावित्र्यम्भवतीतिवेदितव्यम्। चित्तपावित्र्यन्तु तद्वृत्तिक्षयसम्पाद्यम्भवति तथाचस्मर्य्यते "यथा निरिन्धनोवह्निः स्वयोनावुपशाम्यति। तथा वृत्तिक्षयाच्चित्तं स्वयोनावुपशाम्यति" इति यथानिरिन्धनो दग्धकाष्ठोवह्निः स्वयोनौ स्वकारणे तेजोमात्रे उपशाम्यति ज्वालादिरूपं विशेषाकारम्परित्यज्य तेजोमात्ररूपे यथाऽवतिष्ठते। तथा तेनैव प्रकारेण चित्तमन्तःकारणमपि वृत्तिक्षयान्निरोधसमाध्यभ्यासेन राजसादिसकलवृत्तिनिरोधात् जीवन्मुक्तिदशायाम् मनसः सरूपलयात् कैवल्ये सति तस्य विरूपलयादित्यर्थः। स्वकारणे सत्त्वमात्रे उपशाम्यति सत्त्वमात्रावशेषम्भवतीतिश्लोकार्थो वेदितव्यः। अपिच स्मर्य्यते "चित्तमेव हि संसारः तत्प्रयत्नेन शोधयेत्। यच्चित्तस्तन्मयो मर्त्यो गुह्यमेतत्सनातनम्। चित्तस्य हि प्रसादेन हन्ति कर्म्म शुभाशुभम्। प्रसन्नात्माऽऽत्मनि स्थित्वा सुखमक्षयमश्नुते" इति स्वभावतः शुद्धस्यात्मनो यतश्चित्तसम्पर्कादेव संसारित्वमपावित्र्यम् "ध्यायतीव लेलायतीव" इतिश्रुतेरुपपद्यते। अतश्चित्तस्यशोधनेनात्मनः संसारनिवृत्तिरूपपावित्र्यमुपपन्नम्भवति "तद्यथेषीकातूलमग्नौ प्रदूयतैवेहास्य सर्व्वे पाप्मानः प्रदूयन्ते" इति श्रुतेः "उपपातकेषु सर्व्वेषु पातकेषु महत्सु च। प्रविश्य रजनीपादम्ब्रह्मध्यानं समाचरेत्" इतिस्मृतेश्च चित्तप्रसादोपलक्षितात्मपावित्र्यसम्पत्त्या बन्धननिमित्तीभूतशुभाशुभकर्म्मपदवाच्यपुण्यपापरूपसकलकर्म्माणि अपावित्र्यरूपाणि ध्यानादिना विनाशयति। ततः प्रसन्नात्मा प्रसन्नचेताः सन् आत्मनि स्वस्वरूपेऽवस्थित्य ब्रह्मैवाहं न संसारीति पावित्र्यनिश्चयेन दृश्यजातम्परिहृत्य अनभिसन्धायेत्यर्थः। चिन्मात्ररूपेणावस्थाय अक्षयमनपायि यत्सुखं भूमाभिधान स्वरूपभूतं तदश्नुते इति निरुक्तश्लोकद्वयस्य सारांशतात्पर्य्यं वेदितव्यम्। निरुक्तपावित्र्यग्रहः समाधिदशायामुपलभ्यमानः व्युत्थानदशायामप्यनुवर्तमानो भवतीतिवेदितव्यम्। तथा च स्मर्य्यते "परव्यसनिनी नारी व्यग्रापि गृहकर्म्मणि। तदेवास्वादयन्त्यन्तः परसंगरसायनम्। एवन्तत्त्वे परे शुद्धे धीरो विश्रान्तिगतः सः। तदेवास्वादयत्यन्तर्बहिर्व्यवहरन्नपि" इति। २।४।१९॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

शरीरात्पार्थक्यग्रहः ।२।४।२०।

शरीरात् देहात्। पार्थक्यग्रहः पृथक्त्वनिश्चयः। अत्र भवतीति योजनीयम्। अभ्यासशालिनो लब्धभूमिकस्य योगिनः सत्त्वपुरुषान्यताख्यातिसम्पत्तौ सत्याम्प्रकृत्यसंश्लिष्टात्मा क्षेत्रज्ञोऽहम् क्षेत्रपदवाच्यात् जन्ममरणादिषड्विकारोपेतात् गुणमयात् वेद्यात् शरीरात् अशरीरी जन्मादिविकारशून्यो निर्गुणो वेत्ता साक्षीति भावः। अन्यो भवामीत्याकारकः प्रत्ययो जायते। इतिसाधकानुभूतिर्ज्ञातव्या। तथाच श्रूयते "अङ्गुष्ठमात्रः पुरुषोऽन्तरात्मा सदा जनानां हृदये सन्निविष्टः। तं स्वाच्छरीरात् प्रवृहेन्मुञ्जादिवैषीकाम् धैर्य्येण तं विद्याच्छुक्रममृतम्" इति। तथाच स्मर्य्यते "इषीकाञ्च यथा मुञ्जात् कश्चिन्निष्कृष्य दर्शयेत्। योगी निष्कृष्य चात्मानं तथा पश्यति देहतः। मुञ्जं शरीरमित्याहुरिषीकामात्मनिश्रिताम्। एतन्निदर्शनम्प्रोक्तं योगविद्भिरनुत्तमम्" "देहस्थोऽपि न देहस्थो विद्वान्स्वप्नाद्यथोत्थितः। अदेहस्थोऽपि देहस्थो विभाति स्वप्नदृग्यथा॥ २।४।२०।

विषयेषु ममत्वमयथापूर्वम्भर्तृगृहोषितयोषितां नाभिगृहादिष्विव ।२।४।२ ।

विषयेषु आत्मीयत्वेनाभिमतेषु पुत्रकलत्रक्षेत्रवित्तादिषु ममत्वं ममता आत्मीयत्वबुद्धिरितियावत्। अयथापूर्व्वं यथापूर्व्वं तथा न अपूर्वरूपमिति यावत्। अत्र भवतीति योजनीयम् श्रीमान् सूत्रकारः ममत्वविषयकमयथापूर्व्वत्वं लौकिकदृष्टान्तेन प्रपञ्चयति–भर्तृगृहोषितयोषितां पतिसदननिवासिनीनां स्त्रीणां नाभिगृहादिष्विव पितृसदनादिष्विव एतावता ग्रन्थसन्दर्भेण यथा स्त्रियः पितृगृहस्थिताः पूर्व्वम्पितृगृहं तत्रत्यधनधान्यादिकञ्च ममेदम्भवतीति बुद्ध्या आत्मीयत्वेनाभिमनुते। सैव द्विरागमनान्तरम्पतिगृहगता सती पतिगृहादिकं वस्तुत आत्मीयत्वेनाभिमन्यमाना पितृगृहादिकं वस्तुतो ममेदं न भवतीति अभ्युपगच्छन्ती मम पितुरिदम्भवतीति मन्वाना पितृस्वत्वानुरोधेन तत्र स्वस्वत्वं मन्वाना अपूर्व्वरूपेण तदात्मीयत्वेनाभिमनुते। तथा शरीरादविविक्तात्मरूपः पुमान् यथाऽविवेकदशायामनात्मन्येव देहे आत्मत्वमभिमन्यमानो देहानुबन्धविषयान् वस्तुन आत्मीयत्वेनाभिमनुते। स च एष शरीरात् विविक्तात्मरूपः

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

सन् विवेकदशायामनात्मनि देहे आत्माभिमानशून्यो भूत्वा अनात्मीयभूतदेहानुबन्धविषयान् पुत्रकलत्रक्षेत्रवित्तादीन् वस्तुतो ममैते न भवन्तीति अभ्युपगच्छन् व्यवहारदशायां देहसम्बन्धानुरोधेनैव तत्र स्वसम्बन्धं मन्वानोऽपूर्व्वरूपेण तानात्मीयत्वेनाभिमनुते इति उक्तम्भवतीति वेदितव्यम् ॥२।४।२१॥

प्रकृतमेवार्थं श्रीमान् सूत्रकारो दृष्टान्तान्तरेण प्रपञ्चयति ।

विभक्तभ्रातृधनादिवच्च ॥२॥४॥२२॥

विभक्तभ्रातृधनादिवत् पृथग्भूतभ्रातॄणां धनादीव। यथा पृथग्भूता भ्रातरः अविभक्तदशावैसादृश्येन परस्परं विभक्तधनधान्यादिकममाकमिदन्नभवतीति मन्वानाः तत्सम्बन्धिपूर्व्वकालिकस्वत्वानुरोधेन भ्रातृस्वत्वानुरोधेन वा अपूर्व्वरूपेण तदात्वेनाभ्युपगच्छन्ति। तथा विविक्तात्मरूपः पुमान् विवेकदशावैसादृश्येन पूर्व्वरूपेण विषयानात्मीयत्वेनाभ्युपगच्छन्तीति वेदितव्यम्। चेतिपुनरर्थकमव्ययम् ॥२।४।२२॥

लब्धभूमिकस्य योगिनः कुण्डलनीपदवाच्यशक्त्याः चक्राधिष्ठितात्मसमागमानुकूलमुत्थानम्प्रपञ्चयति ।

कृतेशोपायनसमया शक्तिः । २ । ४ । २३ ।

कृतेशोपायनसमया कृतपरमेश्वरसमीपगमनव्यवस्थितिः । शक्तिः कुण्डलनी । अत्र भवतीति योजनीयम् । स्मर्य्यते च शक्तिसमयोक्तिः "येन व्याप्तमिदं सर्व्वं सर्व्वं वेत्ति च यः शिवः । यस्यान्तन्नैव जानामि तस्याहं शरणं व्रजे" इति । मूलाधारस्थितकुण्डलन्याः समीपनिवासी गुदाधारस्थितोऽपानवायुः परमेश्वरसमीपगमनरूपन्तदभिप्रायमवगत्य प्रियतमेन प्राणवायुना सह सम्भूय शक्तिप्रस्थानपथिगतान् कफादिरूपान् अर्गलानपनयति। इन्द्रियाणि निरोधयति । चक्राधिष्ठिताय देवाय तस्या उपायनम् वेत्रपाणिनरपालभट इव पुरत आवेदयन्निव उपगच्छति। तदानीमेव नरपालपुरोगामिवेत्रपाणिभटा इव प्रणवादय आविर्भूय भटोद्घोषोपमनादरूपेण राजयानोत्सवमिव शक्तियानोत्सवं सम्पादयति। ज्योतिश्च चन्द्रतारकादिरूपमन्तर्दृष्टिगोचरीभूतम् राजमार्गगतदीपमालिकादिवत् तदुत्सवमेव सम्पादयद्भवतीति वेदितव्यम्। योऽयं क्रमो निरूपितः स च कुण्डलनीबोधसमकालीनः तस्या एव विला-

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

सविशेष इति वेदितव्यम्। इदानीमयञ्जीवात्मा पुरुषोऽनात्मन्यात्मबुद्धिमपवदन् कृतकृत्योऽहम् शुद्धोऽहम् निश्शरीरोऽहम्मुक्तोऽहम् इत्याकारेण सुप्तोत्थितपुरुष इव स्वस्मिन् स्वप्नप्रपञ्चितचौरबन्धादिबुद्धिमपवदन् ब्राह्मणोऽहम् निरपराधोऽहमित्याकारेणेव आत्मानम्परिचिनोतीति अत्रसम्प्रज्ञातसमाधेः सम्पत्तौ सत्यां साधकेनात्मनःकृतकृत्यादिरूपं स्वरूपम्परिचीयत इतिश्रीमत्सूत्रकारस्य स्वारस्यं वेदितव्यम् । अस्यामेव भूमिकायां कृतकृत्यताग्रहश्चात्मनि पावित्र्यग्रहश्च शरीरात्पार्थक्यग्रहः इतिसूत्रत्रयमन्तर्भूतं वेदितव्यम् । निरुक्तक्रमोलब्धभूमिकानुभूतिगोचरोवेदितव्यः। शास्त्राणि च एतद्विषयकाणि शतसहस्रशः शास्त्रकारैः प्रदर्शितानि तान्यत्र ग्रन्थविस्तारभिया न लिखितानीति वेदितव्यम्। "विशोका वा ज्योतिष्मती"इतिपातञ्जलयोगसूत्रेण चन्द्रादित्यग्रहमणिप्रदीपादिषु प्रवृत्तिरुत्पन्ना इति "विषयवती वा प्रवृत्ति रुत्पन्ना मनसः स्थितिनिबन्धनी" एतत्सूत्रभाष्येण च प्रकृतम्पुष्टम्भवतीति वेदितव्यम् ॥२।४।२३।

अनन्तरं तत्सम्पत्तिः ।२।४।२४।

अनन्तरं शक्तिकर्तृकेशोपायनसमयकरणात् पश्चिमकाले । तत्सम्पत्तिः शक्तिकर्तृकेशोपायननिष्पत्तिः । अत्र भवतीति योजनीयम्। एतावता कुण्डलनी परमेश्वरसमीपगमनविषयकसमयङ्कृत्वा उत्थाय मूलाधारादिचक्रषट्कं विभिद्य योगिनां कर्म्मबन्धनं विच्छिद्य सहजावस्थापदवाच्यां समाहितस्थितिरूपिणीं जाग्रदाद्यवस्थात्रितयविलक्षणां तुर्य्यावस्थितिं सम्पाद्य सहस्रारपद्माधिष्ठितं स्वपतिम्परमेश्वरं समागच्छति। तथाच स्मर्य्यते "महीं मूलाधारे कमपि मणिपूरे हुतवहं स्थितं स्वाधिष्ठाने हृदि मरुतमाकाशमुपरि। मनोऽपि भ्रूमध्ये सकलमपि भित्वा कुलपथं सहस्रारे पद्मे सह रहसि पत्या विहरसि" "उत्पन्न शक्तिबोधस्य त्यक्तनिःशेषकर्म्मणः योगिनः सहजावस्था स्वयमेवाभि जायते" 'कुण्डली कुटिलाकारा सर्प्पवत्परिकीर्त्तिता" "सा शक्तिश्चालिता येन स मुक्तो नात्र संशयः" "ततः पवित्रं परमेश्वराख्यमद्वैतरूपं विमलाम्बराभम् । यथोदके तोयमनुप्रविष्टन्तथात्मरूपन्निरुपाधि संस्थितः"इति । श्रूयते च "भिद्यते हृदयग्रन्थिश्छिद्यन्ते सर्व्वसंशयाः। क्षीयन्ते चास्य कर्म्माणि तस्मिन् दृष्टे परावरे" "तयोर्ध्वमायन्नमृतत्वमेति" ॥२।४।२४॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

गानं दिव्यसुखावहम् २।४।२५ ।

गानं गीतम्। दिव्यसुखावहमलौकिकानन्दप्रदम्।अत्र भवतीति योजनीयम् । एतावता लब्धभूमिकस्य योगिनः योगमहिम्ना दिव्यसुखावहं गानं श्रवणगोचरम्भवतीत्युक्तम्भवति। निरुक्तगानम् बाह्याभ्यन्तरभेदेन द्विविधम्भवति। तत्र बाह्यं गन्धर्वाप्सरोनर्तनाद्यादिसंगीतं रागरञ्जितं सुस्वरं ग्राममूर्च्छनाद्युपेतमन्तरायरूपं स्वयमुपस्थितम्भवति । तथाचोक्तं शिवसंहितागमभोगरूपविघ्नोक्तिप्रकरणे "नृत्यङ्गीतं विभूषणम्" इत्यादि प्रकृतोऽर्थः। अव्यवहितोत्तरसूत्रव्याख्यानप्रमाणैरपि प्रमापितो भविष्यतीति वेदितव्यम् । आभ्यन्तरम् भाषाप्रसिद्धविहगादिरागोपेतं प्रणवादिविलम्बितध्वनिरूपम् अकृत्रिमं सिद्धिरूपमुसाधकानुभूतिगोचरं वेदितव्यम् "ओंकारमकारोच्चारस्वरमूर्ध्वगतध्वनिम्" इत्यादिवाशिष्ठोक्तिः प्रकृतम्पोषयतीति वेदितव्यम्।२।४।२५

उपलब्धिर्दिव्यविषयाणाम् । २।४।२६ ।

उपलब्धिः प्राप्तिः । दिव्यविषयाणां सुरसिद्धाप्सरःप्रभृतीनाम् । अत्र भवतीति योजनीम्। लब्धभूमिकस्य योगिनः समीपे देवादयो विघ्नरूपिण उपस्थीयन्ते। तथाचोक्तम् "स्थान्युपनिमन्त्रणे सङ्गस्मयाकरणम् पुनरनिष्टप्रसङ्गात्" इतिपातञ्जलसूत्रेभाष्यकारैश्च "तत्रमधुमतीम्भूमिं साक्षात्कुर्वतो ब्राह्मणस्य स्थानिनो देवाः सत्त्वशुद्धिमनुपश्यन्तः स्थानैरुपनिमन्त्रन्ते। भोरिहास्यतामिह रम्यताम् कमनीयोऽयं भोगः। कमनीयेयङ्कन्या । रसायनमिदं जरामृत्युम्बाधते वैहायसमिदं यानममीकल्पद्रुमाः । पुण्या मन्दाकिनी। सिद्धा महर्षयः उत्तमा अनुकूला अप्सरसो दिव्ये श्रोत्रचक्षुषी । वज्रोपमः कायः स्वगुणैस्सर्वमिदमुपार्जितमायुष्मता। प्रतिपद्यतामिदमक्षयमजरममरस्थानं देवानां प्रियमित्येवमधीयमानः सङ्गदोषान् भावयेत् । घोरेषु संसाराङ्गारेषु पच्यमानेन मया जननमरणान्धकारे विपरिवर्तमानेन कथञ्चिदासादितः क्लेशतिमिरविनाशो योगप्रदीपस्तस्य चैते तृष्णायोनयो विषयवायवःप्रतिपक्षाः। स खल्वहम् लब्धालोकः कथमनया विषयमृगतृष्णया वञ्चितस्तस्यैव पुनः प्रदीप्तस्य संसाराग्नेरात्मानमिन्धनीकुर्य्यामिति स्वस्ति वः स्वप्नोपमेभ्यः कृपणजनप्रार्थनीयेभ्यो विषयेभ्य इत्येवंनिश्चितमतिः समाधिं भावयेत्। सङ्गमकृत्वा स्मयमपि न कुर्य्यात् इत्युच्यते ।

Dr. Urmila Sharma Collection, Varanasi

क्वचित् सिद्धिरूपिणोऽपि सिद्धा उपस्थीयन्ते। तथाच "मूर्धज्योतिषि सिद्धदर्शनम्" इति पतञ्जलिना सूत्रितम्। तथाचोक्तं शिवसंहितायाम् "शिरःकपाले रुद्राक्षविवरं चिन्तयेद्यदा। तदा ज्योतिःप्रकाशस्स्याद्विद्युत्पुञ्जसमप्रभः। एतच्चिन्तनमात्रेण पापानां संक्षयो भवेत्। दुराचारोऽपि पुरुषो लभते परमं पदम्। अहर्निशं यदा चिन्तां तत् करोति विचक्षणः। सिद्धानां दर्शनं तस्य भाषणञ्च भवेद्ध्रुवम्" इति "यक्षराक्षसगन्धर्व्वा अप्सरोगणकिन्नराः। सेवन्ते चरणौ तस्य सर्वे तस्य वशानुगाः" इति ।२।४।२६॥

भीतिरपरिचितौ भूम्याः २।४।२७ ॥

भीतिर्भयम्। अपरिचितौ अपरिचये। भूम्या भूमिकायाः। अत्र भवतीति योजनीयम्। लब्धभूमिकस्य योगिनो भूमिकान्तरारोहणे तदपरिचये भयं भवतीति वेदितव्यम्। तथाचोक्तं कापिलगीतायाम् "प्राप्तकाले च विप्रर्षे मानसं भयमाप्नुयात्। तत्सर्वं कथयिष्यामि सावधानं शृणुष्व च। स्त्रीणामादौ यथा भीतिः पुरुषस्यादिसंगमे। तथाऽऽसां चित्तविक्षेपः प्राप्तानां स्वामिमन्दिरम्" इति "अस्पर्शयोगो नामैष दुर्दर्शः सर्वयोगिभिः योगिनो बिभ्यति ह्यस्मादभये भयदर्शिनः" इत्यादिस्मृतिरपि प्रकृतार्थपोषिणीति वेदितव्यम्। यद्यपि निरुक्तभूमिकायां योगाङ्गभूतत्वात् सर्वथा निरतिशयानन्दस्यैव सम्भूतिरुपपद्यते। तथापि अत्र अपरिचितवस्तूपलब्धिः भीतिम्प्रयोजयति। यथा स्त्रीणां प्रथमपतिसमागमे विषयानन्दहेतौ सर्वथा सुखसम्भूतेरुपपत्तौ सत्यामपि पतिविलासाद्यपरिचितवस्तूपलब्धिःभयं प्रयोजयति। तथैवात्रापि अपरिचितभूमिकायां योगिनो भयमुपपद्यत इति वेदितव्यम्। दृश्यते च लोके सुखास्पदेऽपि शीतलमृदुनीरसरोवरे स्नातुः भयोपलब्धिः। प्रायोऽपरिचितवस्त्वसहत्वं भवस्येवेति वेदितव्यम् ॥२।४।२७॥

निद्रारम्भे मुहुर्मूर्छा । २ । ४ । २८ ।

निद्रारम्भे सुप्त्युपक्रमे। मुहुः वारम् वारम्। मूर्छा अर्थसम्पत्तिपदवाच्या अचेतनत्वसम्पन्ना सुषुप्तिविलक्षणा मुग्धावस्था। अत्र भवतीति योजनीयम्। तथाचोक्तम् अमनस्के "स्पर्शनं परतत्त्वस्य उत्थानञ्च पुनः पुनः। घर्मशान्तिः प्रजायेत मुहुर्निद्रा च मूर्छना" इति "स्वयं निद्राशानालम्बनम् वा" इति पातञ्जलसूत्रमपि प्रकृतं पोषयतीति वेदितव्यम्। ननु

CC0. In Public Domain, Digitizagtion by eGangotri

तिस्रोऽवस्था जीवस्य प्रसिद्धाः जाग्रत् स्वप्नःसुषुप्तमिति। चतुर्थी देहा दुत्क्रमणं मरणरूपा न तु पञ्चमी काप्यवस्था जीवसम्बन्धिनी श्रूयतेस्म र्यते वा। तस्माच्चतसृणामेवासामन्यतमा मूर्च्छा भवितुमर्हति इत्युपपत्तौ सत्याम् प्रसिद्धं जाग्रदाद्यवस्थानपदमन्तरा कुतःअप्रसिद्धम्मूर्च्छापदम- त्रोपात्तमिति प्रष्टव्ये प्रतिवचनम् नेयम्मूर्च्छावस्था जागरितम्भवितु- मर्हति इन्द्रियैर्विषयानुपलब्धेः। न स्वप्नः अत्र मनसा जाग्रदनुभूतविष- यानुपलब्धेः। न मरणम् अत्र प्राणोष्मणोरस्तित्वात्। मूर्च्छिते हि जन्तौ मरणामरणे निर्णेतुं तयोः संशयानाः पुरुषा उष्मणो भावाभावनिर्ण- यार्थं करतलेन हृदयदेशमालभन्ते। प्राणस्य च भावाभावनिर्णयार्थं घ्राणप्रदेशम्। अथ प्राणमुष्माणं वा प्रतिपन्ना अमृत्युमध्यवस्य- मूर्च्छावस्थां परिचाय्य संज्ञाप्राप्तये भिषजन्ति। यदि उष्मणः प्राणस्य च अस्तित्वमप्रतिपन्ना भवन्ति। तदा मृत्युं निश्चित्य संस्काराय श्मशानं नयन्ति। परिशेषादवशिष्टं सुषुप्तं भवितुमर्हति निःसंज्ञत्वा- मृतत्वरूपसुषुप्तगुणसद्भावात्। इत्येवं प्राप्ते निर्णीयते नेयं मूर्च्छा सुषु- प्तिरपि भवितुमर्हति वैसादृश्यात्। मूर्च्छितःकदाचिच्चिरमपि नोच्छ्वसिति। सवेपथुः भयानकमुखः। विस्फारितनेत्रो दृश्यते। सुषुप्तश्च प्रसन्नमुखः तुल्यसमयं मुहुर्मुहुरुच्छ्वसिति। निर्मीलितनयनो निर्वेपथुश्च दृश्यते। तस्मात्परिशेषात् इयमवस्थितिः सुषुप्तस्य अर्द्धंसम्पत्तिरित्यवगच्छामः असंज्ञाभावात् सुषुप्तिधर्म्मात्सम्पन्ना इतरस्माच्च निरुक्तवैसादृश्याद- सम्पन्ना इति वेदितव्यम्। यत्तूक्तं न पञ्चमी काप्यवस्था निगमे आगमे च श्रूयते स्मर्य्यते वा तदुच्यते कादाचित्कीयमवस्थितिरिति न श्रूयते स्मर्य्यते वा। प्रसिद्धिरस्या लोके आयुर्वेदे च सुषुप्त्यर्द्धसम्पत्तिस्वी- कारात्। न पञ्चमी गण्यते इत्यनवद्यं व्याख्यानं वेदितव्यम्। अत्र प्रसङ्गप्राप्ता मूर्च्छावस्था परिचिता इति वेदितव्यम्।२।४।२८।

सान्निध्यञ्च मृत्योः। २। ४। २९।

सान्निध्यं सामीप्यम्। चेति पुनरर्थकमव्ययम्। मृत्योर्मरणस्य। अत्र भवतीति योजनीयम्। लब्धभूमिकस्य योगिनःप्राणशैथिल्योद्रेकात् प्राण- संचारमनोवाक्कायव्यापारराहित्यरूपमचेतयमानम्भयानकम्मरणवदव- स्थानम् सन्निधावुपजायते इतिसाधकानुभूतिगोचरावस्थितिर्वेदि- तव्या। तथाचोक्तं योगशास्त्रे "यथा दण्डहतः सर्पो दण्डाकारः प्रजा- यते। ऋज्वीभूता तथा शक्तिः कुण्डली सहसा भवेत्। तदा सा मर-

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

णावस्था जायते क्षिप्रद्राश्रया" इति। तत्र योगिभिः सत्यपि मृत्युसाक्षात्कारे धैर्य्यमवलम्ब्य नेयं यथार्था शरीरादप्रसूतिरूपा मृतिः किन्तु योगभूमिकारूढा तत्सादृश्योपेता अमृतादिसम्पत्तिपूर्वकालीना सिद्धिसूचिकेवेत्यवगम्य च न भेतव्यम्। किन्तु मृतिरेव योगमहिम्ना विजेतव्येति वेदितव्यम् "मृत्युञ्जयति योगवित्" इत्याद्युक्तिः योगिकर्तृकमृत्युजयम्प्रमापयतीति वेदितव्यम्। "सोमसूर्यातिसम्बन्धो जायते चामृताय वै। मृतावस्था समुत्पन्ना ततो वायुं विरेचयेत्" इत्युक्तिः शक्तिबोधानन्तरम्मृत्यवस्थोत्तरकालीनाममृतावस्थामवगमयतीति वेदितव्यम् ॥२।४।२९॥

संविदश्चाविर्भावो विद्युद्वत् ॥ २ । ४ । ३० ।

संविदो ज्ञानस्याविर्भावःप्राकट्यम्। विद्युद्वत् तड़िदिव। अत्र भवतीति योजनीयम्। लब्धभूमिकस्य योगिनो व्युत्थानदशायां ज्ञानम्पूर्वकाले कादाचित्कत्वेन तडिदिव उत्पत्तिविनाशशीलं झटिति स्फुरणरूपेण अभिव्यज्यमानम् तदैव विलीयमानम्भवतीतिसाधकानुभूतिगोचरं योगरहस्यम् वेदितव्यम्। "तज्जयात् प्रज्ञालोकः" इतिपातञ्जलसूत्रेण "तस्य संयमस्य जयात्समाधिप्रज्ञाया भवत्यालोको यथा यथा संयमः स्थिरपदो भवति तथा तथा समाधिप्रज्ञा विशारदी भवति" इति निरुक्तसूत्रभाष्येण च प्रकृतोऽर्थः पुष्टो भवतीति वेदितव्यम्। यथा मेघमण्डलीमत्यां रात्रौ अन्धंतमसि प्रसरति सति मुहुर्मुहुर्विद्युत् स्फुरन्ती सती लोकानां तमः पौनःपुन्येन निवारयति। तथात्र मृत्युदशायाम्महामोहवत्याम् सन्निहितायाम् मुहुर्मुहुः स्फुरन्ती संवित् योगिनां महामोहं पौनःपुन्येन-निवारयतीति संविदो विद्युत्सादृश्यतात्पर्य्यं वेदितव्यम्। "विद्युल्लव इवाम्बुदे" "संविदं लभतेऽभ्यासात्" इत्याद्युक्तिः योगाभ्यासात् संविदाविर्भावं गमयतीति वेदितव्यम् ॥२।४।३०।

ततः संशयविच्छित्तिः । २ । ४ । ३१ ।

ततो निरुक्तसंवित्सम्प्राप्त्यनन्तरम्। संशयविच्छित्तिःसन्देहविच्छेदः। अत्र भवतीति योजनीयम्। तथाच श्रूयते "भिद्यते हृदयग्रन्थिश्छिद्यन्ते सर्वसंशयाः। क्षीयन्ते चास्य कर्म्माणि तस्मिन् दृष्टे परावरे" इतिलब्धभूमिको योगी यत्र यत्र गुरुमुखात् शास्त्राच्चाधिगतेषु कालवञ्चनतत्त्वदर्शनादिरूपयोगलभ्यपदार्थेषु संशयानो भवति तांस्तानत्र भूमि-

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

कायां समधिगत्य तत्र तत्र निःसंशयानो भूत्वा श्रद्दधाति । विपरीतां भावनां जहाति चा इति साधकानुभूतिर्वेदितव्या । तथा च सूत्रितम् श्रीमता पतञ्जलिना "ऋतम्भरा तत्र प्रज्ञा" इति ॥२।४।३१।

अनासक्तिश्च व्यवहारे । २ । ४ । ३२ ।

अनासक्तिरसङ्गः।चेतिपुनरर्थकमव्ययम्। व्यवहारे लौकिकाचरणे। अत्र भवतीति योजनीयम्। योगारूढस्य योगिनोऽनिर्वचनीयालौकिसुखसम्पत्तौ सत्यां पुरुषख्यातावुदितायां वैराग्यदार्ढ्यं भवति । ततश्च व्यवहारेऽनासक्तिर्भवतीति वेदितव्यम् । तथाच सूत्रितम् श्रीमतायोगाचार्येण पतञ्जलिना "तत्परं पुरुषख्यातेर्गुणवैतृष्ण्यम्" इति। तथाच स्मर्य्यते "न ह्याहारादि सन्त्यज्य भरताद्याः स्थिताः क्वचित्। काष्ठपाषाणवत् किन्तु सङ्गभीता उदासते । सङ्गो हिबाध्यते लोके निःसङ्गः सुखमश्नुते । तेन संगः परित्याज्यः सर्वथा सुखमिच्छता । न द्वेष्टि सम्प्रवृत्तानि न निवृत्तानि कांक्षति।उदासीनवदासीन इतिग्रन्थिभिदुच्यते।अमांशस्य तिरस्कारादधिष्ठानप्रधानता । यदा तदा चिदात्माहमसङ्गोऽस्मीतिबुध्यते। दुःखिनोऽज्ञाः संसरन्तु कामं पुत्राद्यपेक्षया। परमानन्दपूर्णोऽहं संसरामि किमिच्छया। अनुतिष्ठन्तु कर्म्माणि परलोकयियासवः। सर्वलोकात्मकः कस्मादनुतिष्ठामि किं कथम् । व्याचक्षन्ताञ्च शास्त्राणि वेदानध्यापयन्तु वा। येऽत्राधिकारिणो मे तु नाधिकारोऽक्रियत्वतः" इति ॥२।४।३२।

अन्योन्यं विरुद्धस्वभावानां गुणत्रयजन्मनां विकल्पेन तरङ्गवत् प्रवृत्तिः २ । ४ । ३३ ।

अन्योन्यविरुद्धस्वभावानाम्परस्परविलक्षणप्रकृतीनाम्। गुणत्रयजन्मनां सत्त्वरजस्तम इत्यभिधानगुणेभ्यो जातानाम्। विकल्पेन एकमेकं गुणमभिभूय अपरस्यापरस्य गुणस्योदयेन । तरङ्गवत् प्रवृत्तिः वीचिरिव प्रवर्त्तनम् । अत्र भवतीति योजनीयम् । तथाचोक्तम्मार्कण्डेयपुराणे "ब्रह्मसङ्गि मनः कुर्वन्नुपसर्गात् प्रमुच्यते । उपसर्गैर्जितैरेभिरुपसर्गास्ततः पुनः । योगिनः सम्प्रवर्तन्ते सात्त्वराजसतामसाः" इति ॥ २।४।३३

सत्त्वभूमिः पूर्वमतिथिवत् ।२।४।३४॥

सत्त्वभूमिः सात्त्विकी भूमिका। पूर्वम् प्राक्। अतिथिवत् आगन्तुरिव अत्र भवतीति योजनीयम् । प्रसंगादतिथिं लक्षयामि व्यासवाक्येन

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

"दूराच्चोपगतं श्रान्तं वैश्वदेव उपस्थितम्। अतिथिं तं विजानीयान्नातिथिः पूर्वमागतः" इति। यथाऽतिथिः कस्यचिद्गृहमकस्मादागच्छति अल्पकालं स्थित्वा गच्छति च। तथैयं सत्त्वभूमिर्गृहं बुद्धिमकस्मादागच्छति। किञ्चिदल्पकालं स्थित्वा गच्छति चेति निदर्शनम् वेदितव्यम्। तदानीं रजोभूमिस्तमोभूमिश्च चिरस्थायित्वरूपेण गृहनिवासिन्याविव चिरकालं निवसत इति तात्पर्यं वेदितव्यम्। सत्त्वरजस्तमांसि प्रकाशक्रियास्थितिशीलानि क्रमेण वेदितव्यानि। तथा परिचिता एते गुणाः "प्रकाशक्रियास्थितिशीलम् भूतेन्द्रियात्मकम् भोगापवर्गार्थम् दृश्यम्" इतिपातञ्जलसूत्रीयभाष्ये भाष्यकारैः "प्रकाशशीलं सत्त्वम् क्रियाशीलं रजः स्थितिशीलं तम इति। एते गुणाः परस्परोपरक्तप्रविभागाः परिणामिनः संयोगविभागधर्माणः इतरेतरोपाश्रयेणोपार्जितमूर्त्तयः परस्पराङ्गाङ्गित्वेऽपि असमभिन्नशक्तिप्रविभागास्तुल्यजातीयातुल्यजातीयशक्तिभेदानुपातिनः" इत्यादिव्याख्यानेनेति वेदितव्यम्। अपिच स्वस्ववृत्तिप्रदर्शनपूर्वकमेतेषां परिचयः स्मर्यते "वैराग्यं क्षान्तिरौदार्य्यमित्याद्याः सत्त्वसम्भवाः। कामक्रोधौ लोभयत्नावित्याद्या रजसोत्थिताः। आलस्यभ्रान्तितन्त्राद्या विकारास्तमसोत्थिताः। सात्त्विकैः पुण्यनिष्पत्तिःपापोत्पत्तिश्च राजसैः। तामसैर्नोभयं किन्तु वृथायुःक्षपणं भवेत्"इति। एतावता साधके प्रथमं साधनावसरे वैराग्यादिशीला सत्त्वभूमिरचिरस्थायिनी भवति। कामादिशीला रजोभूमिःआलस्यादिशीला तमोभूमिः चिरस्थायिन्यौ भवतः इत्युक्तम्भवति। प्रकृतोऽर्थः साधकानुभूतिवेद्यो वेदितव्यः॥ २।४।३४।

पश्चादितरावेव तद्वत् ।२।४।३५।।

पश्चादुत्तरकाले साधनदार्ढ्यं। इतरावेव रजस्तमोगुणावेव। तद्वत् अतिथिवत्। अत्र भवत इति योजनीयम्। लब्धभूमिकस्य योगिनःअभ्यासक्रमेण अध्यात्मप्रसादावसरे निरुक्तरजस्तमोभूम्यौ अचिरस्थायिन्यौ भवतः। सत्त्वभूमिश्च चिरस्थायिनीत्यर्थो वेदितव्यः। अशुद्धावरणमलापेतस्य प्रकाशात्मनो बुद्धिसत्त्वस्य रजस्तमोभ्यामनभिभूतः स्वच्छोऽध्यात्मप्रसादः सत्वगुणमयः समाधिवैशारद्यरूपो भूतार्थविषयः क्रमानुरोधिस्फुटप्रज्ञालोकः आविर्भवति। तथाच स्मर्य्यते "प्रज्ञाप्रासादमारुह्य अशोच्यःशोचतो जनान्। भूमिष्ठानिव शैलस्थः सर्वान् प्राज्ञोऽनुपश्यति" इति प्रकृतोऽर्थः साधकानुभूतिगोचरो वेदितव्यः ॥ २।४।३५।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

सर्वे तु निर्गुणे ।२।४।३६।।

सर्वे सत्त्वरजस्तमोगुणाः। तुशब्दः प्राक्तनीं सगुणस्थितिं व्यावर्तयति। निर्गुणे गुणरहिते।अत्र चेतसि अतिथिवद् भवन्तीतियोजनीयम्। समाहितचित्तस्य लब्धभूमिकस्य योगिनः अभ्यासक्रमेण चेतसि निर्मलनीरसरसि शुद्धबुद्धस्वरूपात्मनि विधूताशेषगुणकल्मषकर्दमे विविक्ते प्रकृत्यसंशिनष्टेऽसति सर्वेऽपि गुणा अतिथिवदचिरस्थायिनो भवन्ति। न कोऽपि चिरस्थायीतितात्पर्यं वेदितव्यम्। तदानीं चेतोगृहस्य सर्वेऽपि गुणा अतिथय एव भवन्ति। न कोपि तत्र निवसतियथा शून्यगृहेऽतिथयो गत्वापि न तिष्ठन्ति द्रुततरमेवापसरन्तीतितितात्पर्यं वेदितव्यम्। तथा च स्मर्यते "चतुर्विधा मनोऽवस्था विज्ञातव्या मनीषिभिः। विक्षिप्तञ्च गतायातं सुश्लिष्टं च सुलीनकम्। विक्षिप्तं तामसं प्रोक्तं राजसन्तु गतागतम्। सुश्लिष्टं सात्त्विकं प्रोक्तं सुलीनं गुणवर्जितम्। विक्षिप्तं च गतायातं विकल्पविषयग्रहम्। सुश्लिष्टं च सुलीनं च विकल्पविषयापहम्" इति। तथा च सूत्रितम् श्रीमता पतञ्जलिना 'प्रशान्तवाहिता संस्कारात्"इति। इत्याद्युक्तिः पूर्वनिरुक्तां विकल्पेन गुणत्रयोपलब्धिं प्रमापयतीति वेदितव्यम् ।।२।४।३६।

अन्तर्गा दृष्टिः ।२।४।३७।।

अन्तर्गा अन्तर्मुखी। दृष्टिर्दर्शनम्। अत्र भवतीति योजनीयम्। लब्धभूमिकस्य योगिन आभ्यन्तरिकवस्तूपलब्धिप्रयोजिका अन्तर्मुखी दृष्टिर्जायते इति योगानुभूति र्वेदितव्यातथा च सूत्रितं श्रीमता पतञ्जलिना"विशोका वा ज्योतिष्मती"इति।एतत्सूत्रीयभाष्ये भाषितञ्चभाष्यकरैः "प्रवृत्तिरुत्पन्ना मनसः स्थितिनिबन्धनीत्यनुवर्त्तते। हृदयपुण्डरीके धारयतो या बुद्धिसंवित् बुद्धिसत्त्वं हि भास्वरमाकाशकल्पं तत्र स्थितिवैशारद्यात् प्रवृत्तिः सूर्येन्दुग्रहमणिप्रभारूपाकारेण विकल्पते" इत्यादि। एतावता योगिन आभ्यन्तरिकं प्रदेशं धारयतः सूर्येन्दुग्रहमणिप्रभाकारमन्तर्दृष्टिगोचरं भवतीत्युक्तं भवति। अस्यामेव भूमिकायामान्तरं योगशास्त्रप्रसिद्धं मेरुदण्डकुण्डलनीशक्तिहृदयादितत्तचक्रस्थितलिंगशक्त्यादि योगिनोऽन्तर्दृष्ट्या प्रपश्यन्तीति योगरहस्यं वेदितव्यम्। कदाचिच्च भ्रूमध्यदेशीयान्तरप्रदेशे लौकिकमन्दिरतत्रत्यप्रतिमादिवत् दिव्यमन्दिरतत्रत्यप्रतिमादि च वस्तु योगिभिरालोक्यत इति योगरहस्यं योग्यनुभूतिगोचरं वेदितव्यम् ॥२।४।३७।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

दर्शनञ्च गुरोः ॥ २ । ४ । ३८ ॥

दर्शनम् अवलोकनम् । चेतिपुनरर्थकमव्ययम् । गुरोः देशिकस्य । अत्र भवतीतियोजनीयम् । लब्धभूमिकस्य योगिनः समाहितस्थितौ पुरुषविशेषः करुणापूरितहृदयः संसारिणमुद्धर्तुकामोऽतीन्द्रियो विज्ञानमुपदिशन् परतत्वं प्रकाशयन् शान्तिं सम्पादयन् अन्तर्दृष्टिगोचरीभवतीतियोग्यनुभूतिर्वेदितव्या । तथाचोक्तं हठसंकेतचन्द्रिकायाम "आज्ञायां वर्त्तते तत्र प्रथमं गुरु दर्शनम्" इति । उक्तञ्च "तत्र निरतिशयं सर्वज्ञबीजम्" इति पातञ्जलसूत्रभाष्ये भाष्यकारैः "यदिदमतीतानागतप्रत्युत्पन्नप्रत्येकसमुच्चयातीन्द्रियग्रहणमल्पं बह्विति सर्वज्ञबीजम् । एतद्धि वर्द्धमानं यत्र निरतिशयं स सर्वज्ञः । अस्ति काष्ठाप्राप्तिः सर्वज्ञत्वबीजस्य सातिशयत्वात् परिणामवदिति । यत्रकाष्ठाप्राप्तिर्ज्ञानस्य ससर्वज्ञः । स च पुरुषविशेष इति सामान्यमात्रोपसंहारे कृतोपक्षयमनुमानं न विशेषप्रतिपत्तौ समर्थमिति । तस्य संज्ञादिविशेषप्रतिपत्तिरागमतः पर्यन्वेष्या । तस्यात्मानुग्रहाभावेऽपि भूतानुग्रहः प्रयोजनम् । ज्ञानधर्मोपदेशेन कल्पप्रलयमहाप्रलयेषु संसारिणः पुरुषानुद्धरिष्यामीति । तथाचोक्तम् "आदिविद्वान् निर्म्माणचित्तमधिष्ठाय कारुण्याद भगवान् परमर्षिरासुरय जिज्ञासमानाय तंत्रं प्रोवाच" इति । अपिच सूत्रितं श्रीमता पतञ्जलिना "स एष पूर्वेषामपिगुरुः कालेनाऽनवच्छेदात्" इति । एतावता ईश्वराभिन्नगुरुरत्रोपलभ्यत इति व्यक्तमितिवेदितव्यम् । इत्थं गुरुदर्शनरूपा दिव्यसम्पत्तिः यस्यानेकजन्मसमर्जितपुण्यपुञ्जस्य भाग्यवतो योगिनो जायते । स हि गुरुमुखगलितज्ञानामृतपानमत्तः तदुक्त्येकचित्तः न गुरोः सर्वावयवं युगपदीक्षितुं पारयति । किन्तु तत्कतिपयावयवावलोकनैकरसास्वादनन्तु भवतीतियोगरहस्यं योग्यनुभूतं वेदितव्यम् । नात्र अकथनीयार्थस्य निर्मलमनोमात्रगोचरस्य प्रकथने वयं प्रभवामः । एकदेशमात्रं शिष्यप्रतीतिप्रसवमत्रोपपादितमितिवेदिव्यम् ।२।४।३८।

ततः स्वरूपदर्शनम् ।२।४।३९॥

ततः गुरुदर्शनानन्तरं । स्वरूपदर्शनं स्वात्मावलोकनम् । अत्र भवतीतियोजनीयम् । लब्धभूमिकस्य योगिनः साकारनिराकारभेदेन द्विविधः स्वरूपसाक्षात्कारो जायते । लब्धभूमिको योगी स्वच्छं हंसस्वरूपमात्मानं पश्यति । तथाचोक्तमुत्तरगीतायाम् "यावत्पश्येत् खगाकारं तदा

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

कारं विचिन्तयेत्" इति। कश्चित् कदाचित्सवितृमण्डमध्यवर्त्तिनं भगवदभिन्नमात्मानं पश्यति। तथा च स्मर्यते "ध्येयः सदा सवितृमण्लडमध्यवर्त्ती नारायणः सरसिजासनसन्निविष्टः। केयूरवान् मकरकुण्डलवान् किरीटी हारी हिरण्मयवपुर्धृतशंखचक्रः" इति श्रूयते च "सूर्यमण्डलान्तर्वर्त्तिनो देवस्य प्रत्यगात्मरूपत्वम् यत्तेरूपं कल्याणतमं तत्ते पश्यामि योऽसावादित्ये पुरुषः सो ऽसावहम्" इति। कश्चित्कदाचित्सूर्यरूपिणमात्मानं पश्यति। तथा च भगवद्वाक्यम् "यदादित्यमयं तेजो मम तेजस्तदर्जुन आदित्यं ये प्रपश्यन्ति मां पश्यन्ति न संशयः" स्मर्यतेऽपि "यन्मण्डलं सर्वगतस्य विष्णोरात्मा परं धाम विशुद्धतत्त्वम् सूक्ष्मान्तरैर्योगपथानुगम्यं पुनातु माँ तत्सवितुर्वरेण्यम्" इति कदाचिद्बहिर्देशीयम् विद्युदिव तेजोरूपिणं स्फुरन्तमात्मानं योगिनः पश्यन्ति इति योगरहस्यं योग्यनुभूतगोचरम् वेदितव्यम्। तथाचोक्तं योगशास्त्रे "ज्योतीरूपमशेषबीजमखिलं देदीप्यमानं परम्। तत्त्वं तत्पदमेति वस्तु परमम् वाच्यं किमत्राधिकम्" इति। कश्चित्कदाचिदादर्शतलप्रतिभातं करचरणाद्यवयववत्स्वाकारमिव अन्तः प्रतिभातं करचरणाद्यवयववत् स्वाकारं पश्यति इति योगरहस्यं योग्यनुभूतिगोचरं वेदितव्यम्। एवं नानाप्रकारेण साकारं स्वात्मानं लब्धभूमिको योगी साक्षात् करोतीति वेदितव्यम्। अत्र योगिभिः समाहितचित्तैः प्रायः सम्प्रज्ञातसमाधौ साकारस्वरूपः स्वात्मा परिचियत इति श्रीमद्गुरुवरसूत्रकारस्वारस्यं वेदितव्यम्। तथाचोक्तम्भारते "यथाहि पुरुषः स्वप्ने दृष्ट्वा पश्यत्यसाविति। तथारूपमिवात्मानं साधु युक्तःप्रपश्यति" इति। एवं साकारस्वरूपसाक्षात्कारम्प्रतिपाद्य निराकारस्वरूपसाक्षात्कारः प्रतिपाद्यते। तथाहि लब्धभूमिको योगी सम्प्रज्ञातसमाधौ निरावरणमात्मानं पश्यति। एकाग्रीभूतया शुद्धसूक्ष्ममनोवृत्त्या प्रतिपद्यत इति यावत्। तथा च स्मर्यते "अतः परं प्रवक्ष्यामि योगशास्त्रमनुत्तमम्। युञ्जन्तः सिद्धमात्मानं यथा पश्यन्ति योगिनः। तस्योपदेशं वक्ष्यामि यथावत्त्वं निबोध मे। यैर्द्वारैश्चारयन्नित्यम्पश्यत्यात्मानमात्मनि। इन्द्रियाणि तु संहृत्य मन आत्मनि धारयेत्। तीव्रं तप्त्वा तपः पूर्वं मोक्षयोगं समाचरेत्। तपस्वी सततं युक्तो योगशास्त्रमथाचरेत्। मनीषी मनसा विप्रः पश्यत्यात्मानमात्मनि। स चेच्छक्नोत्ययं साधुर्योक्तुमात्मानमात्मनि। तत एकान्तशीलः स पश्यत्यात्मानमात्मनि" इति। तथा च भगवद्वाक्यम् "दृश्यते त्वग्र्यया बुद्ध्या सूक्ष्मया सूक्ष्मदर्शिभिः" इति। अत्र सम्प्रज्ञात

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

समाधौ निश्चयशुद्धसत्त्वचित्त्वादिसम्पन्नस्वरूपसम्पत्तिनिष्पत्तिः परिचीयत इति श्रीमद्गुरुवरसूत्रकारस्वारस्यं वेदितव्यम्। मनोवाक्कायाशेषवृत्तिनिवृत्तिस्वभावा या स्थितिः सैव स्वरूपपदवाच्या भवतीति सुवृगम्मतिर्वेदितव्या। तथा च स्मर्यते "सर्वं ह्योपरतिस्तनुः" इति। यथा भारव्यपगमे पथिकः छायासु विश्राम्यति तथैवायम् स्वरूपसम्पत्तौ समाहितो योगी सांसारिकायासरूपदुःसहभारनिवृत्त्यनुकूलमनुत्तमसुखमूलं शाश्वतं स्वसंवेद्यं नैसर्गिकमतिसुमधुरं शान्तिरसमास्वादयतीति वेदितव्यम्। "तदा द्रष्टुः स्वरूपेऽवस्थानम्" इति पातञ्जलसूत्रमपि प्रकृतं पोषयतीति वेदितव्यम्। तथाचोक्तं योगशास्त्रे "आत्मनात्मनि आत्मानं दृष्ट्वानन्तं सुखात्मकम्। विस्मृत्य रमते विश्वं समाधेस्तीव्रतस्तथा॥ २।४।३९॥

यथाशास्त्रं यथाक्रमम्। २।४।४०।

यथाशास्त्रं शास्त्रानुसारेण। यथाक्रमम्। अत्र स्वरूपदर्शनम्भवतीति योजनीयम्। तथाचोक्तं कपिलगीतायाम् "कोटिसूर्य्यप्रतीकाशं चन्द्रकोटिसुशीतलम्। यथोक्तं वेदशास्त्रैस्तद्ध्वेद्दृश्यं हि धीमताम्" इति। २।४।४०

तत आनन्दप्रचयोत्थानम्। २।४।४१।

ततः स्वरूपदर्शनानन्तरम्। आनन्दप्रचयोत्थानम् सुखसन्तानसमुद्गमः। अत्र जायते इति योजनीयम्। तथाचोक्तं योगशास्त्रे "इन्द्रियाणां मनोनाथो मनोनाथस्तु मारुतः। मारुतस्य लयो नाथः स लयो नादमाश्रितः। सोऽयमेवास्तु मोक्षाख्यो मास्तु वापि मतान्तरे। मनः प्राणलये कश्चिदानन्दः सम्प्रवर्त्तते। अमृतोद्दीपिनी विद्या निरपायानिरञ्जना। अमनस्केव सा काचिज्जयत्यानन्ददायिनी। उत्पन्नशक्तिबोधस्य त्यक्तनिश्शेषकर्मणः। योगिनः सहजाऽवस्था स्वयमेव प्रजायते" इति "प्रणष्टोच्छ्वासनिःश्वासः प्रध्वस्तविषयग्रहः। निश्चेष्टो निर्गतारम्भोत्थानन्दं याति योगवित्" इति च अमनस्कोक्तिः प्रकृतं पोषयतीति वेदितव्यम्॥२।४।४१॥

शून्यस्यापि तद्वत्। २।४।४२।

शून्यस्य बाह्याभ्यन्तरिकमनोवृत्त्यभिभावकावस्थानविशेषस्य। स्वरूपभूतस्य। अपीति समुच्चये। अत्रोत्थानमिति योजनीयम् तद्वद् आनन्दप्रचयोत्थानवत्। अत्र भवतीति योजनीयम्। तथाचोक्तमुक्तरगीतायाम्

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

"ऊर्ध्वशून्यमधश्शून्यं मध्यशून्यं यदात्मकम्।सर्वशून्यं स आत्मेति समाधिस्थस्य लक्षणम्" इति । अत्र शून्योत्थानं सिद्धिरूपं वेदितव्यम्।इतरत्र साधनरूपेणापि भवतीति वेदितव्यम्। तथाहि भर्तृहरिं प्रति गोरक्षवाक्यम्"विषयेभ्यः समाहृत्य मनः शून्ये निवेशय" इति ॥२।४।४२॥

लीनं तत्र विज्ञानम् । २ । ४ । ४३ ।

लीनं लयं गतम् । तत्र शून्ये । विज्ञानम्मनः।अत्र भवतीति योजनीयम् "विविधैरासनैः कुम्भैर्विचित्रैःकरणैरपि। प्रबुद्धायां महाशक्तौ प्राणःशून्ये प्रलीयते" इति योगोक्तिः । तत्र मनःसमानवृत्तिकप्राणलयं प्रतिपादयन्ती मनोलयमपि प्रमापयतीति वेदितव्यम् । श्रीमान् सूत्रकारः अनेन सूत्रेण पूर्वोक्तशून्यस्वरूपं परिचाययतीति वेदितव्यम् ॥२।४।४३॥

तदा विषयाणामपरिग्रहः २ । ४ । ४४ ।

तदा विज्ञानलये चित्तवृत्ति निरोधेऽसम्प्रज्ञातसमाधिपदवाच्यस्वरूपप्रतिष्ठायामितियावत्। विषयाणां जीवात्मबन्धनभूतानां शब्दस्पर्शरूप रस गन्धानाम् । अपरिग्रहोऽनुपलब्धिः।अत्र भवतीति योजनीयम्। तथाचोक्तं श्रीमता व्यासेन "योगश्चित्त वृत्तिनिरोधः" एतत्सूत्रीयभाष्ये "न तत्र किञ्चित्सम्प्रज्ञायते" इति। अनेनापि सूत्रेण श्रीमान् गुरुवरः सूत्रकारः पूर्वोक्तशून्यं परिचाययतीति वेदितव्यम् "क्व चैष व्यवहारो वा क्व च सा परमार्थता। क सुखं क्व च वा दुःखं निर्विषयस्य मे सदा"इत्यष्टावक्रगीतोक्तिरपिप्रकृतं पोषयतीति वेदितव्यम् ॥२।४।४४॥

संसृतौ पुनः प्रत्यावर्त्तनम् । २ । ४ । ४५

संसृतौ संसारपदवाच्यव्यवहारदशायाम् । पुनः समाध्यनन्तरम्। प्रत्यावर्त्तनम्प्रत्यावृत्तिः । अत्र भवतीति योजनीयम् । एतावता एतदुक्तं भवति समाहितो योगी समाधितो व्युत्थितः सन् पुनराहारादिसांसारिकव्यवहारवान् भवति। न केवलं निष्क्रियःसन् मूकवत्तिष्ठति । ननु योगिनां व्युत्थानदशायाम् सामान्येन सांसारिकजनवद् व्यवहाराभ्युपगमे कथं संसारिजनवैपरीत्येन तेषां दुःखनिवृत्तिप्रज्ञाप्रतिष्ठाचेति शंकायाम् गीतावाक्यं समाधत्ते"रागद्वेषवियुक्तैस्तु विषयानिन्द्रियैश्चरन् । आत्मवश्यैर्विधेयात्मा प्रसादमधिगच्छति। प्रसादे सर्वदुःखानां हानिरस्योपजायते । प्रसन्नचेतसो ह्याशु बुद्धिः पर्यवति-

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

ष्ठते "इति "वृत्तिसारूप्यमितरत्र" इति पातञ्जलसूत्रम्प्रकृतम्पोषयतीति वेदितव्यम ॥२।४।४५॥

सुप्तोत्थितवत् ॥ २ । ४ । ४६ ।

सुप्तोत्थितवत् यथा पूर्वं सुप्तो जनः निष्क्रियः सन् पश्चादुत्थितः क्रियावान् भवति। तथा पूर्वं समाहितो निर्व्यवहारः सन् पश्चाद्व्युत्थितः व्यवहारवान् भवतीति तयोः सादृश्यं वेदितव्यम्। यद्वा यथा सुप्तः पुरुष उत्थितः सन् सौप्तिकमर्थमनृतं जानन् तत्र निःसंगो भवति। तथाऽयम् योगिजनः स्वप्नरूपाज्ञानदशानुभूतमर्थं जाग्रद्ब्रह्मज्ञानदशासम्पन्नः सन् अनृतं जानन् तत्र निःसङ्गो भवति। तथाच स्मर्यते "निःसङ्गः प्रज्ञया भवेत्" इति "गुणा गुणेषु वर्त्तन्त इति मत्वा न सज्जते" इति भगवदुक्तिरपि प्रकृतं पोषयतीति वेदितव्यम् ॥२।४।४६॥

प्रमाणनैरपेक्ष्यम्प्रवृत्तौ ।२।४।४७।

प्रमाणनैरपेक्ष्यम् प्रमाणस्य विधिनिषेधवाक्यस्य नैरपेक्ष्यम् निरपेक्षत्वम्प्रवृत्तौ शास्त्रीयलौकिकाचरणे। अत्र भवतीति योजनीयम्। तथाचोक्तम् अष्टावक्रगीतायाम् "क्व प्रमाता प्रमाणं वा क्व प्रमेयं क्व च प्रमा। क्व किंचित् केन किंचिद् वा सर्वदा विमलस्य मे। क्व विक्षेपः क्वचैकाग्र्यं क्व निरोधः क्व मूढता। क्व हर्षः क्व विषादो वा सर्वदा निष्क्रियस्य मे" इति "निस्त्रैगुण्ये पथि विचरताम् को विधिः को निषेधः" इत्यादिशिष्टोक्तिरपि प्रकृतं पोषयतीति वेदितव्यम् ॥२।४।४७।

विरतौ सिद्धिसमागमः ।२।४।४८।

विरतौ वैराग्ये। सिद्धिसमागमः मुक्तिलाभः। अत्र भवतीति योजनीयम्। तथाच श्रूयते "यदा सर्वे प्रमुच्यन्ते कामा येऽस्य हृदि स्थिताः। अथ मर्त्योऽमृतो भवत्यत्र ब्रह्म समश्नुते" इति। यद्वा सिद्धिशब्दात् अणिमाद्यष्टविधकायसिद्धिः दूरश्रुत्यादीन्द्रियसिद्धिश्च वेदितव्या। भवति चैषा सिद्धिः अशुद्ध्यावरणमलरूपरागक्षयात्। तथा च पातञ्जलसूत्रम् "कायेन्द्रियसिद्धिरशुद्धिक्षयात्तपसः" इति। उक्तञ्चात्र भाष्ये श्रीमता व्यासेन "निर्वर्त्यमानमेव तपो हिनस्त्यशुद्ध्यावरणमलम्. तदाऽऽवरणमलापगमात् कायसिद्धिः अणिमाद्या. तथेन्द्रियसिद्धिः दूराच्छ्रवणदर्शनाद्येति" इति। अत्र तपश्शब्देन "शारीरशोषणं प्राहुः

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

तापसास्तप उत्तमम्" इति स्मृतेः कृच्छ्रचान्द्रायणसान्तपनादिव्रतम् जिघत्सापिपासाशीतोष्णादिद्वन्द्वसहनं वा वेदितव्यम् । यद्वा "यस्य ज्ञानमयं तपः" इतिश्रुतेः ज्ञानं वेदितव्यम् । ततश्च तत्साधनीभूतयोगसांख्यमपि अभ्युपगन्तव्यम् इति वेदितव्यम् । "प्रातिभः श्रावणो दैवो भ्रमावर्तौ तथापरौ । पञ्चैते योगिनां योगविघ्नाय कटुकोदयाः । वेदार्थाः काव्यशास्त्रार्था विद्याशिल्पाद्यशेषतः । प्रतिभान्ति यदेतस्य प्रातिभः स तु योगिनः । शब्दार्थानखिलान्वेत्ति शब्दं गृह्णाति चैव यत् योजनानां सहस्रेभ्यः श्रावणः सोऽभिधीयते । समन्ताद् वीक्ष्यते चाष्टौ स यदा देवतोपमः । उपसर्गं तमप्याहुर्दैवमुत्तमवद्बुधाः । भ्राम्यते यन्निरालम्बं मनोदोषेण योगिनः । समस्ताचारविभ्रंशात् भ्रमः स परिकीर्तितः । आवर्त इव तापस्य ज्ञानावर्तो यदाकुलः । नाशयेच्चित्तमावर्त उपसर्गः स उच्यते" इति मार्कण्डेयपुराणोक्तिरपि प्रकृतं पोषयतीति वेदितव्यम् ।२।४।४८।

इति परमपूज्यपादश्रीमद्योगदत्तशर्मकृतामृतोपदेशे पूज्यपाद श्रीमद्योगदत्तशर्मशिष्यश्रीमत्सत्यनारायणशर्मकृतभाष्ये द्वितीयाध्यायस्य चतुर्थः पादः समाप्तः ॥

समाप्तश्चायमध्यायः ।

करुणापूरितहृदयः शिष्यानुद्धर्त्तुकामः श्रीमान् गुरुवरः सूत्रकारः प्रथमाध्याये विज्ञानसाधनभूतं योगसांख्यं प्रतिज्ञाय द्वितीयाध्याये योगमुपदिश्य इदानीं तृतीयाध्यायमारभमाणः सांख्यमुपदिशति—

प्राकृतेषु वस्तुषु दोषदर्शनपुरःसर आत्मविवेकः सांख्यम् ॥ ३ । १ । १ ॥

श्रीमान् गुरुवरः सूत्रकारः कपिलाद्यभिहितविलक्षणरूपि सांख्यं परिचाययति--प्राकृतेषु प्रकृतिविकारेषु मायिकेष्वतियावत् । वस्तुषु पदार्थेषु । दोषदर्शनपुरःसरः क्षणभंगुरत्वाद्यवगुणदृष्टिपूर्वक वैराग्यवलितः। आत्मविवेकः सत्त्वपुरुषान्यताख्यातिसचिवः प्रकृतितो विक्तनिर्गुणनिर्दुष्टपुरुषविचारः सांख्यम् । संख्यायन्ते परिगण्यन्ते नियतसंख्यया पुरुषप्रकृतिमहत्तत्त्वादितत्त्वान्यस्मिन्निति । संख्यायते सम्यग् ज्ञायते पुरुषोऽस्मिन्निति वा सांख्यपदव्युत्पत्तिरपि एतत्स्वारस्यमनुमोदत इति वेदितव्यम् । तथा स्मर्यते "अलमर्थेन कामेन सुकृतेनापि कर्मणा । एभ्यः संसारकान्तारे न विश्रान्तमभून्मनः ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

साकारमनृतं विद्धि निराकारन्तु निश्चलम् । एतत्तत्त्वोपदेशेन न पुनर्भवसम्भवः । अहो निरञ्जनः शान्तो बोधोऽहं प्रकृतेः परः । एतावन्तं महाकालं मोहेनैव विडम्बितः । अनृतं सर्वमेवेदं तापत्रितयदूषितम् । असारं निन्दितं हेयमिति निश्चित्य शाम्यति" इति ॥३।१।१।

हेयोपादेयार्थबोधस्य आत्मविवेकोपयोगित्वात् श्रीमान् गुरुवरः सूत्रकारो वक्ष्यमाणसूत्रेण तावर्थौ प्रतिजानाति—

हेयोपादेयौ ज्ञातव्यौ । ३ । १ । २ ।

हेयोपादेयौ हेयस्त्याज्योऽर्थः उपादेयो ग्राह्योऽर्थः तौ हेयोपादेयौ ज्ञातव्यौ । अत्र भवत इति योजनीयम् ॥३।१।२।

हेयन्दुःखमविधेयम् ३ । १ । ३ ॥

हेयं त्याज्यम् । दुखं कष्टम् । अविधेयम् अविधिप्रचोदितम् । एतावता एतदुक्तं भवति वृथोपवासादि शास्त्रेणाऽविधीयमानं यत् किञ्चित् दुःखजनकं कर्म तन्न कर्त्तव्यम् । मनोऽव्यग्रीकरणेन विक्षेपमोहादिहेतुत्वात् वृथापीडाजनकत्वेनाऽधर्महेतुत्वाच्च । तथाचोक्तम्भगवद्गीतायाम् "अशास्त्रविहितं घोरं तप्यन्ते ये तपो जनाः । दम्भाहंकारसंयुक्ताः कामरागबलान्विताः । कर्षयन्तः शरीरस्थं भूतग्राममचेतसः । माञ्चैवान्तःशरीरस्थं तान् विद्ध्यासुरनिश्चयान्" इति ॥३।१।३।

सुखमनिषिद्धमुपादेयम् ॥ ३ । १ । ४ ।

सुखं शर्म । अनिषिद्धं शास्त्रीयनिषेधाविषयीभूतमप्रशस्तमितियावत् । उपादेयं ग्राह्यम् । "अविरुद्धसुखत्यागी पशुरेव न संशयः" इत्यादिशिष्टोक्तिः प्रकृतं पोषयतीति वेदितव्यम् ॥३।१।४।

मनउद्वेगनिमित्तं दुःखम् ।३।१।५।

मन उद्वेगनिमित्तम्मनसः उद्वेगनिमित्तम् उद्वेगहेतुः । तथाभूतं दुःखं कष्टम् । यः कश्चिदर्थो मन उद्वेजयति सोऽर्थः दुखपदवाच्यो भवतीत्यर्थो वेदितव्यः । विषयोपभोगः प्रसिद्ध्या सुखपदवाच्योऽपि सन् यदि ज्ञानिनां विषयनिर्विण्णचेतसाम्मन उद्वेजयति तर्हि सोऽपि दुःखमेव । तथा सूत्रितम् श्रीमता पतञ्जलिना "परिणामतापसंस्कारदुःखैर्गुणवृत्तिविरोधाच्च दुःखमेव सर्वं विवेकिनः" इति भोगेष्विन्द्रियाणाम् लौल्यादनुपशान्तिः सैव दुःखपदवाच्या भवतीत्यर्थो वेदितव्यः ॥३।१।५।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

मनःप्रसादनिमित्तं सुखम् । ३ । १ । ६ ।

मनःप्रसादनिमित्तम्मनसः प्रसन्नताहेतुः । तथाभूतं सुखं शर्म्म । यः कश्चिदर्थो मनः प्रसादयति सोऽर्थः सुखपदवाच्यो भवतीत्यर्थो वेदितव्यः । विषयानुपभोगः प्रसिद्ध्या दुःखपदवाच्योऽपि सन् यदि ज्ञानिनाम् आत्मारामाणाम्मनः प्रसादयेत् तर्हि सोऽपि सुखमेवेति वेदितव्यम । तथाचोक्तं भगवद्गीतायाम् "यत्तदग्रे विषमिव परिणामेऽमृतोपमम् । तत्सुखं सात्त्विकं प्रोक्तमात्मबुद्धिप्रसादजम्" इति । यद्वा कदन्नजीर्णपटादि वस्तु प्रसिद्ध्या दुःखपदवाच्यम् । यदि सन्तुष्टचेतसां चेतःप्रसादाय भवेत् तदा तदपि सुखमेव वेद्यम् । तथाच पातञ्जलसूत्रम् "सन्तोषादनुत्तम सुखलाभः" इति । भोगेष्विन्द्रियाणां तृप्तेर्योपशान्तिः सा सुखपदवाच्या भवति । ननु लोके भोजनादिरूपविषयोपभोगात्तृप्तिदर्शनादस्तु विषयोपभोग एव तृप्तिहेतुर्न तदनुपभोग इति चेत्तदुच्यते-नहीन्द्रियाणां विषयोपभोगेन तृप्तिः सम्पादयितुं शक्या कस्मात् यतो विषयोपभोगमनुविवर्द्धमानो रागो रागिणं क्लिश्नाति । तस्मान्न हेतुस्तृप्तेर्विषयोपभोग इति वेदितव्यम् । ततश्चानुपायो विषयोपभोग उपशान्तेस्ततः सुखस्येत्युपपन्नं वेदितव्यम । तथा च स्मर्यते "न जातु कामः कामानामुपभोगेन शाम्यति । हविषा कृष्णवर्त्मेव भूय एवाभिवर्द्धते" इति । ३।१।६।

इति परमपूज्यपादश्रीमद्योगदत्तशर्मकृताऽमृतोपदेशे पूज्यपादश्रीमद्योगदत्तशर्मशिष्यश्रीमत्सत्यनारायणशर्मकृतभाष्ये तृतीयाध्यायस्य प्रथमः पादः समाप्तः ॥

श्रीमान् गुरुवरः सूत्रकारो दुःखस्य हेतुं दर्शयति साधकानां तदवगमात् ततो निग्रहनिष्पत्तेः-

कामनाभिघाताद्दुःखम् ।३।२।१।

कामनाभिघातात् मनोरथभङ्गात् । दुःखं कष्टम् । अत्र भवतीति योजनीयम् । एतावता एतदुक्तं भवति कामना प्रतिहता सती दुःखमुत्पादयति ततः सैव तद्धेतुः सती कार्यकारणयोरभेदाभ्युपगमात् तद्रूपभूता च । तथाच स्मर्यते दुःखं कामसुखापेक्षा" इति । उक्तञ्च भगवद्गीतायाम् "कामात् क्रोधोऽभिजायते" इति । कामात्प्रतिहताद्दुःखमुत्पद्यमानं क्रोधरूपेण परिणमते इत्यर्थो

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

वृद्धसम्मतो वेदितव्यः। दृश्यतेऽपि लोके कामुको जनः केनचित्प्रतिहतकामः सन् दुःखमनुभवन् सामर्षो जिघांसाचरितश्च। अतश्चेयं कामना प्रयत्नसहस्रैर्विषयदोषदर्शनाद्युपायैस्त्याज्यैवेति वेदितव्यम्। तथाचोक्तमष्टावक्रगीतायाम् "विहाय वैरिणं काममर्थं चानर्थसंकुलम्। धर्ममर्थं तपोहेतुं सर्वत्रानादरं कुरु" इति "काममाश्रित्य दुःपूरं दम्भमानमदान्विताः। मोहाद्गृहीत्वा सद्ग्राहान् प्रवर्त्तन्तेऽशुचिव्रताः। चिन्तामपरिमेयाञ्च प्रलयान्तामुपाश्रिताः। कामोपभोगपरमा एतावदिति निश्चिताः। आशापाशशतैर्बद्धाः कामक्रोधपरायणाः। ईहन्ते कामभोगार्थमन्यायेनार्थसंचयान्। इदमद्य मया लब्धमिदम्प्राप्स्ये मनोरथम्। इदमस्तीदमपि मे भविष्यति पुनर्द्धनम्। असौ मया हतः शत्रुर्हनिष्ये चापरानपि। ईश्वरोऽहमहं भोगी सिद्धोऽहं बलवान् सुखी। आढ्योऽभिजनवानस्मि कोऽन्योऽस्ति सदृशो मया। यक्ष्ये दास्यामि मोदिष्य इत्यज्ञानविमोहिताः। अनेकचित्तविभ्रान्ता मोहजालसमावृताः। प्रसक्ताः कामभोगेषु पतन्ति नरकेऽशुचौ" इति भगवद्गीतोक्तिरपि कामनां दुःखहेतुं प्रतिपादयन्ती निन्दतीति वेदितव्यम्।३।२।१।

तद्विपर्ययाच्च सुखम्। ३। २। २।

तद्विपर्ययात् कामनाऽनभिघातात्। चेति पुनरर्थकमव्ययम्। सुखं शर्म्म। अत्र भवतीति योजनीयम्। यद्वा तद्विपर्ययात् अकामनायाः तृष्णाक्षयादिति यावत्। तथाच स्मर्यते "यच्च कामसुखं लोके यच्च स्वर्गे महत्सुखम्। तृष्णाक्षयसुखस्यैते नार्हतः षोड़शीं कलाम्। अर्जयित्वाऽखिलानर्थान् भोगानाप्त्वाऽतिपुष्कलान्। नहि सर्वपरित्यागमन्तरेण सुखी भवेत्। कर्तव्यो दुःखमार्त्तण्ड ज्वालादग्धान्तरात्मना। कुतः प्रशमपीयूषधारासारमृते सुखम्। चिन्तया जायते दुःखम् नान्यथेति विनिश्चयम्। तया हीनः सुखी शान्तः सर्वत्र विगतस्पृहः" इत्यादि।३।२।२।

श्रीमान् गुरुवरः सूत्रकारो निरुक्तकामनां परिचाययति—

साऽभीष्टाऽवियोगलाभयोः। ३। २। ३।

सा निर्दिष्टा कामना। अभीष्टावियोगलाभयोः ईप्सिता विश्लेषप्राप्त्योः। अत्र भवतीति योजनीयम्। अभीष्टाऽवियोगलाभसम्बन्धिनी कामना भवतीत्यर्थो वेदितव्यः। क्षेमपदवाच्यं प्राप्तरक्षणमपि अवियोगपदेनैवोपात्तमिति वेदितव्यम्। योगस्तु लाभपदवाच्य एवेति वेदितव्यम्।३।२।३।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

श्रीमान् गुरुवरः सूत्रकारो निरुक्तकामनां क्रमेण वक्ष्यमाणसूत्रचतुष्टयेन दूषयति-

सर्वं वस्तुजातं विनश्वरम् । ३ । २ । ४ ॥

सर्वमखिलम्। वस्तुजातं ब्रह्मेतरपदार्थसमूहः। विनश्वरमनित्यम्। अत्र चिन्तनीयमिति योजनीयम्। तथाचोक्तम्भगवद्गीतायाम् "नाऽसतो विद्यते भावः" इति। तथाच श्रूयते "अतोऽन्यदार्त्तम्" इति। एतावता एतदुक्तं भवति यतो निरुक्ताशेषपदार्थः अनित्यस्ततः तस्य कामना अनित्यवस्तुप्रापिका अज्ञाननिबन्धना व्यर्थैवेति। ३।२।४।

प्राप्तिरप्यनियामिका ।३।२।५।

प्राप्तिर्लाभः। अपीति निश्चये। अनियामिका स्वनिष्पत्तौ विशयविषया अनिश्चया इति यावत्। एतावता एतदुक्तं भवति कामना गर्हिता कामितार्थप्राप्तावनियमात् तदर्थप्रयासप्राचुर्य्याच्च प्राप्तावपि प्राप्तार्थविनश्वरत्वात् सा गर्हितैवेति भावो वेदितव्यः।३।२।५।

अतः सापि दुःखपर्यवसायिनी ।३।२।६।

अतो निरुक्तार्थविनश्वरत्वाद्धेतोः। सापि प्राप्तिरपि। दुःखपर्यवसायिनी दुःखोदर्का दुःखरूपोत्तरफलप्रदा इति यावत्। एतावता एतदुक्तं भवति-योगे रक्षणप्रयासबाहुल्यात् वियोगे शोकादिप्रदत्वाच्च वस्तुप्राप्तिरपि गर्हितैव। अतस्तत्कामनाऽपि गर्हितैवेति भावो वेदितव्यः। दृश्यते च लोकेऽयं जनः पुत्राद्यर्थप्राप्तौ अहर्निशं दुःसहभारं परिवहन् व्याप्रियमाणो भवति। तद्विनाशे हाहेति वदन् मुहुरुष्णन्निःश्वसन् उरःकपालञ्च ताडयन्नुच्चैःप्ररुदन् दुःसहदुःखनिमग्नो भवतीति "संसारे रे मनुष्या वदत यदि सुखं स्वल्पमप्यस्ति किञ्चित्" इत्यादि शिष्टोक्तिरपि प्रकृतं पोषयतीति वेदितव्यम्। यद्वा प्राप्तेरनियामिकत्वात् साऽपि कामनापि दुःखपर्यवसायिनी दुःखोदर्का व्यर्थाऽऽयासादिहेतुत्वादित्यर्थो वेदितव्यः।३।२।६।

अनर्थस्य च हेतुः ।३।२।७

अनर्थस्य नरकादेः। चेति राजदण्डादि समुच्चिनोति। हेतुः कारणम्। एतावता एतदुक्तम्भवति सा प्राप्तिः कामना वा अपुण्यजनकत्वात्

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

नरकाद्यनर्थं जनयति । राजदण्डादि दापयति चेति । तथाचोक्तम्भगवद्गीतायाम् "काममाश्रित्य" इत्यादि "पतन्ति नरकेऽशुचौ" इत्यन्तञ्च "अर्थमनर्थं भावय नित्यं नास्ति ततः सुखलेशः सत्यम्" इत्यादिशिष्टोक्तिरपि प्रकृतं पोषयतीति वेदितव्यम् ।३।२।७।

इति परमपूज्यपादश्रीमद्योगदत्तशर्मकृतामृतोपदेशे पूज्यपादश्रीमद्योगदत्तशर्मशिष्यश्रीमत्सत्यनारायणशर्मकृतभाष्ये तृतीयाध्यायस्य द्वितीयः पादः समाप्तः ॥

अमृतं ज्ञानसम्पाद्यम् । ३ । ३ । १ ।

अमृतम्मुक्तिः। ज्ञानसम्पाद्यं ज्ञानलभ्यम्। अत्र भवतीति योजनीयम्। तथाच श्रूयते"ज्ञानान्मुक्तिः"स्मर्य्यते च"ज्ञानादेवाऽमृतत्वम्"इति ।३।३।१।

ज्ञानम्मनननिष्पाद्यम् । ३।३।२ ।

ज्ञानं ज्ञप्तिः। मननसम्पाद्यम् श्रवणावधारितार्थशंकानिरसनरूपमनोव्यापारगम्यम्। तथा च श्रूयते" आत्मा वा रे ! श्रोतव्यो मन्तव्यो निदिध्यासितव्यः साक्षात्कारः कर्त्तव्यः"इति ।३।३।२।

तदनुकूलं चित्तशोधनम् । ३ । ३ । ३ ।

तदनुकूलं ज्ञाननिष्पत्त्यनुकूलम् । चित्तशोधनम्मलोरागादिरूपकषायापनोदनम्।अत्र भवतीति योजनीयम्। शुद्धे चेतसि शुद्धात्मप्रकाशाभ्युपगमात्। तथाचोक्तं कपिलगीतायाम्"बहिर्गतः कोऽपि शिष्यो निवृत्तः शीघ्रमालयम्। प्रविवेशान्धभवनंद्रष्टुं किंचिच्छशाक न। तत्र चास्मिन् स्थिरीभूते अन्धकारः प्रभाऽभवत्। तदेव दृश्यते वस्तु स्वयं चक्षुश्च पश्यति। अज्ञानपूर्णे हृदये तमःपूर्णे च मानसे। दृश्यते न च वस्तुवैं पश्यता सुस्थिरीभूय । वस्तु तत्सर्वमेव हि हृदये त्वन्धभवने। दृश्यते च निरन्तरमकल्पितोद्भवं ज्योतिः। स्वयं ज्योतिः प्रकाशितम्। अकस्माद् दृश्यते ज्योतिस्तज्ज्योतिः परमात्मनि" इति ।३।३।३।

यतो ग्राह्यग्राहकयोः साधर्म्यम् ।३।३।४।

यतः यस्मात्।ग्राह्यग्राहकयोः ग्रहणक्रियाकर्मकर्तृभूतयोरर्थयोः। साधर्म्यम् समानधर्मत्वम्। अत्र भवतीति योजनीयम्। यथा तेजीयश्चक्षुः तेजीयो रूपं गृह्णाति। यथा भास्वरं जलं भास्वरं सूर्येन्दुप्रति-

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

विम्बं गृह्णाति । तथा शुद्धं चित्तं शुद्धमात्मानं गृह्णाति प्रकाशयतीति सादृश्यं वेदितव्यम् ।३।३।४।

तच्च जन्माद्यनुकूलप्रवृत्तिहेतुसंस्कारापनोदनम् ।३।३।५

तच्छब्दः पूर्वोक्तचित्तशोधनं परामृशति । चकारः ज्ञानं समुच्चिनोति । जन्माद्यनुकूलप्रवृत्तिहेतुसंस्कारापनोदनम् जात्यायुर्भोगसञ्चित्रप्रवृत्तिनिमित्तवासनानिराकरणम् । ये संस्कारा अनेकभवपूर्विका अनादिकालीनाः स्मृतिहेतवः जात्यायुर्भोगोन्मुखप्रवृत्तिनिमित्तीभूतास्ते वासनापदवाच्या भवन्तीति वेदितव्यम् । क्लेशकर्मविपाकानुभवनिमित्ताभिस्तु वासनाभिरनादिकालसंवासितमिदं चित्तम् चित्रीकृतमिव सर्वतो मत्स्यजालं ग्रन्थिभिरिवाततमिति वृद्धसम्मतम् । तथा च स्मर्यते "वासना एव संसार इति सर्वा विमुञ्चत । यत्यागो वासनात्यागात् स्थितिरप्ययथातथा" इत्यतः निरुक्तवासनानिराकरणमेव चित्तशोधनपदवाच्यम् श्रीमद्गुरुवरसूत्रकारसम्मतमुपपन्नम्भवतीति वेदितव्यम् ।३।३।५।

तच्च पापानुत्पत्तिध्वंसहेतुकर्मसम्भवम् ।३।३।६।

तच्छब्दः चित्तशोधनं परामृशति । चकारः पुनरर्थकः । पापानुत्पत्तिध्वंसहेतुकर्मसम्भवम् नित्यनैमित्तिकप्रायश्चित्तकर्मप्रसवम् । अत्र भवतीति योजनीयम् । तथाचोक्तं रामगीतायाम् "आदौ स्ववर्णाश्रमवर्णिताः क्रियाः कृत्वा समासादितशुद्धमानसः । समाप्य तत्पूर्वमुपात्तसाधनः समाश्रयेत्सद्गुरुमात्मलब्धये" इति "न कर्मणामनारम्भान्नैष्कर्म्यं पुरुषोऽश्नुते" इति भगवद्वाक्यमपि प्रकृतम्पोषयतीति वेदितव्यम् ।३।३।६।

काम्यमपि सात्त्विकं फलानपेक्षं तस्य निमित्तम् ।३।३।७।

काम्यं सकामम् । अत्र कर्मपदं योजनीयम् । अपीति समुच्चये । सात्त्विकं सत्त्वगुणनिष्पन्नम् । फलानपेक्षं फलानां स्वर्गादीनाम् अनपेक्षा अव्यपाश्रयः यस्य तत्तथाभूतं स्वर्गादिफलवाञ्छाविरहितमित्यर्थः । तस्य निमित्तं चित्तशोधनस्य हेतुः । अत्र भवतीति योजनीयम् । तथाचोक्तम्भगवद्गीतायाम् "यज्ञार्थात्कर्मणोऽन्यत्र

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

लोकोऽयं कर्मबन्धनः'' "नियतं संगरहितमरागद्वेषतः कृतम् । अफल-प्रेप्सुना कर्म यत्तत्सात्त्विकमुच्यते' "कर्मण्येवाधिकारस्ते मा फलेषु कदाचन । मा कर्मफलहेतुर्भूर्मा ते संगोऽस्त्वकर्मणि'' "यज्ञदानतपः कर्म न त्याज्यं कार्यमेव तत् । यज्ञो दानं तपश्चैव पावनानि मनीषि-णाम्"''कायेन मनसा बुद्ध्या केवलैरिन्द्रियैरपि। योगिनः कर्म कुर्वन्ति संगं त्यक्त्वाऽऽत्मशुद्धये । युक्तः कर्मफलं त्यक्त्वा शान्तिमाप्नोति नैष्ठिकीम् । अयुक्तः कामकारेण फले सक्तो निबध्यते'' इति ।३।३।७।

इति परमपूज्यपादश्रीमद्योगदत्तशर्म्मकृताऽमृतोपदेशे पूज्य-पादश्रीमद्योगदत्तशर्म्मशिष्यश्रीमत्सत्यनारायणशर्मकृतभाष्ये तृतीया ध्यायस्य तृतीयः पादः समाप्तः ॥

ततः सत्त्वसमुद्रेकः ।३।४।१।

ततः चित्तशोधनानन्तरम् । सत्त्वसमुद्रेकः सुखप्रकाशनादिरूप-सत्त्वगुणाधिक्यम् । अत्र भवतीति योजनीयम् । तथाचोक्तम् "योग-श्चित्तवृत्तिनिरोधः" एतत्पातञ्जलसूत्रभाष्ये श्रीमता भाष्यकारेण व्यासेन चित्तं हि प्रख्या-प्रवृत्ति-स्थितिशीलत्वात् त्रिगुणम् । प्रख्यारूपं हि चित्तसत्त्वं रजस्तमोभ्यां संसृष्टमैश्वर्यविषयप्रियं भवति । तदेव तमसाऽनुविद्धमधर्म्माऽज्ञानावैराग्यानैश्वर्य्योपगम्भवति। तदेव प्रक्षीण-मोहावरणम्प्रद्योतमानमनुविद्धं रजोमात्रया धर्मज्ञानवैराग्यैश्वर्यो-पगं भवति । तदेव रजोलेशमलापेतं सत्त्वपुरुषान्यताख्यातिमात्रं धर्ममेघध्यानोपगम्भवति । तत्परम्प्रसंख्यानमित्याचक्षते ध्यायिनः । चितिशक्तिरपरिणामिन्यप्रतिसंक्रमा दर्शितविषया शुद्धा चानन्ता च सत्त्वगुणात्मिका चेयम्'' "रजस्तमश्चाभिभूय सत्त्वं भवति भारत" इतिभगवद्वाक्यमपि प्रकृतं पोषयतीति वेदितव्यम् ।३।४।१।

रतिविरत्योश्चानुकूलप्रतिकूलयोः ।३।४।२।।

रतिविरत्योःरागविरागयोः। चेति पुनरर्थकः। अनुकूलप्रतिकूलयोः नित्यानित्यवस्तुनोः । अत्र समुद्रेको भवतीति योजनीयम् । एतावता एतदुक्तम्भवति चित्तशोधने सति साधनानुकूलनित्यवस्तुनः रागो वर्द्धते । साधकप्रतिकूलानित्यवस्तुनो विरागो वर्द्धत इति । यद्वा अनुकूलप्रतिकूलशब्दौ ज्ञानाज्ञानपरौ वेदितव्यौ ते च मोक्षबन्धहेतु-त्वात्साधकानाम् अनुकूलप्रतिकूले भवितुमर्हत इति युक्तं वेदितव्यम् ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

ज्ञानाज्ञाने च व्यपदिष्टे भवगद्गीतायाम् । "अमानित्वमदंभित्व- महिंसा क्षान्तिरार्जवम् । आचार्योपासनं शौचं स्थैर्यमात्मविनिग्रहः । इन्द्रियार्थेषु वैराग्यमनहंकार एव च । जन्ममृत्युजराव्याधिदुःखदोषा- नुदर्शनम् । असक्तिरनभिष्वङ्गः पुत्रदारगृहादिषु । मयि चानन्ययोगेन भक्तिरव्यभिचारिणी। विविक्तदेशसेवित्वमरतिर्जनसंसदि। अध्यात्मज्ञान- नित्यत्वं तत्त्वज्ञानार्थदर्शनम्। एतज्ज्ञानमितिप्रोक्तमज्ञानं यदतोऽन्यथा" इति। अत्र ज्ञानशब्देन ज्ञानसाधनमपि गृहीतमिति वेदितव्यम् ।३।४।२।

आपरितोषादनावश्यकम् ।३।४।३।

आपरितोषात् परितोषपर्यन्तम् । अनावश्यकं काम्यम् । अत्र कर्माऽपि विधेयम्भवतीति योजनीयम् । तथाचोक्तम्भगवद्गीतायाम् "कर्मेन्द्रियाणि संयम्य य आस्ते मनसा स्मरन्। इन्द्रियार्थान् विमूढात्मा मिथ्याचारः स उच्यते । यस्त्विन्द्रियाणि मनसा नियम्याऽऽरभते- अर्जुन ! । कर्मेन्द्रियैः कर्मयोगमसक्तः स विशिष्यते" इति ।३।४।३।

शुद्धे चेतसि परितोषः ।३।४।४।

शुद्धे चेतसि निर्मले चित्ते। परितोषः सन्तोषः कामासक्तिनिवृत्ति- रिति यावत् । एष सन्तोषः साधकानुभूतिगोचरो वेदितव्यः । अत्र भवतीति योजनीयम् । तथाचोक्तमष्टावक्रगीतायाम् "क्व धनानि क्व मित्राणि क्व मे विषयदस्यवः। क्व शास्त्रं क्व च विज्ञानं यदा मे गलिता स्पृहा। विज्ञाते साक्षिपुरुषे परमात्मनि चेश्वरे। नैराश्ये बन्ध- मोक्षे च क्व चिन्ता मुक्तये मम" इति "तत्परं पुरुषख्यातेर्गुणवैतृष्ण्यम्" इति पातञ्जलसूत्रमपि प्रकृतं पोषयतीति वेदितव्यम् ।३।४।४

परितोषे त्वावश्यकमनावश्यकम् । ३ । ४ । ५ ।

परितोषे निरुक्तकर्मासक्तिनिवृत्तौ। तुशब्दः परितोषप्राक्कालीनाम- परितोषाऽवस्थां व्यावर्तयति। आवश्यकं विधेयम्। अत्र कर्मेति योजनी- यम् । अनावश्यकम् अविधेयम् । अत्र भवतीति योजनीयम् ।

तथा च भगवद्वाक्यम् "यस्त्वात्मरतिरेव स्यादात्मतृप्तश्च मानवः। नैव तस्य कृतेनाऽर्थो नाकृतेनेह कश्चन" "सर्वं कर्माखिलं पार्थ! ज्ञाने परिसमाप्यते" इति ।३।४।५।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

अनात्मस्वविश्रान्तं मनः आत्मन्येव विश्राम्यति ।३।४।६।

अनात्मसु विषयेषु । अविश्रान्तमनुपशान्तम् मनोऽन्तःकरणम् । आत्मन्येव स्वस्वरूप एव । विश्राम्यति उपशाम्यति । तथाचोक्तमष्टावक्रगीतायाम् "कृतानि कति जन्मानि कायेन मनसा गिरा । दुःखमायासदं कर्म तदद्याप्युपरम्यताम् । भावाभावविकारश्च स्वभावादितिनिश्चिये । निर्विकारो गतक्लेशः सुखेनैवोपशाम्यति" इति ।३।४।६।

कथं विश्राम्यति इति दृष्टान्तजिज्ञासायां श्रीमान् गुरुवरः सूत्रकारो दृष्टान्तदानाय सूत्रयति—

यथा भारव्यपगमे गन्तव्यनिकटे पथिकः छायासु । ३ । ४ । ७ ।

यथा येन प्रकारेण । भारव्यपगमे भारोत्तारणे । गन्तव्यनिकटे गम्यसमीपे पथिकःपान्थः छायासु निरातपप्रदेशेषु । यथा पथिको गन्तव्यप्रदेशं प्राप्य भारं व्युत्तार्य छायासु विश्राम्यति । तथा अनात्मस्वविश्रान्तं मनः आत्मन्येव विश्राम्यतीति दृष्टान्तो वेदितव्यः । एतावता एतदुक्तम्भवति यथा पथिकः चिरकालम्भारं वहन्मार्गपरिश्रमं प्राप्नुवन् रौद्रसन्तापमनुभवन् दुःखीयति । स च गन्तव्यनिकटं गत्वा भारंव्युत्तार्य्य भारव्यपगमोत्थं विश्रामसुखम्भुंक्ते छायासु सन्तापनिवृत्तिञ्च लभते । तथाऽयम् साधकोऽनादिकालेन संसारभारं वहन्नूर्ध्वमुत्पतन्नधःप्रपतन् तत्रत्यमार्गपरिश्रमं प्राप्नुवन्नाध्यात्मिकादितापत्रयमनुभवन् दुःखीयति । स्वस्वरूपं सच्चिदानन्दात्मानं प्राप्य व्यपगतसंसारभारःसंसारभारव्यपगमोत्थं सुखं भुंक्ते । निरवधिसुखनीरधावात्मनि तापत्रयनिवृत्त्यास्पदे छायोपमे तापत्रयरूपसन्तापनिवृत्तिञ्च लभते ततो मुक्तिरसमास्वादयतीति भावो वेदितव्यः । यद्यपि विश्रान्तिलाभादिदानीमपि मुक्तिदशाप्राप्तिरुपपद्यत एव तथाप्यद्यकैवल्यस्य प्रारब्धक्षयक्षणप्रतीक्षणत्वाभ्युपगमात् निकटवर्त्तित्वोपपत्तेः । उपपन्नमस्मिन्सूत्रे निकटशब्दोपादानमिति वेदितव्यम् । ३ । ४ । ७ ।

कैवल्यन्तु प्रारब्धक्षये । ३ । ४ । ८ ।

कैवल्यममृतम् विदेहमुक्तिरिति यावत् । तुशब्दः शान्तिं व्यावर्तयति ।

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

प्रारब्धक्षये अवश्यभोक्तव्यकर्मावसाने। अत्र भवतीति योजनीयम्।] केवलस्य भावः कैवल्यम् केवलशब्दो मात्रशब्दसधर्म्मा स्वस्य सत्त्वं स्वस्मादितरस्यासत्त्वं ज्ञापयति। ततः कैवल्यशब्देन कार्य्यकारणसंघातरूपेण स्थूलसूक्ष्मकारणात्मकशरीरत्रितयेन राहित्यं सच्चिदानन्दात्ममात्रेणाद्वैतभावेन शश्वदवस्थानमभिधीयते। यद्यपि जीवन्मुक्तावपि एतादृगेवावस्थानम् निरभिमानन्तिष्ठति। तथापि जीवन्मुक्तः पुरुष आप्रारब्धं संस्कारशेषेण चक्रभ्रमिवद्धृतशरीरस्तिष्ठति। क्षीणे च प्रारब्धे शरीरनिर्मुक्त एकान्तिकमात्यन्तिकञ्च कैवल्यमश्नुते। तदानीमविद्यानिवृत्तेरविद्यया नीयमानं धर्म्माऽधर्म्मसुखदुःखरागद्वेषात्मकं पौनःपुन्येन परिवर्त्तमानं संसारचक्रं निवर्त्तते। प्रवर्त्तते च तापत्रयनिवृत्तिपूर्व्वकः शीतलामृतरसमयसिन्धुसन्दोहः। तथा च सूत्रितं महर्षिणा श्रीमता कपिलेन "अथ त्रिविधदुःखात्यन्तनिवृत्तिरत्यन्तपुरुषार्थः" इति। नन्वत्र सूत्रे दुःखात्यन्तनिवृत्तिपदप्रवृत्त्या दुःखाभाव एव मोक्षो न कश्चिद्भावरूपार्थ इति व्यज्यते। तथाच सुखरूपात्माऽपलापादिमहदासमञ्जस्यमापतति। तत्रोच्यते नकैवल्यशब्दोऽभावं ज्ञापयति। किन्तु केवलस्य भावं स्वस्वरूपं सच्चिदानन्दमात्रमात्मानम्। तथाचोक्तमुत्तरगीतायाम्"कैवल्यं केवलं शान्तं शुद्धमत्यन्तनिर्म्मलम्। कारणं योगनिर्म्मुक्तं हेतुसाधनवर्ज्जितम्" इति "तत्त्वाभ्यासान्नास्मि न मे नाहम्" इत्याकारकं संशयविपर्य्ययरहितं सत्त्वपुरुषान्यताख्यातिसमुत्थं विशुद्धं ज्ञानमुत्पद्यमानमावरणमपनीय आत्मनःप्रकृतितादात्म्याऽध्यासरूपामविद्यां निवर्त्त्यतियावत्। दुःखत्रयाभावमुद्भाव्य ज्ञानभोगाभ्यामशेषकर्म्मक्षये कैवल्यपदवाच्यं स्वरूपावस्थानं निरतिशयसुखस्वरूपं साक्षात्करोतीति तात्पर्य्यं वेदितव्यम्"जीवन्मुक्तपदन्त्यक्त्वा स्वदेहे कालसात्कृते। विशत्यदेहमुक्तत्वम्पवनोऽस्पन्दतामिव" "व्यपगतकलनाकलङ्कशुद्धः स्वयममलात्मनि पावने पदे ऽसौ। सलिलकण इवाम्बुधौ महात्मा विगलितवासनमेकतामुपागाम" "ब्रह्मभूतःप्रसन्नात्मा ब्रह्मानन्दमयःसुखी" 'यो वै भूमा तत्सुखम्' इत्यादि श्रुतयः प्रकृतार्थम्प्रमापयन्तीति वेदितव्यम्। न च दुःखत्रयाभावः कैवल्यरूपभावपदार्थः सम्पद्यत इत्यपि वक्तुं शक्यते लोकेऽभावाद्भावसम्पत्तेरदर्शनात्। सति चाभ्युपगम्यमाने तथात्वे। सम्पद्यतां निर्बीजभूमावङ्कुरसम्पत्तिः। सम्पद्यतांहैमन्तिकान्नबीजादाश्विनाऽन्नबीजाभावरूपादाश्विनान्नसम्पत्तिः। सम्पद्यताम्भक्षणाभावात्क्षुन्निवृत्तिः। सम्पद्य-

२३

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

ताञ्च भक्त्यभावाद्देवताप्रीतिः । परन्तु न चैवं दृश्यते । तस्मादनुपपन्ना दुःखाभावस्य कैवल्यभावसम्पत्तिः । किन्तु सन्नेव केवलात्मा कैवल्यरूपदुःखव्यपगमे वाय्वपनीताभ्रमण्डलं विद्यमानसहस्रांशुमण्डलमिव ज्ञानापनीताज्ञानमण्डलः तत एव व्यपगततापत्रयाग्निचक्रबालोऽनन्ताखण्डमण्डलाकारो द्योतते । ननु लोके कृशगात्रस्य निर्बलस्य रोगिणः प्रतिकारबलेन रोगाभावसमनन्तरं शरीरपुष्टिर्बलवृद्धिश्च क्रमशो दृश्यते । तत्कथं नाऽभावाद्भावसम्पत्तिरित्युक्तिः सम्भवेदिति प्रष्टव्ये प्रतिवचनम् न रोगाभावः शरीरपुष्टिबलवृद्धिसाधकः किन्तु तत्प्रतिबन्धकबाधक एवेति वेदितव्यम् । स्वभावस्थितिन्यूनाधिक्यरूपं धातुवैषम्यमेव व्याधिशब्देनाऽभिधीयते । तद्रूपं ज्वराद्यभिधानं व्याधिसत्त्वं प्राणादिवायूनां नाड़ीषु सम्यक्चलनम् । तत्र च शोणितस्य सम्यक्सञ्चारम् ततो रसादिरूपसम्यक् परिणामञ्च रोधयति । तत एव कार्श्यम् दौर्बल्यञ्च क्रमेण जायते । व्याधिरूपप्रतिबन्धकनिवृत्तावप्रतिबद्धे शरीरपुष्टिबलवृद्धी सम्पद्येते इति वेदितव्यम् । अनयैव अभावप्रत्याख्यानमुद्रया आत्यन्तिकदुःखनिवृत्तिमेव पुरुषार्थमभिमन्यमानास्तार्किका अपि प्रत्याख्याता इति वेदितव्यम् । वस्तुतो निर्विकल्पकसमाधानमेव कैवल्यावस्थानशरीरं भवति । केवलं व्युत्थानसत्त्वासत्त्वभेदविभाव्यस्तयोर्भेदोऽधिगम्यते । समाधौ व्युत्थानं भवति । कैवल्ये तन्नेत्याशयो वेदितव्यः । व्युत्थानप्रयोजकादृष्टसम्बुद्धवासनासंस्कारशेषोपस्थितिर्निर्विकल्पकसमाधेर्जीवनमुक्तं व्युत्थापयति । तद्वासनासंस्काररहितो विदेहमुक्तः सर्व्वदैव स्वरूपसंस्थो ब्रह्मभावभूतो विजयते । तथाच श्रूयते "विमुक्तश्च विमुच्यते न तस्य प्राणाः समुत्क्रामन्ति तत्रैव समवलीयन्ते" इति । अत्रत्यो निर्विकल्पकसमाधिशब्दो बाह्याभ्यन्तरक्रियाराहित्ये तात्पर्य्यवान् । तच्च सांख्यानां सांख्यैर्योगिनाञ्च योगैः सिध्यति । तथाच भगवद्वाक्यम् "यत्सांख्यैः प्राप्यते स्थानन्तद्योगैरपि गम्यते । एकं सांख्यञ्च योगञ्च यः पश्यति स पश्यति" इति । यत्साङ्ख्यैरिति साङ्ख्यैः संख्यायते ज्ञायत आत्माऽनेनेति साङ्ख्यं ज्ञानं तैः साङ्ख्यैः ज्ञानैः पूर्व्वोत्तरभूमिजायमानसाधनसिद्धिस्वरूपज्ञानबाहुल्याभिप्रायेण साधकबाहुल्याभिप्रायेण वा सांख्यैरित्यत्र बहुवचनप्रयोगो वेदितव्यः । यद्वा अर्शाद्यचि कृते साङ्ख्यमस्यास्तीति साङ्ख्यः ज्ञानी तैः साङ्ख्यैर्ज्ञानिभिरित्यर्थो वेदितव्यः "प्राकृतेषु वस्तुषु दोषदर्शनपुरस्सर आत्मविवेकः सांख्यम्" इत्येतच्छास्त्रीयसूत्रविज्ञापितैर्विवेकै-

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

रिति यावत्। यत्स्थानमात्मपदम्प्राप्यते लभ्यते तत्स्थानमात्मपदं योगैः पूर्वोत्तरभूमिजायमानसाधनसिद्धिस्वरूपैरुपायैः 'स्वरूपपरिचयो योगः' इत्येतच्छास्त्रीयसूत्रविज्ञापितैः स्वरूपपरिचयैरितियावत्। अर्शाद्यचिकृते योगवद्भिर्योगैरित्यर्थो वा वेदितव्यः। अपीति समुच्चयेऽगम्यते लभ्यते। एतावता साङ्ख्ययोगयोः सामान्येनाऽऽत्मपदप्रापकत्वमभिहितमिति वदितव्यम्। ततः साङ्ख्यं योगञ्चात्मपदस्वरूप समानार्थप्रापकत्वेन समानं यः पश्यति वेत्ति स पश्यति यथार्थवेत्ता भवतीत्यभिप्रायो वेदितव्यः। केषाञ्चिज्जनानांकोमलहृदयानामसम्प्रज्ञातपदवाच्यनिर्विकल्पकसमाधेः पुनर्व्युत्थानं न भवतीति संशयो हृदि जागर्त्ति। अतः प्रस्तूयते तेषाम्प्रबोधविचारः। निर्विकल्पकसमाधिसंस्थः पुरुषो धृतशरीरो मृत्युमापन्नो भवति जीवति वा। आद्ये शरीरधारणासम्भवः। तस्मिन्नपि कथञ्चित् स्वीकृते व्युत्थानाभावे इष्टापत्तिः जीवद्दशानभ्युपगमात् कैवल्योपपत्तेः। द्वितीये जीवनदशासचिवप्राणधारणावश्यम्भावसम्भाव्यमानत्वे प्राणस्य शास्त्रप्रसिद्ध सूक्ष्मशरीरैकावयवभूतत्वात् जीवद्दशायाम् प्राणसत्त्वसंसूचितं सूक्ष्मशरीरसत्त्वं सम्भवति। सति च तत्सम्भवे मृत्तिकामयघटकार्य्यसत्त्वे मृत्तिकारूपकारणसत्त्वदर्शनात् कारणशरीरकार्य्यसूक्ष्मशरीरसत्त्वे कारणशरीरसत्त्वमुपपन्नम्भवति। सत्याञ्च तदुपपत्तौ कारणशरीरपदवाच्याया अविद्यायाः सत्त्वं सिध्यति "अविद्यावशगो जीवस्तद्वैचित्र्यादनेकधा। साकारणशरीरं स्यात्। प्राज्ञस्तत्राभिमानवान्" इत्युक्तिः कारणशरीरस्याऽविद्यात्वप्रमापणे नितरां जागर्त्ति। सत्यविद्यासत्त्वे तत्कार्य्यवासनासत्त्वमपि सम्भवत्येव। ततो ह्यव्याहतमेव वासनाजन्यं व्युत्थानं निर्विकल्पकसमाधाविति वेदितव्यम्। अपि च निर्विकल्पकसमाधौ संस्कारशेषनिरोधः स्वीक्रियत आचार्य्यैः। तत्र निरोधः संस्कारस्य सत्त्वमवगमयति न चासत्त्वम्। असत्त्वे निरोधासम्भवात् सति सत्त्वे सुषुप्तेरिव व्युत्थानमपि सम्भाव्यत एव। यदि सर्व्वदा निरोधः स्वीक्रियेत समाध्यनुच्छेदस्वीकारात्तर्हि यत्प्रारब्धं तस्मिन् समये शरीरधारणायाऽवकल्पते। तस्य समाधेः सर्व्वदैव व्युत्थानाभावस्वीकारात् क्षयाभावः प्रसज्येत। ततः संस्कारशेषसात्वत् कृतहानिदोषो दुर्निवार्य्यः प्रसज्येत। शास्त्रसिद्धान्तञ्च प्रारब्धस्याऽवश्यभोक्तव्यतारूपं व्याकुप्येत। ततः सिद्धमसम्प्रज्ञाताद्व्युत्थानं शास्त्रसम्मतेर्युक्तिसम्मतेश्चापि तथा सिद्धम्। " विरामप्रत्ययाभ्यासपूर्व्वः

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

संस्कारशेषोऽन्यः।” “द्रष्टा दृशिमात्रः शुद्धोऽपि प्रत्ययानुपश्यः” पतञ्जलसूत्रद्वयं प्रकृतार्थम्प्रमापतीति वेदितव्यम्। जिज्ञासूनां जिज्ञासापूर्त्यैं कैवल्यस्वरूपं चिन्मयं स्वच्छाकाशोपमम्प्रतिपाद्यते। तथाचोक्तं योगवाशिष्ठे “देशाद्देशान्तरं दूरं प्राप्तायाः संविदो वपुः। निमेषेणैव तन्मध्ये चिदाकाशं तदुच्यते” “अनागतायां निद्रायां मनोविषयसंक्षये। पुंसः स्वस्थस्य यो भावः स चिदाकाश उच्यते” इति। एतावता एतदुक्तम्भवति दृश्यानुपरक्तं दृङ्मात्रस्वरूपं यन्निर्म्मलं ब्रह्मस्वरूपं ज्ञानं तत्कैवल्यमित्यभिधीयते। व्युत्थानसंस्कारो व्यवहारवहो भवति। सम्प्रज्ञातसंस्कारो विवेकवहो भवत्यसम्प्रज्ञातसंस्कारश्च सुप्तो भवति इत्येषां व्युत्थानसम्प्रज्ञातासंप्रज्ञातसंस्काराणाम् वैसादृश्यं वेदितव्यम्। यथा स्वप्नदशायामिन्द्रियवृत्तिराहित्यपूर्व्वकम्मनसः सङ्कल्पसङ्कलितविषयवृत्तिमत्वम् भवति। तथा सम्प्रज्ञाते मनसः सङ्कल्पमयाखण्डाकारब्रह्मस्वरूपवृत्तिमत्त्वं वेदितव्यम्। यथासुषुप्तिदशायामिन्द्रियमनोवृत्तिराहित्यपूर्व्विकास्वसम्प्रसादसम्पत्तिः सम्पद्यते। तथाऽसम्प्रज्ञातेऽपि तत्सम्पत्तिर्व्वेदितव्या। अज्ञानावरणसत्त्वासत्त्वाभ्याम् सुषुप्त्यसम्प्रज्ञातयोर्वैलक्षण्यं वेदितव्यम्। ननु निर्विकल्पकसमाधौ सर्व्ववृत्तिनिरोधाभ्युपगमात् कथमानन्दभानम्भवतीति प्रष्टव्ये प्रतिवचनम्। यथा सुषुप्तौ “सता सौम्य तदा सम्पन्नो भवति” “पुरीतति शेते” इत्यादि श्रुतिस्वरसेन स्वस्याऽऽत्मनः स्वात्मनि निर्विषये सम्प्रसादस्वरूपे सम्पत्तिसत्वेऽपि “सुखमहमस्वाप्सम्” इति श्रुतिबलेन प्रबोधदशायाम् सौषुप्तसुखानुभवप्रसिद्धेः सुखानुभवसत्त्वोपपत्तौ तदनुभवितुरपि उपपद्यमानत्वात्। तस्यां सुषुप्तिदशायां स्थूलसूक्ष्मशरीरवृत्यप्रवृत्तिमत्त्वेऽपि काचित्सूक्ष्मा बुद्धिवृत्तिः तत्सुखानुभवित्री शास्त्रैः तद्विद्भिर्वृद्धैश्च स्वीक्रियते। तथैव निर्विकल्पकसमाधावपि “तदेवार्थमात्रनिर्भासं स्वरूपशून्यमिवसमाधिः” इतिपातञ्जलसूत्रस्वरसेनाऽऽत्मस्फूर्त्तिमात्रस्थितौ समस्तविषयजाताकृत्यनुभूतिनिवृत्तावपि “द्रष्टा दृशिमात्रः शुद्धोऽपि प्रत्ययानुपश्यः” इतिपातञ्जलसूत्रबलेन तत्रापि निर्विकल्पस्थितौ प्रत्ययानुभवसत्त्वस्वीकारात् तदनुभविका काचिद्बुद्धिवृत्तिः “प्रत्ययम्बौद्धमनुपश्यति” इत्यव्यवहितप्रागुक्तसूत्रीयभाष्यबलेन स्वीक्रियते। सा तदभिन्ना भिन्ना वेति निर्णेतुमशक्या प्रकाशात्मकत्वात्प्रकाशकात्मसारूप्यात्। वस्तुतः तत्स्वरूपैवेति भानमापन्ना भवति। तत्रात्मेतरार्थोऽस-

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

स्वात् । तथाच भगवद्वाक्यम् । "यत्रोपरमते चित्तं निरुद्धं योगसेवया यत्र चैवात्मनाऽऽत्मानं पश्यन्नात्मनि तुष्यति । सुखमात्यन्तिकं यत्तद्बुद्धि ग्राह्यमतीन्द्रियम्" "यत्तदग्रे विषमिव परिणामेऽमृतोपमम् । तत्सुखं सात्विकम्प्रोक्तमात्मबुद्धिप्रसादजम्" इति । एवं प्रमाणप्रमापितमानन्दभानमुपपन्नम्भवतीति वेदितव्यम् । कैवल्येऽपि स्वरूपमात्रप्रतिष्ठायामयं निर्विकल्पकसमाधानीयन्यायो नेतव्यः "ब्रह्मविद्ब्रह्मैव भवति" इतिश्रवणात् । सर्व्वावरणभङ्गाज्जीवजगद्ब्रह्मैकत्वप्रतिपत्तिरूपाद्वैतदशायामपि कैवल्ये "साक्षी चेता केवलो निर्गुणश्च" इति श्वेताश्वतरोपनिषच्छ्रवणात् केवलस्य कैवल्यरूपस्याऽप्यात्मनः साक्षित्वस्वीकाराद्भवत्येव स्वीकार्य्यः एतत्साक्षित्वप्रयोजकः साक्ष्यविषयरूपः कश्चिद्भावः, केवलाकारस्य निर्विकल्पकसच्चिदानन्दात्ममात्रस्वप्रकाशबोधस्याऽकर्त्तुरक्रियस्येति यावत् । "साक्ष्यहं किञ्चिदप्यत्र न कुर्व्वे नापि कारये" इतिश्रुत्युक्तलक्षणस्य स्वसत्तासामान्यपदवाच्या सच्चिदानन्दात्ममात्रा नैसर्गिकी अप्रयत्नसिद्धेतियावत् । केवलभावस्वभावभूतास्वरूपप्रतिष्ठैव काचिदस्तिता । साक्ष्यविषयरूपः कश्चिद्भावोऽभ्युपगन्तव्यः । तथा च श्रूयते कैवल्यप्रकान्तया श्रुत्या "स्वानुभूत्येकमानञ्च यत्तत्वन्तदसौ स्थितः । यदेकञ्चाऽप्यनेकञ्च साञ्जनञ्च निरञ्जनम् । यत्सर्वं चाप्यसर्वं च यत्तत्वं तदसौ स्थितः । निरानन्दोऽपि सानन्दः सच्चासच्च बभूव सः । न चेतनो न च जडो न चैवासन्न सन्मयः" इत्यादि । एतासु श्रुतिषु "यदेकं चाऽप्यनेकं च साञ्जनं च निरञ्जनम्" इत्यादीनि कोटिद्वयावगाहीनि लक्षणानि कैवल्ये ब्रह्मात्मनः स्वस्यैव अनुभवितृत्वमनुभाव्यत्वं च प्रमापयन्ति अद्वैतम् द्वैतं चित्त्वमचित्वं चावगमयन्ति सन्ति अनिर्वचनीयतां प्रतिपादयन्तीति निपुणं विचार्य्यतां महद्भिर्धीधनैः । प्रसिद्धञ्चस्वसंवेद्यत्वं स्वप्रकाशकत्वञ्च ब्रह्मणः शतशः सहस्रशश्च शास्त्रेषु । नन्वेकस्यैव ब्रह्मणोऽनुभवितृत्वानुभाव्यत्वोभयत्वस्वीकारे एकाधिकरणककर्म्मकर्तृत्वविरोधः प्रसज्येत इतिचेन्न "सर्वं खल्विदं ब्रह्म" इति श्रुतिबलेन ब्रह्मणः सर्वाऽऽत्मत्वोपपत्तेः निरुक्तदोषः परिहर्तव्यः । अलौकिकार्थे लौकिकदृष्टान्तसमन्वयो न न्याय्यः । ततोऽस्मिन्नलौकिकार्थे ब्रह्मणि लौकिकदृष्टान्तमननुसृत्यापि वैदिकं शब्दप्रमाणं समन्वेतव्यम् । अपि च प्रलयकाले "सदेव सौम्येदमग्र आसीत्" इति श्रुत्या जीवजगज्जातनिरासेन अद्वैतस्थितिरवगम्यते । तत्रापि एवं

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

स्वीकृतौ अद्वैतमर्य्यादाऽबाधिता तिष्ठति । रसो वै सः रसो ह्येवायं लब्ध्वाऽऽनन्दीभवति" "आनन्दं ब्रह्मणो विद्वान्न बिभेति कुतश्चन" "स्वानुभूत्येकमानं च यत्तत्वं तदसौ स्थितः । ब्रह्मभूतः प्रसन्नात्मा ब्रह्मानन्दमयः सुखी" इत्यादि श्रुतयोऽपि न व्याकुप्यन्ति । एताः श्रुतय आनन्दस्वभावेन स्वेनाऽऽत्मनाऽऽनन्दस्वभावस्य स्वस्याऽऽत्मनोऽनुभवनं स्पष्टं श्रावयन्ति । उक्तञ्च योगवाशिष्ठे "शुद्धं किमपि तद्भाति स्वानुभूतमपि स्फुटम् । यदवाच्यमनाद्यन्तमेकं द्वैतैक्यवर्जितम्" अपि च श्रीमान् वेदव्यासो वेदान्ताचार्य्य आत्मस्वरूपलिलक्षिषुरनेनैवाभिप्रायेण "आनन्दमयोऽभ्यासात्" अस्मिन् सूत्रे आनन्दशब्दमनभिधाय आनन्दमयशब्दमभिहितवानिति व्यक्तं व्यज्यते । यथा निर्विकल्पकसमाधौ द्रष्टृदृश्यदर्शनादिरूपत्रिपुटीलयाऽभ्युपगमेऽपि "यत्रोपरमते चित्तं निरुद्धं योगसेवया। यत्र चैवात्मनात्मानं पश्यन्नात्मनि तुष्यति।सुखमात्यन्तिकं यत्तद्बुद्धिग्राह्यमतीन्द्रियम्।वेत्ति यत्र नचैवाऽयं स्थितः चलति तत्त्वतः" इत्यादिभगवद्वाक्यानुमत्या आत्मना आत्मसुखानुभवनं सिध्यतिः तथैव कैवल्ये तथात्वस्वीकारेऽपि "रसो वै सः रसं ह्येवायं लब्ध्वाऽऽनन्दीभवति" इत्याद्यनेकानां कैवल्यदशानन्दानुभवनप्रतिपादिकानां श्रुतीनामनुमत्याऽऽनन्दानुभवोऽभ्युपगन्तव्यः।यथा कश्चित्पुरुषः सम्प्राप्तपुत्रजन्मसञ्जातप्रसादः कियता चिरेण कालेन पुत्रजन्माद्यननुस्मरन्नपि स्मरन्निव प्रसीदति। पुष्यति च तस्य शरीरम्। यथा कश्चिज्जनःकारागारनिर्गतोऽननुभवन्नपि किञ्चित् लौकिकं सुखजनकशब्दादिविषयमनुभवन्निव हर्षभरभरितो दृश्यते । यथा च कश्चिद्बुभुक्षितोजनो हृद्यं स्वाद्वन्नं भुक्त्वाऽभुञ्जानोऽपि भोजनसमयसमनन्तरं तृप्यति हृष्यति च। एवमेव कैवल्यरूपः केवल आत्मा स्वं स्वभावमानन्दमात्मानमननुभवन्नपि अनुभवन्निवाऽऽनन्द एवाऽऽनन्दीभवतीति पर्य्यवसितं तात्पर्य्यं वेदितव्यम् । अपि च "सत्यं ज्ञानमनन्तं ब्रह्म" इतिश्रुत्या ब्रह्मणो ज्ञानरूपत्वं प्रसिध्यति । तत्र ज्ञा धातोः "ल्युट् च" इति भावप्रत्ययकरणेन ज्ञप्तिपदवाच्यस्य ज्ञानमित्यस्याऽर्थो ज्ञानविषयता भवति "करणाधिकरणयोश्च" इति पाणिनेः करणप्रत्ययकरणेन ज्ञानमित्यस्य ज्ञानकरणताऽर्थो भवति । अधिकरणप्रत्ययकरणेन च तस्य ज्ञानाधिकरणताऽर्थश्च भवति । एवं ज्ञानात्मनः केनापि प्रकारेण स्वयं स्वेन स्वस्मिन् वा स्वानुभवनमुपपद्यत एव । अपि च "ब्रह्मविद्ब्रह्मैव भवति" इतिश्रुत्या लब्धकैवल्य-

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

स्यात्मनः ब्रह्मरूपत्वं प्रसिध्यति। ब्रह्मणश्च "तदैक्षत बहुस्यां प्रजायेय" इतिश्रुत्या ईक्षितृत्वं श्राव्यते " स ईक्षत लोकान्नुसृजा" इत्यपि श्रुतिः ...णः ईक्षापूर्व्विकामेव सृष्टिमाचष्टे। एवं यथा सृष्टौ ब्रह्मण ईक्षाऽभ्यु-...म्यते। तथैव तस्य कैवल्येऽपि स्वानन्दानुभूतिरपि अभ्युपगम्यताम्। ...नि यानि विधिमुखानि तटस्थानि वा लक्षणानि ब्रह्मणि समन्वी-...तानि तान्येव कैवल्यात्मन्यपि सर्व्वाधिष्ठानभूते कूटस्थब्रह्मस्व-...समन्वेतव्यानि। तर्हि अघटितघटनापटीयस्त्वाद्ब्रह्मस्वभावात् ...शास्त्रीयसिद्धान्तसिद्धात् नाऽस्माकं किञ्चिदपि दुर्घटम्। यथा भक्तो जनः प्रेमरसाम्बुधिनिमग्नः आदेहगेहात् परिविस्मृतसर्वजगज्जालो निवृत्तबाह्याभ्यन्तरसमस्तवृत्तिसत्त्वःसहजाऽऽनन्दात्मिकां कामपि पराभक्तेः परां काष्ठामननुभवन्नपि अनुभवन्निव स्रवन्नेत्राम्बुर्निमीलितलोचनो लब्धरोमोद्गमः कृतकृत्यतामायाति। इति लोके भक्तजनानुभूतोऽर्थः साधुभिः प्रत्येतव्यो भवितुमर्हति। अपि च साहित्यशास्त्रं शृङ्गारक्रियानिष्पत्तिजन्यमत्यल्पकालिकं विषयानन्दं ब्रह्मानन्दसहोदरमुद्घोषयति। तत्र निष्पत्तिसमनन्तरं विषयी जनो निष्क्रियो निरहङ्कारो निर्मनस्को विगतसर्व्वव्यापारोऽननुभवन्नपि अनुभवन्निव सर्व्वेहोपरतिस्वरूपं विषयानन्दमानन्दीभवति। अयमर्थो हि लोके पामरजनानामप्यनुभूतिगोचरो वर्त्तते। एवमेतत् कैवल्यभागीयं सर्व्वं व्याख्यानं निरवद्यं वेदितव्यम्। समाप्तिश्च समगादियङ्कृतिः। अनया शमाप्यताम् कृतकृत्यतारूपम् इति शम्॥

इति परमपूज्यपादश्रीमद्योगदत्तशर्मकृताऽमृतोपदेशे पूज्यपाद श्री मद्योगदत्तशर्मशिष्यश्रीमत्सत्यनारायण शर्मकृतभाष्ये तृतीयाऽध्यायस्य चतुर्थःपादः समाप्तः॥

Dr. Urmila Sharma Collection, Varanasi

CC0. In Public Domain, Digitizagtion by eGangotri

त्वा

भूतः

। ।

गा

क्ति-

नैक्य-

Dr. Urmila Sharma Collection, Varanasi